१००. हारायणाणि शग्ध्यूषु त्वभिसोमा प्रसोमदे।
रयिष्ठानि त्वभीनोवावेन्द्रयासो वाजसातये॥

१०१. अथैटतानि तूच्चाध्वास्यप्रैतानि विलम्बसौ।
वैरूपाणि तु तिस्रोवाचोच्चातेथ शाम्मदम्॥

१०२. त्वँसो यस्ते गिरिष्ठाश्च एतान्देवा पदावसु ।
शैनश्शेपकमश्वानि त्वायःप्वे ह्यू तमद्य च ॥

१०३. श्रायन्तीयं श्राय मच्छानश्शी तृचे पृथक्।
जसातये थ हिष्ठीयनिन्दुःपूषापरित्य म॥

१०४. कौल्मलानि पुना तोषि त्वँह्वे हाविष्कृतानि तु।
त्वँसो स्वादिगिरिष्ठाथ पृष्ठानि तु पिबासुत॥

१०५. पुना तोष्यथ वाम्राणि तोष्युष्वाणाभिसोम च।
भासानि तु युषग्यस्ते स्वादिकाक्षीवितान्यपि॥

१०६. छैवादासानि तु प्राण इन्द्रमच्छ सखाय आ।
वैश्वामित्राणि यज्ञाय पुरांभिन्दुरसाविसो॥

१०७. अदारसृंजि जिघ्नोच्चा दक्षसा रुण साम च।
मृज्य तोषि पुना वार्शन्युभयं श्रृ कईं पुना॥

१०८. अथ त्रिणिधनायास्यं श्रीणन्तोमृज्या पुना ।
ऊद्व्धेडंत्वाष्ट्रीसामानि परित्यँह पुरस्सुता॥
१०९. पोरुमीढानि त्वमंगप्र पवमानाभिय क्रतुम् ।
क्षुष्टम्भानि तु तिस्रोच्चा स्वादि मैधातिथानि तु।
११०. पुनाभिसोमा माचिच्च भारद्वाजानि तु क्रतुम्।
आत्वासहाभिसोमाथ त्वाष्ट्रीसामान्यसाविसो॥
१११. सहस्रधा सुता माधुश्छन्दसं त्वामिदा तृचे ।
पुना तोषि पृथक् चाथ मधुश्चुन्निधनानि तु॥
११२. पुरस्सोमा:पुषो द्वंसीयान्या त्वा विशेन्द्रसु।
गायन्ति वाचस्सामाभिघुम्नासोता तृचे पृथक्॥
११३. आसोताऽथोदोविशीयान्यानोभित्वाभिसोम यत्।
आश्वे विपश्चितोभिद्रो नार्मेधे तु अधाहि च॥
११४. इन्द्रं विश्वाथ आक्षारं पवतेहर्य मच्छसु ।
नानदे तु पुर:प्रत्य तहव्ये पान्तमा पुरो॥
११५. क्रौंचोत्तरे पुर:पूषा सोम साम विपश्चित:।
सुताइन्द्राय दंष्ट्राद्ये आत्वावीन्द्रं व्यथप्लव:॥
११६. सखाय आनिष्युत्सश्च प्रवद्धा प्रो अयाप्रकम्
कक्षे पन्येन्द्रायमद्व मौक्षे यस्ते मदिष्टया॥
११७. क्रोशे प्राणोर्मिणा शौक्ते तृचे ऋचि सखाय आ।
शैशवे स्वादि यत्सोम च्यावने तु पवस्व म॥
११८. ऋचि द्युम्नन्नृचे त्रैते प्राणा गोमन्न शाकले।
अर्षा वृषोथ वार्शे तु अर्षा प्राणाथ खानसे॥
११९. नकिष्टाभिप्रियागोष्ठे पुनानो ज्याजिगे ।
वृषोच्चा पौरुमद्गे तु अभिसोमा पुना इमे ॥
१२०. गौतमे चो भयस्तोभे अच्छिद्रे अभिसो प्रहि।
त्सप्रोत्तरे तु सोमा:प पुरोष्टस्यप्रिये इमम्॥
१२१. यदिन्द्रचित्रं वैयश्वं उभयंशृ तृचे पुना।
अथ वाजजिती सूर्य प्रधन्वा सामराजके॥
१२२. अक्रानसाविसो सम्पा इन्दुर्वाभित्रिधेनुनि।
त्रिरस्मै ज्योतिरच्छि ---- ॥
१२३. अजीजनत्वन्त ईन्द्रत्रयन्तन्तु त्वाष्ट्रिसामनी।

सुता तृच अभीनोवा हवद्वामे दशक्षिपः ॥

१२४. तंत्वाविप्रा सुवःपृष्टे प्रहिन्वान ऋतन्तव।
अथ सैन्धुक्षिते उच्चा अग्निं वो ऐध्मवाहके॥

१२५. आघाये च यजिष्ठन्त्रैककुभे तु य एक इत्।
त्वमङ्गाथ सुरूपाद्ये अपि गायत्रिकासिते॥

१२६. युषग्यस्तेय लौशाद्ये प्रो अया व्रत औशने।
प्रेष्ठन्तिस्रोथ यामैडे असाविसो वृषामति॥

१२७. वाजदावर्यके धन्वा इन्द्रायेन्दो मरुत्वते।
अथ साप्तमिकायास्ये पुनातवाल्य लौशके॥

१२८. असाविसोमो गोवित्प उद्वद्भार्गव सामनी।
धर्ता शिशुं कार्तयश अभीनोवा पुरोजिती॥

१२९. शुद्धीयैडे पुरोज्येतो काशीते पवते हरिः।
तंवस्सखेन्द्र वासिष्ठे उत्सोदे वयमेनमि॥

१३०. बथाच्छत्रासदस्ये तु पुरोजिति जसातये।
स्वारकौत्सेत्वभीनोवा प्रसुन्वाभीकसामनी॥

१३१. उच्चाद्विपज़ितो यौक्त स्तृचे जसापुरः।
हरिश्रीनिधने जिघ्न वृषात्रेये जसा पुरः

१३२. निहवे तु परित्यं विश्वेदेवान्त्य जनित्रके।
तंवःपुरोजि वाराहे प्रवद्भार्गव सामवत्॥

१३३. अथौकोनिधने साम्नि आजामि रद जीजनो।
अथ शाक्वरवर्णे तु उच्चेषं बृहदाग्नये॥

१३४. अग्निन्नरःपुरोभ्यस्ताकूपारे तु पुरोजिती।
इन्द्रायसो द्युताने तूत्सोदेघाह्युत्तरार्कके॥

१३५. मृज्यमानो यओजिष्ठाध्यर्द्धेडे सोमसामनी ।
यस्तेऽसाव्यैडमायास्यं सोमसाम्नि पुरःपुना॥

॥ इति ऊहसामप्रकाशः ॥

॥ अथ रहस्यसामप्रकाशः ॥

१. रहस्येऽपि च सामानि संख्या द्वे च शते नव।
तेषु द्वे द्वे त्वरिष्टं च पार्थुरश्मं च सप्तहम्॥

२. भासं च निधनं वाग्जंभमष्टेड एव च।
सिमा स्वाराणि चत्वारि त्रीणि त्रीणि तु संकृति॥

३. रूपरेव यशस्थानषङ्गान्यर्कविकर्णकम्।
हावैराजोथचत्वारि ह्रस्वदोयशः ॥

४. भर्गो ऋषभवैराजः पंच पंच ततः परम्।
व्याहृतीः स्वाशिरामर्करायोवाजीयमेवच ॥

५. तथा महादिवाकीर्त्यं षट्षङ्गत्सान्तरिक्षके।
बृन्निधनजम्भंचाथाष्टावाभर्वणन्तथा ॥

६. नवैवतमसोर्काद्वाविंशतिस्तुरभन्तरम्।
बृहदेकाधिकन्तस्मादन्यान्येकैकशःकिल ॥

७. बृहन्ति मत्स्यपात्वामिद्धे त्वमग्ने पुरःकिमित्।
माभे यज्ञासुते नावोप्रत्युवेमा उषं त्रिक ॥

८. अग्नेविवस्य यज्ञेन्दु स्सखायोधा पुना तवा।
मृज्यसोमा:पपूषंचेत्येतानि त्रीणि विंशतिः ॥

९. रथन्तराण्यभित्वाद्वे एना प्रत्यु इमाउवाम्।
कया पुना द्वे यज्ञाय यज्जा प्रत्यु तव प्रसु ॥

१०. तोष्यभित्वावृमाभेमावीतयेग्ने विवाभिसो।
सुतोष्वाणजसातेति द्वाविंश:किल संख्यया ॥

११. तमसोर्काः प्रधन्वाभिप्रियाण्यक्रानसानिसो।
धर्ता तृचे पृथक्पूषा द्विर्यं श्रीणं सुषा नव ॥

१२. अथाष्टाथर्वणानिस्युर्दक्षसा तोष्यभिप्रवः।
पुनानस्सोभिसो तंवः परिधींरं पुरोजिती ॥

१३. नित्यवत्साषडग्निंहो प्रोषूष्वा याजसा त्रिक।
अन्तरिक्षाणि चासोम सुता शद्या यदिन्द्रया ॥

१४. अभिसोमाग्न आया षट् बृहन्निधन जम्भकाः।
पुरोजित्यभिसो त्वामित्वँह्वे पूषा पुनेति षट् ॥

१५. पंचव्याहृतयस्सत्यं पुरुषाभूर्भुवस्सुवः।
स्वाशिरार्कायुषगिरिष्ठा स्वादि यस्ते परिप्रिया ॥

१६. रायोवाजीयकं स्वादोऽग्निं वोग्निन्नमहेप्रति।
दिवाकीर्त्यानि बिभ्राट्बृबण्मश्रायेन्द्रमित्तव ॥

१७. ह्रस्व यदिन्द्रया यद्या सुतासोमाभिसो ततः ।
मो वैराजा:पिबासोमश्रुधीहवतवा पुरः ॥

१८. भर्गाश्चतुष्टये तोषि पूषोत्सोदे पुरोजिती।

संकृतिश्रायतोषिंच तृचे ऋचि परित्य च ॥

१९. वैरूपाणि सुता यद्यावोभिस्सोमा ततो यशाः।
त्वमितोषि पुना ग्नयर्का यस्ते तिस्रो मदिष्टया॥

२०. रेवत्यस्तु परिस्वान इन्द्रायेन्दोम रेवतीः।
देवस्थाननानि तोषिंच पुनाश्रीण विकर्णकम्॥


२१. क्रतुं पुरोजिश्रायन्तोऽतीषंगाणि यदिन्द्रचि।
जसोत्वाथ महावैराज पिबासो तवा पुरः॥

२२. अरिष्टे तु सुता सोम पवित्रं पार्थुरश्मके।
स्वादोरिन्द्रोमदाभासे पुरोमूर्धाधि सप्तहे॥

२३. त्वामित्तृचे पुनैकस्यां ईजंभे तोषि रोजिति।
अष्टेडे तु जसा धर्ता सिमा उष्वाजसा स्वरे॥

२४. प्रथमे तु सुता प्रत्यौ द्वितीयोऽपि तृतीयके।
पूषा मत्सौ चतुर्थे तु प्रसु यज्जायथेति च॥

॥ इति रहस्यसामप्रकाशः॥



अध्यायाः । वर्णात्मक ऋक्संख्याः। खण्डाः ।

१. वेदोधर्मायैवादेशोत्र ॥१॥
अन्नं हि प्राश्यं प्रशस्तं च ॥२॥
इन्दु भुक् ॥३॥
प्रशस्तभूत ॥४॥
ब्रूयाच्छान्तोऽहरहस्साम ॥५॥
अतोममजाशू **प्रथमः** ॥६॥

२. गायन्ति मम आनन्दम् ॥१॥
साम्नि उक्थ्ये गायत्रं तत् ॥२॥
अतो भोजनं ते भूयात् ॥३॥
भुंजीयात् ॥४॥
आगतो गौस्संसेव्यः ॥५॥
गौर्देयो दोहने **द्वितीयः** ॥६॥

३. ते साम्नो नमो वेदे आधा-
ता धर्मे ॥१॥
इन्द्रइन्द्राणी तपस्वीह ॥२॥
सोमोद्गाता स्यात् ॥३॥
आयाहि ॥४॥
ब्रूयात्सोमो धर्मान् ॥५॥
नमो वाचे **तृतीयः** ॥६॥

४. आदित्या वै भर्त्तात्वाम्मा-
प्रीत्यावैशास्यात् ॥१॥
इन्द्राण्याश्शान्तिरितिहासा-
मस्माकम् ॥२॥
आयाता श्रीः ॥३॥
एते यान्ति ॥४॥
यो धर्मो मम ॥५॥
सुते हि च दे **चतुर्थः** ॥६॥

अध्यायाः । वर्णात्मक ऋक्संख्याः। खण्डाः ।

५. मात्रे हि नवोगानन्तो वेदे ॥१॥
धर्मायायातस्तपो दद्यात् ॥२॥
श्रुत्वा तु याता ब्रुवतां
धर्मान् ॥३॥
मतो वेदे ते ॥४॥
आयातु मांसा (आयातु
धाता) ॥५॥
मयासुज्ञाते विष्णौ (प्रदातुं
पात्रे इच्छेत्) ॥६॥
अतो मम दोक्षस्व **पंचमः** ॥७॥

६. प्रातरहरहस्सेव्यो गौ-
श्शान्तिमिच्छेत् ॥१॥
अनेनैवोपासनमिच्छेत्प्री-
त्या ममैव ॥२॥
भूमिंच जित्वागां च मयि
शान्तिर्वा ॥३॥
गेहे ग्रामे गयान् ॥४॥
संसेव्यः ॥५॥
गङ्गास्नानेन च मम शान्त्यै ॥६॥
प्रातरिमां, स्नायात् **षष्ठः** ॥७॥

७. आशु गच्छेत् गौतमो नमो
मान्देशाच्छुभे ॥१॥
एतेनैवदेशेनायाते तत्
कर्मणे चोदनात् ॥२॥
अग्निरादित्यः शक्रः प्रीतः ॥३॥
सामगश्शान्तेत्र ॥४॥
येमन्त्रापदेशी ॥५॥
तत्र च शान्त्यै गङ्गाम्भसि ॥६॥
ततः स्नायात् **सप्तमः** ॥७॥

अध्याया: ।	वर्णात्मक ऋक्संख्या:।	खण्डा: ।
८.	दिवि सोमोत्र भवेद्रामैते	॥१॥
	अन्नैरेवैतेशोभैरनेसगा:	॥२॥
	इमामादूरे च ततो मन्वामे	॥३॥
	बभूव	॥४॥
	इमां त्वं तं च सेवेत	॥५॥
	इमां त्वयि भक्ता **ऽष्टम:**	॥६॥
९.	अनाहूतेनात्र च नैकोहं भुंक्ते(ञ्जे)	॥१॥
	इदानीं सामवेदोऽबोधि	॥२॥
	होमसाधारण्याद्गोपाल:	॥३॥
	शोभनं चैते	॥४॥
	शुद्ध एवैको गौ:	॥५॥
	सुषाचा एषु	॥६॥
	एतेन च	॥७॥
	सन्तु	॥८॥
	संसारभयम्	॥९॥
	स्नाते नमो वाचे **नवम:**	॥१०॥
१०.	अग्निना देव: श्रेष्ठेते प्रीत:	॥१॥
	गौतम एवैते एव	॥२॥
	एते एव सेव्ये	॥३॥
	नव प्रीते वै श्री:	॥४॥
	त्वया प्रजात्यैम	॥५॥
	स स्वधने नीचै:	॥६॥
	वामनस्सर्वत्र	॥७॥
	अग्निर्विश्वेदेवा:	॥८॥
	भक्तित्वं याथाथ्यै हि	॥९॥
	स्नायात्	॥१०॥
	अनेन नारी शूरा एवैषात	॥११॥

अध्याया: ।	वर्णात्मक ऋक्संख्या:।	खण्डा: ।
	भोजनत्वमच्छी **दशम:**	॥१२॥
११.	प्रशान्तानां सुनिश्चितत्वम्	॥१॥
	इमे क्रियतं विन्दते	॥२॥
	संसारभयात् **एकादश:**	॥३॥
१२.	अन्नं दैविकं नाशान्त्या	॥१॥
	अन्नादि भुक्	॥२॥
	सन्निहिते योगै:	॥३॥
	मानेन वतु धातु	॥४॥
	देवत्राविवासा मया	॥५॥
	सुधायनमान्यहंच **द्वादश:**	॥६॥
१३.	मम सर्वे अनाभान्ति	॥१॥
	आदित्या इन्द्रश्च शान्त्या	॥२॥
	सुभूरि गुरु:	॥३॥
	नारायणपादौ स्याताम्	॥४॥
	वैष्णवी ऐन्द्रवायवौ	॥५॥
	अनेनैवाशु मे प्राप्तम् **त्रयोदश:**	॥६॥
१४.	अनादि वेदं तं विदो येऽत्र	॥१॥
	मम देव: पूषा येतेन	॥२॥
	माता पिता वै प्रीत:	॥३॥
	तत्रास्माकं दैवतं भवे **चतुर्दश:**	॥४॥
१५.	अग्निर्ममैव देवतैका	॥१॥
	सरामो राम वेदा तातं विद्यात्	॥२॥
	सामविधानंच	॥३॥
	सुवाचा सुभुप्रिया **पंचदश:**	॥४॥

१६. नराणां कविषु वादः ॥१॥
अनेनैवामुत्र ॥२॥
इन्द्रसामानो च स्नात्वा ब्रूयुः ॥३॥
सामानि प्रज्ञा शिष्यस्य स्यात् ॥४॥ **षोडशः**

१७. एष करोत्याप्तं विष्णु- प्रियाम् ॥१॥
सामविच्छास्त्रज्ञो वा श्राद्धे ॥२॥
देवबुध्यै वैतेन ॥३॥
विजित्यैतान्तं वै **सप्तदशः** ॥४॥

१८. शिष्टा वै संविदन्तेऽर्थात् ॥१॥
सामगस्सर्वत्र देवगुरुः ॥२॥
सर्वं विन्द्रामश्च मे स्यात् ॥३॥
एतेनैव ब्राह्मणानां वासो - ॥४॥ **ऽष्टादशः**


१९. एषा च शान्तिर्भवतु श्रावास ॥१॥
सामगश्शान्त्यै ये विप्राण्यो- श्शुभे ॥२॥
साम्नि हि निपुणाम् ॥३॥
वासोविशुद्धिश्चाम्भसि ॥४॥
वसिष्ठसोमसुतः प्रेषये- ॥५॥ **देकोनविंशः**

२०. भक्षेणा नमां सेह प्राशामेच ॥१॥
इन्द्राणी प्राप्नोतु ॥२॥
शास्त्रसिद्धाभिरिति चेत् ॥३॥
माधव एवैतेनेष्टे भव ॥४॥
रुद्रागाहंनमस्यामि ॥५॥
कौशिकोत्राथेतु माधवो देवः ॥६॥
आपस्नाने भोजनार्था पाने प्राप्ताविंशः ॥७॥

२१. प्रीतश्शुक्रःप्रियान् पुनाति ॥१॥
सर्वसुरान्नत्वा प्रियाणि ॥२॥
इमे शान्तबुध्यैवातिथीन् (पूजयेत्) ॥३॥ **एकविंशः**

अकारे पंच एको वा, आकारे द्वौ षडेव वा ।
इवर्णे सप्तवा त्रिर्वा उवर्णे चतुरष्ट वा ॥
ए ऐ ओ औ तु इत्येते विज्ञेया अनवग्रहाः ॥

॥ अवग्रहपरिशिष्टं समाप्तम् ॥



विज्ञप्तिः

भोः सामवेद सुहृदः, पण्डितप्रकाण्डाश्च,

विदितचरमेव भवतां यत् अद्वैतविद्याचार्य, महाराजासाहेब श्री गोविन्द-दीक्षितेन्द्रैः श्री कुम्भघोणे पावनकवेरजातीरे (सन् १५४२) प्रतिष्ठापित वेद-पाठशालायां (राजावेदपाठशालायाम्) आरम्भशुभदिनादारभ्य अस्मद्वंशीया एव सामवेदाध्यापक पदवीं अलञ्चक्रुः। तत्र दैवयोगात् अहं सप्तम इति। मया च पञ्चाशद्वर्षाणि (सन् १९३१—१९८१) तस्यामेव पाठशालायां अविच्छिन्नतया सामवेदाध्यापकपदवी अधिष्ठिता । अस्मत्परंपरायां अध्ययनक्रमः तत्तत्तात-पादेभ्यः प्रवृत्तः। ते सर्वेऽपि अनादिसिद्ध सामलक्षण धुरीणाः। तेषां सलक्षण-पाठक्रम एव अद्यापि अनुस्यूततया पाठ्यते । अनयैव दिशा बहवो छात्राः अधीत सामवेदाः आसन्, वर्तन्ते च । मयापि अस्मत्तात पादान् विहाय न कुत्राप्यक्षरलेशोप्यधीतः।मन्निकटेऽपि परश्शतं माणवकाः साम,सलक्षणमधीत्य तत्र तत्र नानाप्रान्तेषु गगनाङ्गणेषु तारका इव विलसन्तीति इयान् विशेषोऽस्म-त्परम्परायाः ।

तत्र तत्र संप्रदायमेव शरणीकृत्य विलक्षणं गीयमानं साम, सलक्षणं साम च तोलयित्वा शुद्धाशुद्धपट्टिका काचन प्रकशयितव्येति अस्मत्तातपादाः पूज्यश्री रामनाथ श्रौतिनः मां आज्ञापयामासुः ।

अस्मत्सलक्षण पद्धतिमिमां अङ्गीकृत्य सामोदं, चम्पकारण्य वास्तव्यैः श्रीमद्भारद्वाजकुल जलनिधि राका सुधाकरायमान,पद, वाक्य प्रमाण पारावार-पारीण महामहोपाध्याय बिरुदाङ्कित श्री त्यागराज मखिभिः (मन्नार्गडि श्री राजु शास्त्रीति प्रथित यशोभिः)सन् १८८८—१८९० यथाक्रमं विरचितं "सामस्वर विमर्शः", "कल्पित पाठखण्डन" श्चेति ग्रन्थद्वयं, तथा तिरुविश-नल्लूर् ग्राम कमलाकर कलहंस स्फुरदखण्ड पाण्डित्य परिमण्डित पण्डितमणि प्रकाण्ड श्रीवत्सकुल जलधि सुधाकरायमान पद वाक्य, प्रमाण पारावार पारीण श्री राम सुब्बा शास्त्रि महोदयैः सन् १८८८ विरचितः "सामवेद स्वरमालादि-तत्व विलासाख्यो" ग्रन्थश्च प्रामाणिकानां दर्शनाय यथा मुद्रितं अत्र प्रदीयते ।

★ ★ ★ ★

॥ शुभमस्तु ॥ ॥ शिवाभ्यां नमः ॥ ॥ शुभमस्तु ॥

★

सामस्वर विमर्शः

"देवेशं करुणासिन्धुं सेवे शङ्करमादरात् ।
ससर्वमङ्गलं सर्वमङ्गलानां समृद्धये" ॥

★ ★ ★

ओं "स्वाध्यायोऽध्येतव्यः" इति विधिना स्वाध्यायाध्ययनं तावत् विधीयते। स्वाध्यायशब्दस्य च स्वश्चासावध्यायश्चेति व्युत्पत्या, स्वकीयशाखा अर्थः। स्वकीयत्व स्वीय पितृपितामहादिभिः अध्ययनानुष्ठानाभ्यां परिगृहीतत्वम्। अध्ययनकरणिका स्वाध्यायोद्देश्यका भावना प्रवर्तनाविषय इति तस्य वाक्यस्य अर्थे वर्ण्यमाने उद्देश्यविशेषणस्य स्वकीयत्वस्य "ग्रहं संमार्ष्टि" इत्यत्र उद्देश्य

विशेषण ग्रहैकत्ववदविवक्षापत्या स्वकीय शाखाया इव शाखान्तरस्यापि अध्येयत्वापत्तिरिति न चोद्यम् ।

"अध्वर्यु वृणीत" इत्यत्र अध्वर्यु वरणेन संस्कुर्यादिति यथाश्रुतार्थे तदेकत्वस्य अविवक्षाप्रसक्तावपि वरण संस्कार विध्यन्यथानुपपत्या वृतोऽध्वर्युः कर्माणि कुर्वीतेति कल्प्यमाने वाक्ये उपादेय गतत्वेन अध्वर्यु निष्ठैकत्वसंख्यावत् "उपयुक्तस्य उपयोक्ष्यमाणस्य वा संस्कार" इति न्यायात् अत्रापि अध्ययन-संस्कृतेन स्वाध्यायेन प्रयोजनवदर्थज्ञानं भावयेदिति कल्पनीयवाक्ये उपादेय-गतत्वेन स्वत्वस्य विवक्षायाः अवश्यं भावात् ।

एवं च सति यथा पितृ पितामहादिभिः गुरुमुखोच्चारणानुच्चारणलक्षणाध्ययनेन तत्तद्गुरुमुखात् गृहीतं अध्यापितं च, यथा च स्वपितु स्सकाशात्स्वयमधीतं अध्यापितं च इयन्तं कालं तथाविधं अनादिकालमारभ्य अविच्छिन्न संप्रदायागत पाठं अन्यथा कृत्वा स्वयं यत्किंचिल्लक्षण ग्रन्थे स्वाभिमतार्थकतया लक्षणवाक्यं किंचिदस्तीति तत्प्रमाणीकरणेन साम्नां अन्यादृश पाठ कल्पनं भवदीयं छन्दोग-साधुजनमानसं नाधिरोहति। तदपि लक्षणवाक्यं निरूप्यमाणं प्राचीनपाठस्यैव अनुगुणं भवति।

किंच, लक्ष्य संस्कारकं लक्षणं निश्चितलक्ष्यानुरोधेनैव प्रवर्तनीयम्, न तु, लक्षणानुसारेण लक्ष्यं शोधयितव्यम् । अन्यथा "देवासश्चक्रमा वयमि" त्यादौ "आज्जसेरसुक्" इति लक्षणेन छान्दसः असुगागमः दृष्ट इति, "भद्रं कर्णेभिः शृणुयाम देवाः" इत्यादावपि "देवास" इत्येव प्रयोक्तव्यतापत्तेः । छन्दसि

दृष्टानुविधिरिति चेत्, अत्रापि यथा दृष्टं सांप्रदायिक पाठ एव अभ्युपगम्यताम् । शौनक स्मृति, द्राह्यायण सूत्रादि लक्षणवाक्यानां च प्राचीन पाठानुगुण्यन्तु, तद्व्याख्यानभूत माधवाचार्यसूक्ति, धन्वि प्रभृति व्याख्यानैः आमूलाग्रं परामृष्टैः स्फष्टीभविष्यति विदुषाम् । किंच =

"येनास्य पितरो याताः येन याता पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति ॥" इति

स्मृतिवचन प्रामाण्यात्,पित्र्यध्यापित सामाध्ययनमेव पुत्रादिभिः अध्यापनादिना परिपालनीयम् । न च, पित्रादिभिः कदाचित् शास्त्रनिषिद्धमार्गः अनुसृतश्चेत् सोऽपि अनुसर्तव्य इति वाच्यम् । "सतां मार्ग" इति विशेषणेन तद्व्यावृत्तेः । ऋक्पाठ विषये च प्रतिवेदं अध्यापयितॄणां प्रवचन, संप्रदायानुसारेणैव पाठः कर्तव्यः । अत एव "अग्निमीड" इत्यस्यां ऋचि "ई"कारे स्वरितत्वं याजुषवद्ध्रुचयोः पाठे समुपलभ्यते । अस्माकं तु सामशाखिनां =

"एकोदात्तात्परस्वारः प्रचयश्चोच्चवद्भवेत् ।
सर्वे च शिष्टाः स्वरिताः स्वर्यन्ते सामशाखिनाम्" ॥ इति

वचनानुसारेण "ई" कारः उदात्तवत्पठ्यते ।

एवं "शित्रकोदात्त" स्थले "आदित्प्रत्नस्य रेतसः" "इमं स्तोममर्हते-जातवेदसे" इत्यादौ ऋग्यजुःपाठापेक्षया वैलक्षण्येनैव पाठः संप्रदायागतः "अनेकानां उदात्तानां अनुदात्तः परो यदि । शित्रकं तं विजानीयात्" इत्यादि वचनात् ।

"अत एव दीप्तां उदात्ते जानीया द्दीप्तां च स्वरिते विदुः ।
अनुदात्ते मृदु ज्ञेया गान्धर्व श्रुति संपदः ॥" इति,

नारदशिक्षा वचनस्य महर्षितुल्येन भट्टशोभाकरेण साम व्यतिरिक्ते श्रुतिद्वयं प्रवर्तत इति अवतरणिका कृता संगच्छते ।

तथाच, उक्तश्रुति द्वयं सामवेदीय ऋक्पाठ एव, नत्वन्यत्र, "गान्धर्व-श्रुति संपद" इति वावयशेषात् । तस्य हि एवं व्याख्या, गान्धर्व श्रुतेरभावेऽपि तत्सदृश स्वर इत्याह। स्वर संपदः एताः ऋगादिविषये। तस्मात् ऋक्पाठेऽपि यथा संप्रदायमेव रमणीयो भवतीति सिद्धम् ।

श्रीमच्चम्पक काननाख्य नगरी मध्याग्रहारोत्तमे
वास्तव्यस्त्विह वास्तवार्थ रसिकः शास्त्रार्थ सारं विदन् ।
★ श्रीमद्वेङ्कटराम सामगवर श्रौतीन्द्रपक्षस्त्वयं
संक्षोदक्षम इत्यमंस्त महतां त्यागाधि राजाध्वरी ॥

★ ★ ★ ★

शिवाभ्यां नमः । श्रीमते मेधादक्षिणामूर्तये नमः ॥

⊗

॥ कल्पित पाठखण्डनम् ॥

★ ★ ★

अथ केचित्, सामसु विप्रतिपद्यमानाः प्राचीन नवीन पाठयोः कतरः श्रेयान् ? इति मामनुयुञ्जते ।

★ पूज्यश्री अस्मत्पितामहाः

तत्र =

"नव्यन्तु पाठं न कथञ्चिदाद्रिये प्राचीनपाठन्तु यतोऽध्यगीष्महि ।
अस्मिन्ननूचानकुले महत्तमाः अध्यापिपन् लक्षण वेदनेन नः" ॥

लक्षणेति = सामतन्त्र, ऋक्तन्त्र लक्षण ज्ञानेनोपलक्षिता, इत्यर्थः। न आद्रिय इति=तदध्ययनाय न प्रवर्ते इत्यर्थः। तथापि तादृशपाठशीलान् नोदासहे। यद्यपि "हऽ०" "हिं" इत्यादि गानाङ्गभूत स्तोभकृत गान वैलक्षण्य सद्भावोऽस्ति तथापि, एकदेश विकृत न्यायेन तत्तत्स्तोभ घटित "राजनादि" साम्नां तदेवेदं सामेति प्रत्यभिज्ञानात् साम भेदो न प्रसज्यत इति अर्वाचीनैः अस्मदीयैः अधीयमानस्य साम्नः नानौचित्यग्रहः ।

अत्र दृष्टान्तमाह

(१) द्रमिडान्ध्र विभेदेन याजुर्वेदिक पाठवत् ।
दाक्षिणात्यौत्तरीयाणां पाठौ साम्नां व्यवस्थितौ ॥

यथा यजुर्वेदे "अम्भस्यपारे" इति प्रश्नादौ आन्ध्रपाठो द्रमिड पाठश्चेति द्वौ पाठौ संप्रतिपन्नौ । नह्येकपाठाध्येतारः पाठान्तराध्येतॄन् अपवदन्ति, तद्वदिति भावः ।

ननु, ऋक्स्वरादि विभ्रंशः प्राचीनपाठे भवेत् साधुत्वग्राहक लक्षणा-परिज्ञानादित्याशङ्क्याह =

छन्दो ग्रन्थ ऋचो या याश्चाम्नाताः तथोत्तरा ग्रन्थे ।
तासां च यथर्चस्वरभाजां साम्नां च सौवरं तत्वम् ॥
वैय्याकरण निपुणाः निर्धारयितुं न पारयन्ति न हि ।
अत एव स्वर तत्व च्युति शङ्का न क्वचिदमीषाम्" ॥

छन्दो ग्रन्थे = प्रकृत ऋक्ग्रन्थे, यथा "अग्न आयाहि वीतय" इत्यत्र "अग्ने" इत्यस्य पदात् परत्वाभावेन आष्टमिकाऽनुदात्तत्वाप्रसक्तौ षाष्ठं आमन्त्रितायुदात्तत्वम् । "आ" इत्यस्य उपसर्गश्चापि अभिवर्ज्यम्, इति आद्युदात्तत्वं, "याहि" इत्यस्य तिङन्तत्वेन "तिङ्ङतिङ" इति निघातः । "वीतय" इत्यस्य मन्त्रे "वृषे ष प च म न वि द भू वी रा उदात्ताः" इति क्तिन्नन्ततया "ञ्णि" इत्यादिः नित्यमिति अप्राप्ताद्युदात्तत्व बाधकतया उदात्त विधानात् अन्तोदात्तत्वमिति पदस्वरः ।

संहिता विवक्षायान्तु "ग्ने" इत्यस्य उदात्तादनुदात्तस्य "स्वरित" इति, स्वरितत्वस्य "नोदात्त स्वरितोदयम्" इति निषेधेन शेषनिघात स्वरः । "या" इत्यस्य, "उदात्तादनुदात्तस्य स्वरितः" इति वेदान्तरीयपाठवत् इह न भवति। अत्र किल सौत्रः श्लोकः =

एकोदात्तात्परः स्वारः प्रचयश्चोच्चवद्भवेम् ।
सर्वेऽवशिष्टाः स्वरिताः स्वर्यन्ते सामशाखिनाम्" ॥

इति रीत्या छन्दस्थानां उत्तरासां च ऋचां स्वरतत्वं वैय्याकरणैः अनायासेन निश्चेतुं शक्यम् । एतद्ज्ञानं च सर्ववेद पार्षदेन व्याकरणेन विना न लभ्यम् । एतेन "ऋक्स्वरवदि" ति सामतन्त्रेण ऋक्स्वरवत् सामिकस्वरो भवतीत्यर्थकेन यथर्च स्वर परिज्ञानमपि तेन विना न तरां संभवति ।

यथर्चस्वरो यथा = गवां व्रतोत्तरे साग्नि =

2 1 0 2 0 1 0 2
अग्नि मीडे पुरो हितमित्यादि ।

एवमृचां सर्वासां यथर्च स्वरवत् साम्नां च स्वरतत्व निर्धारणं सामान्य-शास्त्रभूत व्याकरणेनैव लभ्यम् ।

नहि, यथा "सुब्रह्मण्या" निगदे स्वरविशेषपरिज्ञानाय, "अर्थ निर्वचनमुच्चान्तम्" इत्यादि सूत्रैः भगवता द्राह्यायणेन यत्नः कृतः । तथा, ऋचां स्वरपरिज्ञानाय, विना व्याकरणं किंचिल्लक्षणमस्ति । यथर्च स्वरशून्यानां सामतन्त्र लक्षणैक वेद्यानां साम्नां तु कथंचित् सामतन्त्रपरिज्ञानमुखेन स्वरतत्व ज्ञानं संपाद्यम् । न हि सामतन्त्रस्य सर्वात्मना अर्थपरिज्ञानं अन्यूनानतिरिक्तार्थविषयकं कस्यचित् इदानीन्तन मानुषस्य संभवति ।

ननु, नव्यपाठस्येव कल्पितपाठस्यापि प्रत्यभिज्ञानं, अतः तस्य कथं अनुपादेयता ? इति चेत्, अत्र ब्रूमः । कल्पित पाठो नाम उत्तरोत्तर, नीच, मात्राकाल विशेषादि विशिष्ट एव, न तु तच्छून्यः ।

तस्य अकल्पितत्वेन अस्मदिष्टत्वात् । तथाच न तस्य मन्त्रत्वम् ।

"तच्चोदकेषु मन्त्राख्य" इति जैमिनीय सूत्रेण अभियुक्तानां मन्त्र,पद, वाच्यत्व प्रकारक प्रसिद्धिविषयत्व रूपत्वेन तस्य तदभावात् न तरां च सामत्वम् । मन्त्रत्व, समानाधिकरण गीतित्वस्यैव तथात्वात् । अत एव न नव्यपाठ-प्रतिबन्दी कल्पितपाठे कर्तुं शक्या ।

तस्मात्, कल्पित पाठः स्वप्नेऽपि न स्मरणीयः सुधीभिः ।
दोषान्तराणां बहुलं उपलम्भादपि तथा ।

तद्यथा = "अग्न आयाही" ति प्रथम साम्नि "वचुविश्वावे" दिति सूत्र लेखनं असङ्गतम् । तत्र लक्ष्य संस्कारकत्वाभावात् । तत्सूत्रस्य हि विश्ववार संघातान्तस्थ वकारादि वर्णस्य नीचीभावो भवतीत्यर्थः ।

(२) "आइशीयवस्व," "आइन्द्र वज्र," इतिप्रकृत साम्नि गृणानोहे"ति विश्ववार संघात सद्भावेऽपि, वकरादिरूप निमित्ताभावादिति ।

(३) "वात्रतुरे" साम्नि च "इओह चुनीचानामि"ति सूत्रस्य लेखनं अयुक्तम् । तस्यहि पदान्तात्परं हकारादि नीचमुच्चवत् वर्तत इत्यर्थः ।

हरीणाऽ३म् । नवोऽ२ हिरण्य नेमयः । वाजेऽ२ वाजेऽ२ हवाऽ२ महेऽ३ इति, एतत्सामस्थ "हरीणामि" त्यस्य पदान्तात् परस्य हकारादेः नीचस्य अभावेन उक्तोद्देश्यतावच्छेदकानाक्रान्तत्वात् । स्वत एव यथर्च स्वरेणाद्युदात्तत्वात्तत् ।

तत्रैव साम्नि "आ इन्द्रं वज्र" इति पर्वणः द्व्यक्षरोच्चत्वलेखनं अयुक्तम् । "ऋक्स्वरवदि" ति सूत्रेण इन्द्रशब्दाकारस्य नीचत्वसिध्देः ।

न च "उदात्ता" दिति सूत्रप्रवृत्तिः इह शङ्कया नीच परत्वाभावात् । अत एव " वार्वतुरे गीथाद्यं प्रथमोच्चं मा गायताम् " इति फुल्ल सूत्रे प्रथमोच्चत्वानुवादः संगच्छते ।

(४) "अग्न आयाहि" इति द्वितीयसाम्नि "त प्रथमो रोह" इति सूत्र लेखनं अनुचितम् । तदाकांक्षित विधिवाक्यानुपन्यासात् । तद्धि, "रोह" संज्ञाविधायकम् ।

तच्च संज्ञावद्विधि वाक्येनैकवाक्यतामापद्यैव लक्ष्यसंस्काराय भवति । नतु साक्षादेव ।

वि—2

यथा व्याकरणे "वृद्धिरादैच्"इति सूत्रं "वृद्धिरेची" त्यनेन ।

(५) बृहति साग्नि, सू ऽ उ आ वा ऽ २ ३ ४ । "ता" इत्यत्राकारस्य वृद्धतया गीयमानस्य " हतिकृष्टादि " ति फुल्लसूत्रेण सिद्धसाधुभावस्य तत्रैव सूत्रे "योनौ नेति" भाष्यावयवमिव कल्पयित्वा अवृद्धतया पाठकल्पनं साहसमात्रम् ।

अथैताः तिस्रः संहिताः भवन्ति । "देवहूरेका, "वाक्यबहूरेका," "अमित्रहूरेका" इति संहितोपनिदि संहिता त्रैविध्यं प्रतिज्ञाय देवहू संहितां महाफलत्वेन प्रशस्तां उपास्यतया अभिधाय तदितरयोः संहितयोः विपरीत-फलकतया त्याज्यताभिधानात् ।

देवहूसंहिताया एव प्रयोक्तव्यत्वं, उपास्यत्वं चेत्यवगम्यते । एतच्चार्चिक सहिताविषयमिति भाष्ये माधवीये प्रथम खण्डे स्फुटम् । एवं द्वितीय खण्डोक्त साम संहितास्वपि देवहूरेकेत्यादि पूर्वखण्डोक्त संहितात्रैविध्यं तत्फलं चाप्यस्ति । तदुक्तं भाष्ये =

"इह पूर्वस्मिन्खण्डे आर्चिक संहिता प्रयोगविधिः सम्यगुक्तः
तदनन्तरं गान संहिता विधिः वक्तव्यः
अत्र गानविधावपि स एव उक्त प्रयोग विधिः सर्वेऽपि द्रष्टव्य"इति ।

एवं च, प्राचीन नवीन पक्षीयावुभावपि सामानि गापयित्वा तद्गानयोः मध्ये कतरस्य देवहूत्वं, कतरस्य क्लृप्ति, विक्रन्दित रूपामिलहूत्वादिकं इति सदस्यैः विशेषविद्भिः परीक्ष्यते चेत् तत्वं स्फुटीभविष्यति ।

एवं, "वाचोवृत्तिं व्याख्यास्यामः" वायु मूर्च्छश्वासी भवति, वायुः अवमस्मिन्काये मूर्च्छति, अटति, इत्येषोऽर्थः। "हाः कण्ठे", तालुनिश्च्ये", "अवोः पूः, मूर्धनि पटौ"। "अथातः ह्रस्व, दीर्घ, प्लुत मात्राणि अक्षराणि व्याख्यास्यामः" इत्येवं रूपाणां, शाकटायण व्याकरणीय प्रतिज्ञाप्रतिपादक वर्णोत्पत्ति प्राक्कालिक श्वासोत्पत्ति प्रतिपादक, देहान्त वायु संचार प्रतिपादक, तत्तद्वर्णोत्पत्तिस्थान प्रतिपादक, मात्रालक्षण प्रतिज्ञा प्रतिपादक, सूत्राणां तत्तत्प्रदेशेषु उपन्यासः निरर्थकः मूढजन व्यामोहन प्रयोजनश्च। सर्वथापि प्रतिज्ञा सूत्राणां अनुपयोगात् तत्तद् ग्रन्थेषु वक्ष्यमाणार्थे शिष्यावधान एव तदुपयोगादिति।

"मानोहृणीथा इति ऋच्यधीते तृतीयपादे नकुतोऽस्ति गानम्।
पृच्छन्तमेवं प्रति किं ब्रवीतु निर्धार्य विद्वानपि लक्षणज्ञः॥
व्याकृति प्रातिशाख्याद्यैः विरुद्धं लक्षणैः क्वचित्।
वेदेषु दृश्यते लक्ष्यं तत्र का गतिरिष्यते॥
अतः संप्रदाय एव शरणीकरणीय इति भावः =

तथा गुरुमुखानधिगत स्वकल्पित वेदस्यापि अनुपादेयत्वं इत्याह =

पाठोनाचार्य वक्त्रादयमिह विदितः स्वात्मनैव प्रक्लृप्तः
स्वप्ने पित्तादि दोषात् स्वयमधिगतवद् ग्राह्यतां नैति सद्भिः।
लोकद्विष्टो हि पन्थाः त्रिदिवगतिफलः शास्त्रदृष्टोऽपि न स्यात्
श्रेयस्कामैः कदध्वानुसृतिगतमतिः सज्जनैः वर्जनीयः॥
॥ इत्यलमधिकेन ॥

चम्पकारण्य वास्तव्य त्यागराजाध्वरी सुधीः ।
अनुयुक्तवतां पुंसां इत्थमुत्तरं मभ्यधात् ॥

उत्फुल्लनील नलिनोदर सोदर श्रीः
उत्कूल सान्द्र करुणाभरणान्तरङ्गः ।
आभीर वामनयना नयनामृतांशुः
आनन्दमाकलयतां मम राजगोपः ।

★ ★ ★ ★

॥ भट्टश्री नारायणशास्त्रिभिः कृता विज्ञापना ॥

आर्याः छन्दोग शिखामणयः !

इहकिल कतिपय शरद्भ्य आरभ्य सामसु प्रात्नं प्रहाय, नूत्नं कमपि पाठमाकल्प्य, सर्वतः प्रचारयितुं अमुं अतीवतरां आदधति यतनानि कतिचित् इत्यस्ति सामगोष्ठीषु असौ घण्टाघोषः । स एष पाठः सुतरां अनभ्युपेय एव सामलक्षणवेदिभिः इति सकल विबुध संसदवतंसितवचसः ब्रह्मश्री महामहोपाध्याय श्रीत्यागराज मखिराज प्रभृतयः महान्तः विद्वांसोऽपि स्व स्व हृद्य-प्रकाशकान् कांश्चन प्रबन्धान् अनुसृतप्रमाणं प्राणैषुरितीदमपि तथैव सुनिश्चप्रचम् ।

तथापि जाग्रत्सु तेषु प्रबन्धेषु सर्वथा अनभ्युपयत्सु च, एनं समधीत-समग्र सामलक्षणेषु सदुर्लभेषु च सुतरां इमं अधिजिगांसमानेषु अभिजातेषु

कथमपि कांश्चित् अवलम्ब्य, क्वचि त्क्वचित् अनधिगत सामलक्ष्य व्यवस्थान् याजुषान्, आत्त लौकिक गानमात्र प्रावीण्यान् गायकांश्च स्वपाठ प्रामाण्य प्रतिख्यापयिषया तानेव प्रतिभुवो भावयन्तः तत इतः तदर्पिताः प्रशंसा-पत्रिकाश्च प्रदर्शयन्तः परितश्चोलान् परिभ्रमन्ति ते। किमेभिः, आत्मगोष्ठी-मात्रश्लाघनीयैः रोमन्थ मन्त्रैः।

तदिमान् अयमहं अभ्यर्थये प्राञ्जलिः, प्रमाणयन्तः कतिचन प्रभून्, पण्डितमणीन् वा सामतत्व पारदृश्वनः, प्रकटितचराणां प्रबन्धानां सप्रमाणोपबृंहणं आधाय समाधानानि प्रकटं आदधतां प्रबन्धरूपान् लेखानेवामी ॥

इति
सहृदय समुदायदासः
भट्टश्री नारायणशास्त्री

★ ★ ★ ★

तिरुविशनल्लूर् ब्रह्मश्री रामसुब्बाशास्त्रि प्रणीतः

॥ "सामवेद स्वर मात्रादि तत्वविलासः" ॥

★ ★ ★

शुभमस्तु ॥

रामं मेघश्यामं श्रितजनकामं दिशन्तमभिरामं।
भीमं भीमतमानां भजेम सीमातिलङ्घि महिमाब्धिम् ॥

□श्रीमद्वेंकटराम सूरिमणिना श्रीसामवेदाश्रितो
मार्गो यः प्रथितः पुरातनतमः संपाठितः सांप्रातम् ।
सोऽयं लक्षणशास्त्रसारविदुषा श्रीरामसुब्बाख्यया
ख्यातेनापि महीसुरेण पटुतां नीतः प्रमाणाध्वना ॥

★ ★ ★

साम्नि, क्रुष्ट, प्रथम, द्वितीय, तृतीय चतुर्थ पञ्चम, षष्ठ संज्ञा सप्त स्वराः स्वीकार्याः । तद्योऽसौ क्रुष्टतम इव साम्नः स्वरः तं, देवा उपजीवन्ति । योऽवरेषां प्रथमः, तं मनुष्याः । यो द्वितीयः, तं गन्धर्वाप्सरसः । यस्तृतीयः, तं पशवः । यश्चतुर्थः, तं पितरः, येचाण्डेषु शेरते । यः पञ्चमः, तं असुर रक्षांसि । यो अन्त्यः तमोषधि वनस्पतयः, यश्चान्यज्जगत् इति "सामविधान ब्राह्मणे" प्रथम खण्ड वचन-प्रामाण्यात्, तेषां सप्तानां स्वराणां मध्ये एकैकोऽपि स्वरः उच्च, उच्चतर उच्चतम-भेदेन त्रिविधः। "योऽसौ साम्नः क्रुष्टतम इव स्वरः" इत्युदाहृत ब्राह्मणवाक्ये क्रुष्ट-पदोत्तर "तमप्" प्रत्ययेन क्रुष्टतम प्रतियोगिनः क्रुष्टतरस्य तत् प्रतियोगिनः, क्रुष्टस्य च सत्वावगमात् ।

न च, क्रुष्ट स्वरस्य "क्रुष्टतम" इति "तमप्" प्रत्यय वलेन त्रैविध्यावगमेऽपि प्रथमादि स्वराणां प्रत्येकं प्रथम, प्रथमतर, प्रथमतम भेदेन त्रैविध्ये किं मानमिति शङ्क्यम् । लिङ्गस्य पूर्वत्वात् । चोदनाशब्द सामान्यात् एकेनापि निरूप्येत । यथा "स्थालीपुलाकेने" ति पूर्वतन्त्रीयसप्तमाध्यायचतुर्थ-पाद सूत्र सिद्धन्यायेन, यथा स्थालीगतानां पुलाक द्रव्याणां एकस्य मर्दनेन

□ पूज्यश्री अस्मत्पितामहाः

पाक परिज्ञाने सति तत्सहचरितानां अन्येषामपि स्थालीगत पुलाक द्रव्याणां पाक-परिज्ञानवत् सप्तस्वराणां मध्ये एकस्य क्रुष्टस्य क्रुष्टतम इव साम्नः स्वरः इति "तमप्" लिङ्गनिर्देशेन मन्द, मध्य उत्तम भेदेन त्रैविध्य सिद्धिवत् क्रुष्ट सहचरितानां प्रथमादि स्वराणामपि त्रैविध्यसिद्धेः निष्प्रत्यूहत्वात् ।

पूर्वतन्त्र सूत्रस्य अयमर्थः =

एकस्यां दर्श पूर्णमास विकृतौ, "सौर्येष्टौ" "प्रयाजे प्रयाजे कृष्णलं जुहोति" इति लिङ्गदर्शनस्य प्रयाजहोमानुवादेन कृष्णलविधायकस्य पूर्वत्वात् दर्शपूर्ण-मासतः सौर्येष्टौ प्रयाजादि इतिकर्तव्यतातिदेश ज्ञापकत्वात् प्रयाजाद्यतिदेशवत् सर्वास्वपि दर्शपूर्णमास विकृति याग भावनासु, तत्तश्चोदनाशब्द बोधितासु सौर्येष्टि-भावनाया इव इतिकर्तव्यताकाङ्क्षा सामान्यात्, एकेनापि सौर्येष्टि प्रकरणस्थेन विकृतौ प्रकृतिधर्मातिदेशः ज्ञापकेन सौर्येष्टि भावनावत्, सर्वाऽपि दर्शपूर्णमास-विकृतिभावना निरूप्येतेति कर्तव्यताविषये निराकांक्षीक्रियेत । यथा एकेन स्थालीगतविज्ञात पक्वभावेन पुलाकेन स्थालीगतानि सर्वाण्यपि पुलाकद्रव्याणि विज्ञात पक्व भावानि भवन्ति तद्वदिति । एतेन क्रुष्टादि सप्तस्वराणां प्रत्येकं अवान्तर भेदो नास्तीति भ्रान्तोक्तिः अपास्ता । क्रुष्टतम इवेति "तमप्" प्रत्यय-स्थालीपुलाकन्यायाज्ञान विजृम्भितत्वात् । तदेतत् क्रुष्टादि सप्त स्वराणां प्रत्येकं बहुधा भिन्नत्वं श्री विद्यारण्य स्वामिभिः सामवेदीय, प्रकृति ऋग्भाष्ये उपोद्घात निरूपण प्रकरणे सामशब्द वाच्यस्य गानस्य स्वरूपं ऋगक्षरेषु क्रुष्टादिभिः स्वरैः अक्षर विकारादिभिश्च निष्पाद्यते । क्रुष्ट, प्रथम, द्वितीय, तृतीय, चतुर्थ, पञ्चम, षष्ठश्चेति एते स्वराः । तेच, अवान्तरभेदैः बहुधा भिन्नाः इत्यादिना उक्तम् ।

तेचेति, क्रुष्टादिस्वराननूद्य बहुधा भिन्नाः इत्यनेन तेषां प्रत्येक बहुविधत्वाभिधानात्। एतेन षड्जादय एव क्रुष्टादि सप्तस्वराः भवन्तीति केनचिदुक्तं अपास्तम्। सायणीये सामविधान ब्राह्मणभाष्ये "सप्त स्वरा" ये यमाः ते पृथग्वेति" शौनकवाक्यार्थ विवरणावसरे "सप्त स्वराः"इत्यस्य अयमर्थः। ये यमाः इत्युक्ताः सप्त क्रुष्टादयः स्वराः ते षड्जादिभ्यः अन्यत एव बोद्धव्याः इतिग्रन्थे, पृथग्वेति "वा"कार विवरणरूपेण अन्य एव इति, एवकारेण क्रुष्टादीनां षड्जाति स्वरत्वपक्षे अनिर्भरस्य तेषां, षड्जादि भिन्नत्वपक्षे अत्र ऐदम्पर्यस्य च अवगमात्।

क्रुष्टादीनां पूर्वस्वरस्य उत्तम, मध्यम, मन्देषु यो मन्दस्वरः उत्तरस्वरस्य उत्तम, मध्यम, मन्देषु यः, उत्तमस्वरः तयो र्गानकाले एकाकारतयैव भानम्,न तु उच्चनीच भावेन। क्रुष्टादीनां "उत्तरोत्तरस्वरस्य पूर्व पूर्व स्वरापेक्षया नीचत्व व्यवहारः,पूर्व पूर्व स्वरूपीय उत्तम,मध्यमरूप अवान्तरांशापेक्षया उत्तरोत्तरस्वरीय उत्तम, मध्यम, मन्दांशानां सर्वेषां नीचत्वाभिप्रायकः।

सामविधान सायणीय भाष्ये " अनन्तरश्चात्र यमोवशिष्टः " इति शौनकवाक्य विवरणावसरे "अनन्तरः" इत्यस्यायमर्थः एषु यमेषु, अनन्तरः अव्यवहितो यमः, सोऽवशिष्टः अस्पष्टविशेषः इत्यर्थः। विप्रकृष्टो यमः भेदेन ज्ञातुं शक्यते।

तेन " सन्निकृष्ट " इति ग्रन्थेन उत्तर स्वरीय उत्तमांशस्य पूर्वस्वरीय मन्दांशस्य ब्राह्मणाधम क्षत्रियोत्तमयोरिव अव्यवहिततया अस्पष्टावभासत्व कथनात्, पूर्वस्वरीय उत्तम, मध्यमांशाभ्यां उत्तरस्वरीय

सर्वांशानां उत्तम, मध्यम ब्राह्मणाभ्यां, उत्तम, मध्यम, अधम क्षत्रियाणामिव-विप्रकृष्टत्वेन स्पष्टावभासत्व कथनात् ।

वस्तुतस्तु, उत्तरोत्तर स्वरस्य पूर्व पूर्व स्वरापेक्षया नीचत्वव्यवहारः औत्सर्गिकः, न तु सार्वत्रिकः । क्रुष्ट प्रथमयोः गानकाले उच्चनीच भावाप्रतीतेः = तथाहि, "मूषुत्वा" इति द्वितीये साम्नि ऊ, ऊ, वा, ऽ उ, इ, ॥ ऊ, उ इति वा "इ" इत्युत्तर ऊकारस्य क्रुष्टस्वरं सामगा वदन्ति । अग्न आ या हि वीतया, इत्यत्र, "तया" इत्यस्य प्रथम स्वरं छन्दोगाः कथयन्ति । तयोश्च गानकाले वैलक्षण्यं न प्रतीयत इति सर्वछन्दोगप्रसिद्धम् । नारदशिक्षायां, क्रुष्टाद्येकैक स्वरस्य प्रत्येकं बहुधा भिन्नत्वमपि दृश्यते

"अथातः स्वरशास्त्राणां सर्वेषां वेद निश्चयम् ।
उच्चनीच विशेषाद्धि स्वरान्यत्वं प्रवर्तते ॥"

इति प्रथम श्लोकेन । तस्य च इयं व्याख्या महर्षितुल्येन भट्टशोभाकरेण अति-प्राचीनेन कृता दृश्यते । अथ = सामसंहिताध्ययनान्तरं, अथ इति, संहिताध्ययनात्, स्वरशास्त्राणां, ऋग्यजुस्सामगानां, निश्चयं = सम्यक्प्रतिपत्तिं, वेद = "मया उच्यमानं जानीयात्" इति भगवान्नारदः शिष्यं प्रति आह । सामान्यभूताकारगत-स्वरः उच्चे उच्चविशेषे, उच्चतरे, उच्चतमे, नीचे, नीचविशेषे, नीचतरे, नीचतमे, स्थाने अभिव्यज्यमानः स्वरान्यत्वं = नानास्वरतां प्रपद्यत इत्याकारा व्याख्या । यत्तु, कश्चिज्जल्पति, उच्चतमं, उच्चतरं, उच्चं, मध्यं, नीचतमं, नीचतरं, नीचं इति क्रुष्टादि सप्तस्वराणां क्रमेण संज्ञेति, तन्न । कस्मिन्नपि इदानीं परिदृश्यमाने ग्रन्थे, क्रुष्टादि स्वराणां उच्चतमादि त्वदुक्तसंज्ञाबोधकवाक्यादर्शनात् । मध्यमिति शब्दस्यैव सामवेदीय स्वरग्रन्थेषु त्वदुक्ततृतीय स्वर संज्ञात्वस्य कुत्राप्यदर्शनाच्च ।

तत्र तत्र साम्नि "हिं" कारस्य प्रमाणप्रमितत्ववत् "हुं" कारस्य प्रमाण प्रमितत्वाभावेऽपि त्वदीय, "हिं" कार "हुं" कारयोः विकल्पः इति रोदनवत् तृतीय स्वरस्य "मध्य" इति संज्ञारोदनस्य त्वदीयस्य, पण्डितानां हास्यविश्रामस्थानत्वमेव ।

किंच, सामसु क्रुष्टादि स्वराणां मध्ये एकैकस्यापि स्वरस्य उदाहृतबहुप्रमाणवशेन बहुधा भिन्नत्वावगमेन यथा पूर्वैः अधीताः अध्यापिताश्च क्रुष्टादि स्वराः, तथैव इदानीन्तनैः पठनीयाः, न तु द्वितीया, तृतीयादि स्वराणां क्वचित् क्वचित् संप्रदायागतं गानकाले एकाकारत्व परित्यज्य इदानीन्तनेन भिन्नाकारतया कल्पिताः पठनीयाः ।

"तुम्बुरु, नारद, वसिष्ठ, विश्वावस्वादयश्च गन्धर्वाः ।
सामसु निभृतं करणं स्वरसौक्ष्म्यात् तेऽपिहि न कुर्युः"

इति छन्दोगमहर्षि वचन प्रामाण्यात् । करणं = स्वरादि शिक्षा क्रियते अनेनेति व्युत्पत्या शिक्षादि शास्त्रम् । निभृतम् = परिपूर्णकर लक्षणम् । अन्यत्पदं स्पष्टम्। यत्तु केनचित् सामवेदीय प्रथम स्वरस्य "धैवत" मिति संज्ञा, द्वितीय स्वरस्य "पञ्चम" संज्ञा तृतीय स्वरस्य "मध्यम" संज्ञा, चतुर्थस्य "गान्धार" संज्ञा मन्द्रस्य "ऋषभ" संज्ञा, अतिस्वार्यस्य "षड्ज" संज्ञा क्रुष्टस्य "निषाद, संज्ञा इति क्रमेण सामवेद स्वराणां संज्ञा विज्ञेया इति प्रमाणशकलं विनैव स्वबुद्धया निश्चित्य गन्थे मुद्रापितं च, तन्न ।

"यः सामगानां प्रथमः स वेणोः मध्यम स्वरः ।
यो द्वितीयः स गान्धारः ततृयस्त्वृषस्स्मृतः ॥
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत् ।
षष्ठो निषादः विज्ञेयः सप्तमः पञ्चमस्स्मृतः ॥

इति नारदशिक्षावचनरीत्या प्रथमस्वरस्य "मध्यम" संज्ञा, द्वितीय स्वरस्य "गान्धार" संज्ञा, तृतीय स्वरस्य "ऋषभ" संज्ञा, चतुर्थ

स्वरस्य "षड्ज" संज्ञा, पञ्चमस्य "धैवत" संज्ञा, षष्ठस्य "निषाद" संज्ञा, सप्तमस्य "पञ्चम" संज्ञा इत्येवंरीत्या प्रथमादि स्वराणां संज्ञा प्रतीत्या भवत्कल्पित-संज्ञानां नारदशिक्षा वचन विरुद्धत्वात् ।

यस्य वर्णस्य यावती मात्रा प्रमाणप्रमिता तस्य गानकाले क्वचित् क्वचित् न्यूना, अधिका च मात्रा भवत्येव । नतु तावत्येवेति नियमः कर्तुं शक्यते । "प्रत्यक्ष परोक्ष, क्षिप्र, चिर, न्यस्तोदात्त, कृष्टा कृष्टानां येन संस्वरेत् तत्कुर्या" दिति द्राह्माण सूत्र प्रामाण्यात् । लुप्तस्य अक्षरस्य प्रत्यक्षादीनां रूपाणां मध्ये येन रूपेण प्रणवं सदृशं उच्चरेत् तद्रूपं कुर्यात् । यदि लुप्तो वर्णः प्रत्यक्षः विकाररहितः स्यात्, तदा प्रणवेऽपि कुर्यात् । यदि ऊहादि विकारेण लुप्तः परोक्ष स्स्यात्, तदा प्रणवेऽपि परोक्ष एव स्यात् । दीर्घ प्लुतादेः अधिका मात्रा "चिर" मित्युच्यते । "न्यस्तो" नाम अनुदात्तः । "प्रसिद्धमन्यत्" इति उक्त सूत्रस्य "धन्वि" कृतव्याख्या । दीर्घ प्लुतादेः अधिका मात्रा "चिर" मित्युक्ता ॥ कल्प्त मात्रा-पेक्षया मात्राधिक्यं अस्ति उच्चारणकाले इति सिद्धम् । "क्षिप्र" मिति सूत्र घटक-शब्दस्य दीर्घ प्लुतादेः अल्प मात्रार्थ इति सिद्धयति । तेन मात्रायाः उच्चारण-काले न्यूनता अस्तीति सिद्धयति । मात्रा लक्षणग्रन्थे च मात्रां प्रस्तुत्य "प्रतिज्ञा खलु वर्तते" इति सूत्रं प्रवृत्तं अस्ति । मात्रा विषये प्रतिज्ञा = गुरुपरंपरागत मात्रा-स्वरूप धारणम्, वर्तते = अस्ति इत्येतत्प्रसिध्दं खलु, इति सूत्रार्थः "पञ्चविधं आचार्यकं नाम, "मुखं, न्यासः, करणं, प्रतिज्ञा, उच्चारण" मिति नारदशिक्षा वाक्यस्य व्यख्यानावसरे प्रतिज्ञापदस्य तद्व्याख्यातृभिः भट्टशोभाकरैः प्रतिज्ञा = गुरुपरम्परागत मात्रास्वरूप धारणमिति व्याख्यातत्वात् । तथाच, यत्र गुरुपरंपरया मात्रायाः न्यूनाधिकभावावधारणं तद्राहित्यावधारण च तत्र तथैव कार्यं, न तु, केवल मौढ्येन न्यूनाधिकभावं विनैव सर्वत्रोच्चारणं कार्यमिति सिद्धम् ।

★ ★ ★ ★


ग्रामे गेय, अरण्ये गेय, ऊह रहस्यानां, सप्रमाण शुद्धाशुद्धीय पट्टिका

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
१	वेयगाने यस्यत्यच्छंबरं (३.साम)	1 2 1 सुत आऽ २३:	1 2 1 सुतआ ऽ२३- (विसर्गलोपः)	सामतंत्रे-आन् (१५-१०-३, ४)
२	उच्चातेजा(३, ४, साम)	2 3 5 उग्रँशा ऽ२३४ र्मा ऋषभः पावमाने, आभीकेच (ऊहेच)	2 3 5 उग्राँशा ऽ२३४र्मा	स्तोत्रीयास्वपि-योनिवन्नि- होताभवति (सा-तं) श्यामण्विनि (५-४-१) ऊहसत्वे-ऐटते
३	उपोषुजातमप्तुरं–१ अर्षासोमद्यु-१-साम	1 2 इहा ऽ१(निधने)	2 इहा ऽ १- (पदपाठे- 3 2 1 2 इह-वृधे)	(सा-तं)उदात्तं (२-९-१०)


संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
४	इषेपवस्वधारया	उप् इही ऽ२३४५	उप्(परिभाषायांउचप्) (ईऽ३ही ऽ२३४५)	सा-तं (उप्-(७-११-६) आदिर्घोषे (४-१-३)
५	प्रसोमदेववीतये-२	वीऽ६ हई	वी ऽ६ होउ	सा-तं-एनाक्षरेतुङि(४-९-५ नेरि (११-१०-३)
६	पवस्वदेववीतये-२	भिरोजसा ऽ६ए	भिरोजसाऽ६ए-परिभाषायां	सा-तं-आत्वासहा-(१५-९-२)
७	सोमःपुना--१	पवे	पवाऽ२३-परिभाषायां	सा-तं-नन्दः (४-५-८)
	आरण्यगानो			
८	बृहत्साम-औहोइत्थामिद्धि	सातौवाजा-सूऽ२अर्वा-ऽ२३४	सातौवाजा-सूऽ२आर्वा ऽ२३४	सा-तं-तप्रथमोगेहः (१२-९-८)



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
९	हाउदिवि-महित्रीणा	ए—दिवी ऽ२३४५	दिवी ऽ२३४५ पदपाठे—दिवि	सा-तं-नचतु र्यहकाराघो —षादयः (१-१०-४) असाविसोमोअरु-निधने
१०	वाजसाम्नि. (अभीनव)	विविहो ऽ२ इविवि	विविहो ऽ२विवि	सा-तं-योविभ्यांहवयोः —स्तिबाहवोः (१३-११-१५)
११	रौहिणे- (इन्द्रन्नरोनेम)	किट् (द्विः—२)	किट्-द्वादश-१२- परिभाषायां-किचट्	लोम—सिक्षा— किट्कारएवच—
१२	महानाम्नि-इन्द्रन्धन	शूरो—योगो—इडा—	इडा ऽ२३४५	परिभाषायां सा-तं-पशु (२-१०-४)



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
१३	ऊहदशरात्रे तृतीयंक्रौञ्चे (अयंपूषा)	य.पञ्चचर्षणीरभी ऽ१–	यःपञ्चचर्षणीरभीऽ१	सा-तं-उदत्तात् (१-११-५) नौजेः (२-६-६) उदात्तं (२–९–१०
१४	अङ्गिरसांगोष्टे– अर्कपुष्पोत्तरे (मृज्यमान)	मृज्यमानस्सुहस्त्या	मृज्यमानस्सुहस्त्य–	ऋक्तंत्रे (अजुस्त्य) (५–४–७)
१५	आभीशवोत्तरे (तवाहँ)	नोबभ्रओ ऽ२३४ वा	नोबभ्रऊ ऽ२३४ वा	सा-तं-उद्धयमाइन्द्रे (१२-३-७) फुल्ले-अनुस्थं (१०-२-१०)



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
१६	चतुर्थंवैदन्वते- परिस्वानोगिरि	तुवंवा ऽ२३४ इ तुवंका ऽ२३४ मधुप्रा ऽ२३४ तमन्धा ऽ२३४	तुवांवा ऽ२३४ इ तुवांका ऽ२३४ म धूप्रा ऽ२३४ तमान्धा ऽ२३४	सा-तं-नधिनिदीर्घं (५-३-५) त्र्यामण्विनि (५-४-१) फुल्ले-दन्वतेच— अगिरिप्रभृतितिस्रः (५-१-४२,४३)
१७	धुरांसाकमश्वेषु (सर्वत्र)	अध्वर्यो-दोअन्धसाऽ३ः स्यमरुता ऽ३ः	दोअन्धस ऽ३ः स्यमरुत ऽ३ः	सा-तं-न्विस्थात्प्रणतञ्ज्यः (३-७-१) फुल्ले–ऊहगानेयोनिव — -त्स्वराः (८-५-१)
१८	आभीशवाद्यउत्तरेच- परीतोषि दैर्घश्रवसेच	भिरो ऽ२३४ वा- तोगोभिरो ऽ२३४ वा	भिरू ऽ२३४ वा तोगोभिरू ऽ२३४वा-	सा-तं-उद्वयमाइन्द्रे (१२–३–७) फुल्ले–अनुस्थं- (१०–२–१०)

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
१९	धर्मविधर्मणोः पवस्वसोममहान्	२१० २ महान्त्समुद्रा ऽ१ः २१० २ दित्रेपृथिव्याऽ१इ २१०२१०३ १११ दिवोधर्त्तासोऽ२३४५ २१० २ सत्येविधर्माऽ१न्	२१० २३ २ महान्त्समुद्राऽ१ः २१०२३ २ दित्रेपृथिव्या ऽ१इ २१० २१० दिवो धर्त्तासी– १११ ऽ२३४५ २१० २ सत्येविधर्मा ऽ१न्	सा-तं-नौजेः– (२-६-६) उदात्तं (२-९-१०) उदात्तात्(१-११-५)
	पवस्वसोममहेद	१ २०१ २ अश्वोननिक्ता ऽ१ः १०२०१०३ १११ प्रतेसोतारा ऽ२३४५ः १२१०३ १११ रसंमदाया ऽ२३४५	१ २०१ २ अश्वोननिक्ता ऽ१ः १०२०१० १११ प्रतेसोतारा ऽ२३४५ः १२.१२०३ १११ रसमदाया ऽ२३४५	,,

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयंशुद्धम्	प्रमाणम्
२०	अर्कपुष्पाद्यरयिष्ठयोः	स्तोलीयान्तेसकृत् 1 m 2 2 हुवेऽ२३-औऽ३होऽ३वा	स्तोलीयान्ते हवेऽ२३ (द्विः) m 2 2 औऽ३होऽ३वा (द्विः) परिभाषायामपि	अभ्यस्तान्ताः— पुष्पाद्यरयिष्ठयोः फुल्ले (८-९-१४) पूर्वार्कपुष्परयिष्ठयोः (९-८-४)
२१	ककुबुत्तरेयज्ञायज्ञीये	1 — 10 दुहा ऽ२नऊधर्दिवि 10 — 1 आपाऽ२च्छर्यन्धरुणं	10 — 1 दुहानऊऽ२धर्दिवि 10 — 1 आपृच्छियाऽ२न्धरुणं परिभाषायामपि	फुल्ले-ककुभिचतुर्थं (५-३-६७) स्वासुपुनादेवः (५-२-६१)
२२	ऊहसंवत्सरे गौङ्गवे- प्रसोमदेववी	2 1 5 मधो ऽ२३४वा	2 1 5 मधूऽ२३४वा	सा-तं-उद्वयमाइन्द्रे (१२-३-७) फुल्ले-अनुस्थं- (१०-२-१०)

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
२३	रयिष्ठे-पवस्वबाजसा रहस्ये-अष्ठेऽपदस्तोभेच	1 20 1 2 3 111 पवमानमहित्वनाऽ२३४५	1 20 3 पवमानमहित्वना 111 ऽ२३४५	1 20 3 2 पवमानमहित्वनाऽ१ ऋक्स्वरवत् (१-११-१) मानमहिप्रचयं
२४	एकाहे मारुते-एन्दुमिन्द्राय	1 द्वितीयेस्तोत्रीये-स्या	2 1 सिया (विकर्षः)	पुंसे-संकृष्टप्रकरणग्रहणात् सा-तं-यव्यून् (९-१-६) ऊहगाने योनिवास्वरा ३- इतिच.
२५	यज्ञायज्ञीये-देवोत्रोद्रवि	1 — 10 तँहोऽ२तारमध्वर 1 — 1 दधाऽ२तिरत्नंविध	1 0 0 — 1 तँहोतागाऽ२रमध्वर T 0 — 1 दधातिराऽ२रत्नंविध	फुल्ले-ककुभिचतुर्थं (५-३-६७) परिभाषायांच

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
२६	सदोविशीये-अभिसो-मासआ	1 201 2 1 पवन्तेमदियंमदं	1 201 21 पवन्तेमदियंमदं	शीयेनकृदँहत् फुल्छे (१०-६-१३
२७	अहीने ~~विलंबसौपर्णे~~-अस्यप्रत्ना	2 1210 2 1 अस्यप्रत्नामनुद्युतं	2 1210 21 2 अस्यप्रत्नामनुद्युतं- 1 21 / ईयइयाहाइ	सा-तं ऋक्स्वरवत्(१-११-१) शौतावुदात्तादुन्नीचे (१३-१-१)
२८	दैर्घश्रवसे-अभिसोमा	1 201 2 1 पवन्तेमदियंमदं	1 201 2 12 पवन्तेमदियंमदं	फुल्छे-शीयेनकृदँहत् (१०-६-१३)
२९	'शौक्ते-सखायआनिषी	1 3 2 वियंमदमभा ऽ१इ	1 2 2 2 वियम्मदमभा ऽ१इ	सा-तं-मात् (२-४-१)



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
३०	प्रतोदे-श्रीणन्तोगो	2 0 1 2 0 1 0 2 1 श्रीणन्तोगोभिरुत्तरं 1 2 0 1 2 0 0 1 0 परिस्वानश्चक्षसेदेवमादनः	2 0 1 2 0 1 0 2 1 2 श्रीणन्तोगोभिरुत्तरं 1 2 0 1 2 0 0 परिस्वानश्चक्षसेदेव- 1 0 2 मादनः	तरमित्यत्र रकारस्य मादनमित्यत्र-नकारस्य प्रचयत्वाच्चोचं
३१	गौङ्गवे-तवाहँसो	2 1 2 ग्रओं ऽ२३४ वा	2 1 5 ग्रऊ ऽ२३४ वा	सा-तं-उद्वयमाइन्द्रे (१२–३–७)· फुल्ले-अनुस्थं(१०-२-१०)
३२	सत्रे सन्तमिनि-पवमानस्यजि	2 1 2 0 1 0 रश्मिभिर्वाजसात	2 1 2 0 1 0 2 रश्मिभिर्वाजसात	सा-तं-नौजेः (२–६–५)



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
३३	रोहितकूलीये- प्वमानस्याजि	2 1 5 मरो ऽ२३४ वा	2 1 5 मरू ऽ२३४ वा	पूर्ववत् उद्गयमानुस्थं-
३४	अर्कपुष्पपोत्तरं रहस्ये- यशसि-पुनानस्सोम	2 1 0 2 0 0 अपोवसानो अर्षसि 2 0 1 0 2 1 2 1 दुहानऊधर्दिव्यमधुप्रियं	2 1 0 0 2 0 अपोवसानो अर्षसि 2 0 1 0 2 1 दुहानऊधर्दिव्य- 2 1 मधुप्रियं (सर्वत्र)	धस्सन्तनिनि फुल्छे (५-११-७) अन्यत्र धश्शब्दउच्चः
३५	प्रायश्चित्ते श्रुध्ये 1 0 0 — एनावोआ ऽ२ग्निम्	2 1 2 0 1 2 प्रियश्चेतिष्ठमरतिं 1 2 0 1 स्वध्वरंविश्वस्यदूतं	2 1 0 2 1 प्रियश्चेतिष्ठमरतिं 2 1 2 0 1 स्वध्वरंविश्वस्यदूतं	ऋक्स्वरवत्



संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
	1 —	1 2 0 1 21	1 0 2 1 2	
	प्रत्युवदाऽऽर्शि-	रियस्सचाउद्यन्नक्षतं	रियस्सचाउद्यन्नक्षत्रं	ऋक्स्वरवत्
		1 2 1 20 1	1 2 1 2 1021	
		रियस्यचसंभक्तेनग	रियस्यचसंभक्तेनग	
	10 —	210 2010 2 0	2T0 20 0 0 1	
	इमाउवाऽऽन्दि-	महे वसेशचीवसू-	महे वसेशचीवसूविशं	,,
		1 2	1 2 0T0020 0	
		-विशंविशं	जनन्नराचोदेथांसू	
		1 2 0100 200 1		
		जनन्नराचोदेथांसून्		
	1 0 —	1 0 210 0 2102 1	102100	
	अग्नेविवाऽऽस्वत्	व्यवाहनोऽग्नेरथीरध्वं	व्यवाहनोग्ने	,,
		1 0 2 100	2T02 100	
		सुवीरियमस्मेधे	सुवीरियमस्मेधे	

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
३६	रहस्ये शाक्वरऋषभे- पवस्ववाज-तृतीयायां	1 0 0 0 0 0 0 2 1 आएताएजाएभ्रिषआ	1 0 0 0 0 0 0 2 1 ताएजाएभ्रीएषआ	फुल्ले-भेचाकारान्तः- (१०-५-२३) द्राह्यायण श्रौतसूत्रे षाडक्तस्यानुष्टुप्सु २०-४-१३)
३७	अष्टेडपदस्तोभे-पवस्ववाज	1 0 2 0 1 त्वाँरिहन्तिधीतयः 1 2 1 0 2 1 हरिंपवित्रेअद्रुहः	1 0 2 0 1 2 त्वाँरिहन्तिधीतयः 1 2 1 0 2 1 2 हरिंपवित्तेअद्रुहः	सा-तं शौतावुदात्तादुन्नीचे (१३-१-१)

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
३८	अश्वव्रते–अभिवाजी	1 3 0 2 शिशुर्वाजी ऽ१ 1 2 1 2 0 1 परिस्वयंमेध	1 2 3 0 2 शिशुर्वाजी ऽ१ 1 2 1 0 परिस्वयंमेध	सा–तं नौजेः–(२–६–६) ऋक्स्वरवत्(१–११–१)
३९	द्विरिडपदस्तोभे– अभिप्रियाणि	2 0 3 2 रोचनन्दिवा ऽ१ः	2 0 1 2 रोचनन्दिवा ऽ१ः	”
४०	चतुरिडपदस्तोभे वृषामतीनां	2 0 3 2 विशन्मनीषिभा ऽ१इः 2 0 3 2 खियायवधया ऽ१न् 2 0 0 3 2 तेचारुमत्सरा ऽ१ः	2 1 2 0 1 2 विशन्मनीषिभा ऽ१इः 1 0 2 1 2 खियायवधया ऽ१न् 2 0 1 0 2 3 2 तेचारुमत्सरा ऽ१ः	”

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयं शुद्धम्	प्रमाणम्
४१	षडिडपदस्तोभे-पवित्रन्ते	1 2 0 अतस्ततनूर्न 20 0 3 2 रोहन्तितेजसा ऽ१	1 2 01 अतस्ततनूर्न 20 10 2 रोहन्तितेजसा ऽ१	ऋक्स्वरव त्
४२	अष्टेडपदस्तोभे धर्त्तादिवःपवते	1 2 1 रयन्नपस्युभिः 2 0 3 2 मनीषिभा ऽ१इः 2 32 हिशश्वता ऽ१ः	1 2 1 2 रयन्नपस्युभिः 2 9 1 2 मनीषिभा ऽ१इः 2 1 2 हिशश्वताऽ१ः	,,
४३	एकवृषे-अभिप्रव	21 20 120 वप्रसाअस्यपिन्विरे	21 0 2 0 वप्रसाअस्यपिन्विरे	,,

संख्या	स्थलनिर्देशः	गीयमानं अशुद्धम्	गेयंशुद्धम्	प्रमाणम्
४४	नित्यवत्सातीषङ्गसिमासु- पत्नवाजसातये	३ २ १ — १ भाती-जश्रीऽ२षाइ (सर्वत्र)	३ २ — १ तीजा-श्री ऽ२षाइ सर्वत्र	चत्वार्यूधः द्राह्या-श्रौतसूत्रे (२०-४-२०)
	उत्तरार्चिके	३ २ १ १ २ अभिऋतस्य ३ २ ३ २ रभिन्दशेकं	३ २ १ २ अभ्यृ ऽ३तस्य ३ २ ३ २ऽ रभिन्दशेकं	ऋति- ऋक्-तंत्रे (३-३-५) अनेकानामुदात्ताना

Among the four Vedas the Sāma Veda holds a prominent place. It is mentioned as one of his vibhutis by Gitacarya. **सामगानप्रियः** is one amongst several names of Isvara. Veda has been defined as a particular collection of Mantras and Brāhamaṇas. There are three kinds of mantras : **ऋक्, सामन्** and **यजुः**. Jaimini, the celebrated Sütrakāra of Dharma Mīmamsā, defines Sāma mantra as **"गीतिषु सामाख्या"**. Sāma mantra is a collection of sounds with a musical pitch sung either on Rks or Stobha. From times immemorial it has been handed down by a competent guru to a śiṣya. Those sung on Rks are called Rksāman, and those on Stobha are called **अनृक्सामानि** such as, for example, **प्रजापतेर्हृदयम्**. Stobha is a letter or a collection of letters having no meaning, on which a sāman is sung to complete the limited time prescribed for a sāman.

The Sāma Veda is renowned to have one thousand Sākhās, that is, rescensions. Patañjali, the author of the Mahābhāṣya, mentions it as such. Jaimini learned all the thousand ṣākhās from Vyāsācārya. Jaimini taught only one sākhā to each one of his disciples. Most of these ṣākhās are considered to have been lost, there being none to whom they have been handed down in regular traditional succession. Fortunately some ṣākhās are still to be met with in India. The Kauthuma sākhā is one amongst them ; it is practised in South India and in Gujarat. All the Rks upon which several sāmans are sung are collected in the samhitā also called Uttarārcika consisting of nine prapāṭhakas or chapters.

Brahmasri Ramanatha Dikshit, a scion of the famous Appaya Dikshitar who is mentioned as an incarnation of Siva, and the author of more than a hundredworks, isanerudite scholar of the Sāma Veda including all Lakśaṇa granthas connected with it. He is a repository of traditional knowledge of Sāma Veda. His knowledge in other branches of Veda and pratisakhyas is praiseworthy.

The present edition of the Kauthuma samhitā with **पदपाठ** and **ऊहोह्यगान** is an important addition to the extant Vedic literature. Sri Ramanatha Dikshit has written an elaborate preface which explains many abstruse matters connected with the Sāma Veda. Some misconceptions are wide among Vedic scholars. Some think that the Kauthuma samhitā is only a collection of Rks found in RkSamhitā and **ऊहोह्यगान** is not apauruṣeya, i.e., it has its origin in ṛśis or illumined souls. These contentions have been rejected with satisfactory replies that refute all objections which might be raised and establish the separateness of Sāma samhitā and the apauruṣeyatva of **ऊहोह्यगान**. Modes of **पदपाठ** and **स्वरनिर्देशपाठ** have been elaborately explained with several examples. **भावविकाराः** and the contents of this samhitā have been elucidated. Several stotras sung in **अग्निष्टोम** and other yāgas are rendered explicit. This preface may be considered as a useful introduction to the Sāma Veda.

While samhita portions of other Vedas have **पदपाठ, क्रमपाठ** and other pāṭhas according to their respective **प्रातिशाख्यानि** the Sama samhita has **पदपाठ** only. In the present edition **पदपाठ** also is included for the benefit of vedic reciters.

Sri Ramanatha Dikshit is the Head of the Department of Veda at the Samskrit Mahavidyalaya of Banaras Hindu University. He has edited **सामतन्त्रम्** a **प्रातिशाख्य** of Sāma Veda with a hitherto unpublished commentary. He has taken great pains to bring out the present edition of Uttarārcika, i.e. Kauthuma samhitā with **पदपाठ** and **ऊहोह्यगान**. All lovers of ancient vedic literature will feel indebted and grateful to Pandit Ramanatha Dikshit for this commendable contribution to the existing printed works on the Vedas.

V. S. RAMACHANDRA SASTRY,
Principal,
Samskrit Mahavidyalaya,
Banaras Hindu University

Varanasi-5.
10th of November 1966.

श्रीगणेशाय नमः ॥

ॐ नमः सामवेदाय ॥

* प्राक्कथनम् *

विद्वन्मूर्धन्यानामविदितं कं वा विषयमपूर्वं प्रतिपादयितुं शक्नुयाम्। यदधिगतमितस्ततो मया तदत्र मच्चित्तशुध्यै विमर्शकानां पुरतस्समुपस्थापयामि। निशाम्यैतत्तद्गुणदोषाविष्करणे पटवो मां शिक्षयन्त्विति सविनयं प्रस्तौमि। तदस्मिन्नल्पकाये प्राक्कथने सामवेदसंहिताया ऋग्वेदसंहितातोऽनुद्धारः, ऊहोह्यगानयोरपौरुषेयत्वम्, सामवेदे परिभाषापाठप्रकारः स्वरनिर्देशपाठप्रकारः, प्रकृतग्रन्थीयपदार्थप्रतिपादनम्, भावविकारः इत्येवमादयो विषया निरूप्यन्ते। तत्रादौ सामवेदसंहिता स्वतन्त्रा, न बह्वृचसंहितातस्समुद्धृतेति प्रतिपादयामि—

सर्वेषां भारतीयानां वेदार्थानुसन्धानलब्धप्रतिष्ठानां चिरन्तनमहर्षीणां दर्शनप्रणेतृणां सहृदयधुरीणानां महाकवीनां च वेदानधिकृत्य सात्विकी मतिरासीत् यदिमे वेदाः काव्यनाटकशास्त्रग्रन्था इव प्रमाणान्तरेणार्थानुपलभ्य तत्तद्देशकालपरिस्थितीरवगमयितुं महनीयैर्महर्षिभिर्न व्यरच्यन्त, परं परमात्मनः शरीरभूता अनादिनिधना एवेति। तत एवास्तिकवरेण्या द्विजवराः तत्र प्रतिपादितान्यैहिकामुष्मिकफलप्रदानि बहुलायासवित्तसाध्यान्यपि कर्माण्यनुष्ठाय विशुद्धान्तःकरणाः शाश्वतीं गतिमवापुरिति पुराणेतिहासादिभ्योऽवगच्छामः। गच्छति काले बुद्धावतारात्परं भारतीयानां केषाञ्चिन्मतिमारुरोहायं विषयः यत् इमे वेदाः पौरुषेया भवेयुर्नामेति। तत्र च दत्तचित्ताः महत्या युक्त्या वेदानां पौरुषेयत्वमुररीचक्रुस्ते। अतस्तत्खण्डनाय प्रवृत्तानि सर्वाण्यास्तिकदर्शनानि। तत्रेश्वरं स्वीकुर्वन्तो नैयायिका रागद्वेषासंस्पृष्टेनाप्ततमेनेश्वरेण प्रणीता इमे वेदा इति पन्थानमवललम्बिरे। अपरे तीर्थकाराः सर्वज्ञः परमेश्वरो गतकल्पीयं वेदं यथावस्थितं स्मृत्वोपदिशतीति प्रत्यपादयन्। ईश्वरमनङ्गीकुर्वन्तः कर्ममीमांसका अपौरुषेयत्वमेषां प्रत्यष्ठापयन्। बुद्धात्प्राचीनकालिकेषु वैदिकग्रन्थेषु पौरुषेयापौरुषेयत्वविषये वेदानां नास्ति विचारः। पश्यन्तु यास्कप्रणीतं निरुक्तमादिमं वैदिकग्रन्थरत्नम्। तत्र प्रथमद्वितीयसप्तमाध्यायेषु परिशिष्टप्रकरणे च बहवो वैदिका विषयाः सविमर्शं विचार्य सिद्धान्तिताः। यदि नामायं पौरुषेयापौरुषेयविचारस्तदानीं भवेत् तर्हि तदधिकृत्यापि विचारोऽस्मिन्ग्रन्थे भगवता यास्केन कृतो भवेत्। ततो वयं जानीमः बुद्धकालात्परमेवायं कोलाहलः प्रावर्तत भारते।

एतस्मिन्नन्तरे वैदेशिकानां तदनुयायिनां भारतीयानां च प्रज्ञावतां संभावितमानां वेदार्थानुसन्धानतत्पराणां मनसि पौरुषेयत्वप्रतिष्ठापनाय कश्चन नवीनो मार्गः प्रादुरभूत् भाषादृष्ट्या विषयदृष्ट्या च ऋग्वेदसंहितातिप्राचीना वैदिक-

ग्रन्थेषु। एषा च संहितैकदैव प्रणीतेत्यपि वक्तुं न शक्यते किन्तु द्वितीयादिसप्तम-मण्डलान्तोंऽशोऽतिप्राचीनः। क्रमेणाष्टमनवमप्रथमदशममण्डलानि व्यरच्यन्त। ततः परमथर्वयजुस्संहिते जज्ञाते। सामवेदसंहिता नाम न काचित्संहिता ऋग्वेदसंहि-तातो भिन्ना स्वीकर्तुं शक्यते। यज्ञकाले समायाते स्तोत्राधारत्वेनापेक्षिता ऋङ्मन्त्रा ऋग्वेदादुद्धृताः। त एव मन्त्राः अन्यैः पञ्चसप्तत्या मन्त्रैस्सह संकलिताः सामवेद-संहितेति समाख्यां लेभिरे। अत एव पूर्वोत्तरार्चिकग्रन्थयोर्विद्यमानास्सर्वे मन्त्राः प्रायः 'ऋग्वेदसंहितायां दरीदृश्यन्ते। तत्र पञ्चसप्ततिमन्त्रा यद्यपीदानींतनऋग्वेदसंहितायां नोपलभन्ते तथापि प्रचारपदवीं प्राप्यादर्शनं गतास्वन्यासु बह्वृचसंहितासु समाम्नाता भवेयुः। अपि च कर्मकाण्डप्रतिपादनपरेषु ब्राह्मणकल्पसूत्रग्रन्थेषु प्रविरलतया त एव मन्त्रा अवलोक्यन्ते—इति।

प्रकृतऋग्वेदसंहितातस्सामवेदसंहितायां ये पाठभेदा दृष्टिगोचरा भवन्ति तदधिकृत्य गवेषकानां नैकविधा मतयो भवन्ति। तथा हि – ये सामवेदे पाठभेदास्ते प्रायः गीतिसम्पत्यर्थं[२] बुद्धिपूर्वकमेव कृताः। तदेतदसहमाना अपरे पाठभेदा अपि ऋग्वेदीयशाखान्तरसंहितासु[३] भवेयुरिति समर्थयन्ते।

अत्रोच्यते—इयं सामवेदसंहिता ऋग्वेदात्सङ्कलितेति तेषां पक्षस्तदीयसिद्धान्तेन व्याहन्यते। तथा हि—इत्थं हि तन्मतस्थितिः—भाषादृष्ट्या विषयदृष्ट्या चाति-प्राचीना ऋग्वेदसंहिता। तत्राप्यतिप्राचीनानि गृत्समदादिभिर्दृष्टानि षण्मण्डला-नीति। तत्रेदं प्रतिपाद्यते—अस्ति सामवेदीयं ज्ञानं भगवतो गृत्समदस्य द्वितीयमण्डल-द्रष्टुः।

---

१. इन में ७५ के अतिरिक्त सारे मन्त्र ऋग्वेद के ८ वें और ९ वें मण्डल में भी तथैव सङ्कलित हैं। मन्त्रों की रचना प्रायः गायत्री छन्द में है अथवा गायत्री तथा जगती मिश्रित प्रगाथा वृत्तों में हुई है। इन का मूल उद्देश्य गेय पदों की रचना करना था। ऋग्वेद में न मिलने वाले ७५ मन्त्र अन्य संहिताओं में जहाँ-तहाँ और कभी-कभी कर्मकाण्ड-परक ग्रन्थों में भी प्रकीर्ण मिलते हैं। संभव है इन में कुछ किसी अज्ञात संस्करण से भी लिए गये हों। वैसे प्रतीत यही होता है कि ऋग्वेद की बिखरी पङ्क्तियों को मिलाकर इन का एक और अर्थहीन-सा संस्करण सम्पादित कर दिया गया है। (पृ० सं० १३६. प्रा० भा० सा०)

२. प्रो० आफ्रेख्त ने इन पाठ भेदों के कारणों को ढूंढने का प्रयत्न किया भी है; और उनका कहना है कि ये पाठभेद प्रायः गान की सुविधा के लिये जान बूझ कर किये गये हैं। क्योंकि सामवेद के दोनों आर्चिकों में मूलपाठ मौलिक न होकर किसी लक्ष्य की दृष्टि से किञ्चित भिन्न है। इत्यादि (पृ० सं० १२६ प्रा० भा० सा०)

३. "शाङ्ख्यायनादिषु ऋग्वेदीयशाखास्वन्यासु पाठभेदभिन्ना एते मन्त्रा भवेयुरिति यत्कैश्चिन्मन्यते तदेव समीचीनमिव प्रतिभाति" इत्याह सान्तबलेकर-कुलजदामोदरभट्टसूनु-श्रीपादशर्मभट्ठाचार्यमहोदयः सामवेदसंहिताप्रस्तावे पृ० सं० ८।

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः॥
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः।
स ऋणचिद्दृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि[1]॥

इति निर्दिष्टयोर्मन्त्रयोस्सामपदं प्रयुञ्जन्महर्षिरात्मनस्सामवेदस्थितिज्ञत्वमाविष्करोतीति सर्वविदितमेव; यतो हि न कोऽपि सचेताः स्वाननुभूतमर्थं स्वकीये ग्रन्थे निरूपयितुं समर्थो भवति। अस्यां परिस्थितौ महर्षिणा ज्ञाताः साममन्त्राः का ऋच आश्रयन्ते इति प्रतिवक्तव्यम्। ऋङ्हीनाः साममन्त्रा नैव सन्ति।

अथोच्येत प्रजापतेर्हृदयादयस्साममन्त्रास्तदाऽप्यासन्। तदभिप्रायेणैवैतत्पदं प्रायौक्षीत् महर्षिरिति तर्हि ऋक्संहितातः प्राचीनाः साममन्त्रा इति वदन्तः ऋग्वेदसंहितातिप्राचीनेति वादस्य तिलाञ्जलिमेव यच्छेयुः। अथ मतं दधन्वेवा, त्रिकद्रुकेषु, नियुत्वा, इति ऋङ्मन्त्रान्महर्षिणा सङ्कलितानाश्रित्य तदानींतनः तत्समानप्रज्ञः कश्चन सामानि जगौ। ततस्सामवेदीयं ज्ञानं महर्षेर्गृत्समदस्य समभवदिति तदपि सकलविपश्चिन्मनोग्राहितां नावलम्बते। तथाहि[2] "दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत्" इति ऋग्वेदमन्त्रपाठः। सामवेदे "वोचद्ब्रह्मेति वेरु तत्" इत्यानुपूर्वीभेदो जागर्ति। ऋग्वेदमन्त्रादयं मन्त्रो भिन्नः। अपि च दधन्वे—मन्त्रदृष्टं साम यद्यतिप्राचीनं तर्हि केन कारणेन प्रथमं दृष्टं साम ओग्नाइ इत्यतः पूर्वं न सङ्गृहीतम्। एवमेव "त्रिकद्रुकेषु" ऋगपि आनुपूर्वीभेदाद्भिन्ना भवति।

अपरं च गृत्समदः साममन्त्रानेव जानातीति न, परं तेषामध्येतारं प्रयोगं च सम्यग्जानातीति तदीयमन्त्रेणैव जानीमः। तद्दृष्टौ मन्त्रावेवं द्वितीयमण्डलं मण्डयतः—

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।
उभे वाचौ वदति सामगाइव गायत्रं च त्रैष्टुभं चानु राजति[3]॥
उद्गातेव शकुने साम गायसि ब्रह्मपुत्रइव सवनेषु शंससि।
वृषेव वाजी शिशुमतीरपीत्याः सर्वतो नः शकुने भद्रमा वद।
विश्वतो नश्शकुने पुण्यमावद इति।

मन्त्रयोरनयोर्वैदिकमार्गप्रदर्शकैरास्तिकवरेण्यैस्सर्वदर्शननिष्णातैस्सायणाचार्यैर्योऽर्थः प्रतिपादितस्स एवार्थो गवेषकैरपि स्वीकृतः। तथाह्यत्रत्यं सायणभाष्यम्—

शकुने हे कपिञ्जल उद्गातेव साम यथोद्गाता साम गायति तथा त्वं गायसि गानस्वनं करोषि। ब्रह्मपुत्र इव यथा ब्राह्मणाच्छंसी सवनेषु शस्त्राणि शंसति तथा त्वं कालेषु शंससि श्रौतस्वरं करोषि-इति। अत्र चोद्गातृकर्तृकं सामोपमानम् कपिञ्जलकर्तृकशब्द उपमेयम्। तत्रोपमानस्य लक्षणं निराह यास्कः 'अथात उपमाः' इत्युपक्रम्य

[1] ऋ. सं० २.२३. १६, १७
[2] ,, ,, २. ५. ३.
[3] ,, ,, २. ४३. १, २

"ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वाप्रख्यातं वोपमिमीते" इति। तत्र "प्रख्याततमेन गुणेनाप्रख्यातमुपमिमीते इति वाक्ययोजनायां द्वितीयप्रकारेणात्रोपमा भवति। तेन जानीमो वयमुद्गातृकर्तृकं सामगानं तस्मिन्काले प्रख्याततममासीत्। तेन प्रसिद्धेन गुणेन शकुनिकर्तृकं शब्दं अप्रख्यातमुपमिमीते द्रष्टा। तथा च गृत्समदाचार्यः सामगमुद्गातारं सम्यग्जानातीति सिद्धम्।

अपि च स्तोत्रप्रयोगं ज्ञात्वैव "उभे वाचौ" इति पदं प्रयुक्तवान्मण्डलद्रष्टा। सामगाः प्रातस्सवनादिषु बहिष्पवमानस्तोत्रादीनामुपक्रमे पूर्वं यानि सामानि गायन्ति तेषामाश्रयभूता ऋचः पठन्ति। तथा च श्रौतसूत्रम् "पुरस्तादुपरिष्टाच्चर्चः सर्वत्र जपेयुः यासु करिष्यन्तः स्युः[1]" इति। ततश्च ते ऋङ्मन्त्रं गायत्रं त्रैष्टुभम् च-शब्दाज्जागतं गानमन्त्रं च प्रयुञ्जत इति ज्ञात्वैव उभे वाचौ इति सङ्गृह्णाति स्म। इदानीं कानि सामानि ज्ञात्वैवमवददिति ऋग्वेदादृङ्मन्त्राः सामवेदे सङ्गृहीता इति वदद्भिः स्वकीयस्सिद्धान्तस्समर्थनीयः।

केचन पुनरमीषां ऋङ्मन्त्राणामतिप्राचीनानां भाषाशास्त्रदृष्ट्यार्थान्तरमेव वर्णनीयम्। भारतीयैर्वेदव्याख्यातृभिर्भाषाशास्त्रानभिज्ञैर्योऽर्थो वर्णितस्सोऽत्यन्तं दोषभूषित एवेत्याशेरते तत्रतत्रोद्घोषयन्ति च। परमेवमेवोद्घोषयन्तः कालमयापयन्। नवीनं व्याख्यानमार्गं प्रशस्तं न प्रकाशयामासुः। प्रसङ्गोऽस्मिन्भारतीयानामार्याणां व्याख्यानमदुष्टं शिष्टसंमतमिति शब्दार्थतत्त्वविदां वैदिकमूर्द्धन्यानां वाक्यादवगतमिति तानि वाक्यानि प्रस्तौमि। पश्यत शबरस्वामि-कुमारिलभट्टपादयोर्वाक्यानि। ते हि प्रामाणिकाः यवशब्दार्थनिरूपणव्याजेन शब्दार्थतत्वं सर्वतन्त्रसिद्धान्तमुद्घोषयन्ति "यः शास्त्रस्थानां स शब्दार्थः। के शास्त्रस्थाः? शिष्टाः। तेषामविच्छिन्ना स्मृतिः शब्देषु वेदेषु च। तेन शिष्टा निमित्तं श्रुतिस्मृत्यवधारणे[2]" इति वदन्भगवान् शबरस्वामी श्रुत्यर्थविवरणं भाषाशास्त्रदृष्ट्या नो भवति किन्त्वनादिशिष्टपरम्परयेति प्रतिपादयति। कुमारिलभट्टपादा अपि तन्त्रवार्तिके—

शास्त्रस्थाः पुरुषा ये वा प्रतिपत्तिस्तदाश्रया।
प्रमाणत्वेन मन्तव्या सप्रत्ययतरा हि ते॥
शास्त्रार्थेष्वभियुक्तानां पुरुषाणां हि सर्वदा।
स्तोकेनाप्यन्यथात्वेन शास्त्रार्थो निष्फलो भवेत्॥
लौकिकस्त्वन्यथात्वेऽपि नार्थोऽतीव विरुध्यते।
× × ×
तस्माद्ये याज्ञिकैर्येषां वैद्यैर्वार्था निरूपिताः।
तेषां त एव शब्दानामर्था मुख्या हि नेतरे॥
× × ×
अविप्लुतश्च शब्दार्थो यो वेदेषूपलभ्यते।
तत्रत्यनिर्णयात्तस्माल्लोके भवति निर्णयः[3]॥

---

[1] ला. श्रौ. सू. १. ९. १८
[2] शाबरभा पृ. २१७
[3] तन्त्रवा. पृ. २१७, २१८

इति व्यवस्थापयामासुः। एवं शब्दार्थनिर्णयं प्रतिष्ठाप्योत्तरत्र लोकवेदाधिकरणे पूर्वपक्षिणा लौकिका वैदिकाश्च शब्दाः परस्परं भिन्नाः, एषामर्था अपि भिन्नाः। तस्माल्लौकिकात्पदार्थाद्वैदिकाः पदार्था भिन्ना इति शङ्किते तत्परिहारमाह भाष्यकर्ता "य एव लौकिकाश्शब्दास्त एव वैदिकाः। त एवैषामर्थाः[1]" इति। अनेन प्रमाणजालेन सवनब्रह्मपुत्रोद्गातृपदानां न कदाप्यर्थान्तरं भवेत्।

ततश्च गृत्समदादीनां मण्डलद्रष्टृणां काले सामवेद आसीदेव। अत एव ऋग्वेदसंहिताया भिन्नामिमां संहिताम्, ऋग्वेदसंहिताव्याख्यया अस्या अगतार्थतां च मन्यमानेन सायणार्येण पृथक् व्याख्यानाय प्रयत्न[2] आश्रीयते स्म। अपि न स जानाति ऋग्वेदादत्र मन्त्रा उद्धृता इति? ततश्चेयं संहिता यजुर्वेदसंहितेव स्वतन्त्रैव भवेदिति युक्तमुत्पश्यामि।

एतेनैव परेषां स्वकपोलकल्पिताः—सामवेदीयऋङ्मन्त्रेषु पाठभेदाः स्वरभेदाः कर्मस्वरूपप्रतिपादकेषु ब्राह्मणश्रौतसूत्रग्रन्थेषु वर्तन्ते, गीतिसम्पत्त्यै बुद्धिपूर्वकं ऋग्वेदमन्त्रमन्यथयित्वाऽपठन्, शांखायनादिशाखामन्त्रेषु तथा भवेयुः, इति पक्षाः निरस्तप्रायाः। तथा हि-यत्र प्रामाणिकस्य सिद्धान्तस्य क्वचिद्व्यभिचारो दृश्यते तत्रैव तस्य समीकरणार्थमर्थापत्तिप्रमाणेन किञ्चित्कल्पयन्ति। यथा वेदान्तिभिः-साधनचतुष्टयसंपन्नेन विदुषा वेदान्तवाक्यार्थविचारे कृते ब्रह्मज्ञानं प्राप्यते ततश्च कृतकृत्यो भवतीति स्वीकृतस्य प्रामाणिकस्य सिद्धान्तस्य साधनचतुष्टयरहितगर्भस्थवामदेवस्य ब्रह्मज्ञानप्राप्तिवर्णनमसङ्गतमिति मत्वा श्रुत्युक्तार्थस्थिरीकरणाय पूर्वजन्मनि वामदेवस्य साधनचतुष्टयसंपत्तिरासीत्, ब्रह्मविचारश्च तेनानुष्ठितः, परं प्रबलप्रतिबन्धवशात्साक्षात्कारो न जातः। प्रतिबन्धके विनिर्गतेऽप्रतिबद्धकारणसद्भावात्कार्योत्पत्तिरिति वर्ण्यते तथात्र ऋग्वेदात्सामवेदीये आर्चिके गृहीते इत्यत्र दृढतरप्रमाणाभावेन पाठान्तरादयः शाखान्तरेषु भवेयुरित्यादिकल्पनं न शोभतेतराम्। यदि ऋग्वेदसंहितां विहाय सामवेदसंहितायाः स्थितिरनुपपन्ना भवेत्तदैवमादिकल्पनं मनोरञ्जकं भवेत्। तामेवानुपपत्तिं न पश्यामः।

यदपि गीत्यर्थमेव पाठभेदमकुर्वन्महर्षय इति तदप्ययुक्तम्। यैरेव महर्षिभिः—

हीनो मन्त्रः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

इत्यादिवाक्यैः वेदसंरक्षणोपायाः प्रतिपादिताः तैरेवात्मनः भविष्यतां द्विजवराणां वा हिंसायै बुद्धिपूर्वकं पाठभेदः कथमाश्रितो भवेत्। अनेन हीन इति मन्त्रेणायमर्थः प्रतिपादितः—परम्परागतां श्रुतिमविचार्य स्वमनीषया लौकिकव्याकरणबलेन कारणान्तरेण वा स्वरवर्णानां आनुपूर्व्या वा परिवर्तनं कुर्वन्निःश्रेयसात्प्रतिहन्येता-

---

[1] शाबरभा पृ. २९१

[2] यज्ञं यजुर्भिरध्वर्युर्निर्मिमीते ततो यजुः।
व्याख्यातं प्रथमं पश्चादृचां व्याख्यानमीरितम्॥
साम्नामृगाश्रितत्वेन सामव्याख्याथ वर्ण्यते॥
सामवेदसंहिताभाष्योपोद्घाते. १०.

नर्थं चेयादिति। ततश्च पूर्वोक्ताः स्वमतिसमुद्भूता गवेषकाणां पक्षाः दोषग्रस्ता नैवादरणीया आस्तिकवरेण्यैः।

कथं वा तेषां भ्रमो जात इति विचिकित्सायां "ऋच्यध्यूढं साम गीयते" इत्यादिवाक्यादिति वदामः। तथाहि वाक्येऽस्मिन्ऋक्पदं प्रयुक्तम्। तस्य च ऋग्वेदोऽर्थो भवेदिति कल्पयित्वा तदुपरि विचारमकार्षुः। परमस्य पदस्य ऋग्वेद इति नार्थः। ऋङ्मन्त्र इत्येवार्थः। ते च मन्त्राः सामवेदार्चिकग्रन्थ एव विराजन्ते। तदभिप्रायेण प्रोक्तं ऋच्यध्यूढमित्यादिवाक्यम्।

अथोहोह्यगानात्मकः प्रकृतग्रन्थस्थः साममन्त्रभागः पौरुषेय उतापौरुषेय इति विचार्यते। मन्त्रब्राह्मणात्मकस्य समग्रस्य वेदस्य बहुभिः प्रमाणैरपौरुषेयत्वं स्थापितवन्तो मीमांसका अस्य भागस्य पौरुषेयत्वं समर्थयामासुः। तथाहि पारमर्षे सूत्रे-सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम्। तदुक्तदोषम्" इति। तदधिकरणार्थं च संक्षिप्य विशदयांचकार सायणाचार्यः न्यायमालाविस्तरे—ऊहसामानि न पुरुषप्रणीतानि। नित्यानां वेदानामध्ययने ये नियमाः-उपनीतैरेवाध्येतव्यम्, अनध्यायेषु नाध्येतव्यम्, गुरुमुखादेवाध्येतव्यमित्यादयः ते सर्वेऽप्यत्राप्यविशिष्टाः। नैते धर्माः पौरुषेय-ग्रन्थानामध्ययने सन्ति। अत एवाध्यापका अपि शिष्येभ्यः प्रोचुरिमे मन्त्रा अपौरुषेया इति। ततश्च तत्प्रसिध्या एते साममन्त्रा अपौरुषेयाः किञ्चैषां कर्तारोऽपि न स्मर्यन्ते इति पूर्वपक्षं प्रतिपाद्य निरस्तम् पौरुषेयाणि सामानीमानि। "यद्योन्यां तदुत्तरयोर्गायति" इति श्रूयते। अस्यायमर्थः—एकस्मिन्सूक्ते ऋक्त्रयं वर्तते। तत्र प्रथमा ऋक् योनिः। तस्यां यत्सामाधीतं तदेवोत्तरयो ऋचोरपि गेयम्। गायतीति लट् लेडर्थे। अप्राप्ते शास्त्रमर्थवदिति न्यायेन पौरुषेयत्वे एवायं विधिः सङ्गच्छते। एकस्यामृचि गीतम्, उत्तरत्र न गीतम्। अस्यामवस्थायां पूर्वगीतिसदृशं गीत्यन्तरं उत्तरत्र गेयमिति प्रतिभाति। यद्युत्तरत्रापि गीतयः पूर्वमेव निष्पन्ना भवेयुस्तर्हि विधिर्निष्फलस्संजायेत। न भवितुमर्हत्येवम्। ततश्च पौरुषेयानि प्रकृतग्रन्थस्थानि सामानि। यदपि वेदाध्ययनधर्मा अत्रापि सन्तीति बाढं धर्मा अत्रापि भवेयुः। एषामाधारभूता ऋच अपौरुषेयाः। तदाश्रितास्ते धर्माः। वैदिकप्रसिद्धिरपि निर्मूला। कर्त्रस्मरणं तु चिरकालव्यवधानादपि सम्भवेत् इति।

अत्रैवान्यानपि हेतून्प्रस्तौमि। अस्ति छन्दोगानामष्टसु ब्राह्मणेषु चतुर्थं ब्राह्मणम् "आर्षेयब्राह्मणम्"। वेयगानारण्यगेयसाम्नामपौरुषेयाणां ऋषीन्नामानि च प्रति-पादयति तद्ब्राह्मणम्। न तस्मिन्ग्रन्थे ऊहोह्यसाम्नां ऋषयो नामानि वा प्रतिपादिताः। यदीमान्यपि सामानि नित्यानि तदा भवेयुः कथं तद्दुर्पेक्षापदवीमारूढानि। तस्मा-दपि पौरुषेयोऽयं भागः।

किञ्च वेदानामध्ययने केचन नियमविशेषाः प्रतिपादिताः। तेषां[१] व्रतमिति समाख्या। तदनुष्ठातारो व्रतिन इति संज्ञां लभन्ते। तथाहि यद्यप्युपनीतैरेव स्वाध्या-

[१] ऋग्वेदे-गोदान-महानाम्नी-महाव्रतोपनिषद्व्रतानि भवन्त्याचार्याश्वलायनसम्मतानि। कौषीतकीगृह्यसूत्रानुसारेण शुक्रियव्रतमपि वर्तत इति विद्मः। शुक्रियब्रह्मचर्यमादिशेत।

योऽध्येतव्यः परं वेदानुपाकृत्याध्येतव्यः। प्रतिवेदं बहूनि काण्डानि प्रकरणानि वा विद्यन्ते। तत्रैकैकस्य काण्डस्य प्रकरणस्य वाध्ययनं भिन्नेतिकर्तव्यताकानां व्रतकर्मणा-

---

"शुक्रियब्रह्मचारी भव" इत्याचार्यः। शुक्रियब्रह्मचारी भवानीतीतरः। एवमुत्तरेषां यद्यद्व्रतमादिशेत तस्य तस्य नाम्ना निर्दिशेत् इति (कौषी० गृ० २.७.८—११) अत्र भवत्रातः शुक्रियब्रह्मचारी भव शाक्वरब्रह्मचारी भव-महाव्रतिकब्रह्मचारी भव-औपनिषद्ब्रह्मचारी भव-गोदानब्रह्मचारी भव-इति। आश्वलायनसूत्रानुसारेण गोदानव्रतकाले शंयुबार्हस्पत्यान्त संहिताभागं सब्राह्मणम् . महानाम्नी ऋचो द्वितीयव्रतकाले, "अथ महाव्रतम्" इत्यैतरेयारण्यकं यथाविधि उपनिषद्भागवर्जं तृतीयव्रतानुष्ठानवेलायाम्, अन्ते चोपनिषदमधीयीतोपनिषद्व्रतकाले।

शुक्लयजुर्वेदे-सावित्राग्नेय-शुक्रियो-पनिषद-शौलभ-गोदानव्रतानि भवन्ति। प्रथमे व्रते स्थितः सावित्रीम्, आग्नेयव्रतमास्थितो वटुः "समिधाग्निम्" इत्येवमाद्याग्नेयं वेदभागमधीते। शुक्रियव्रती स एव "शुक्रं वाचं" इत्यादिशुक्रियवेदभागम्, औपनिषदव्रतमनुतिष्ठन् "द्वया ह प्राजापत्याः" इत्युपनिषद्भागम्, शौलभव्रतानुष्ठाता शौलभीनामृचां भागम्, गोदानव्रती शिष्टां सब्राह्मणां संहितामधीते।

कृष्णयजुर्वेदे भगंव्रताऽऽपस्तम्बेनानुशिष्टानि चत्वारि प्राजापत्य सौम्याग्नेय-वैश्वदेवव्रतानि भवन्ति। तैत्तिरीयशाखायां चत्वारि काण्डानि-पौरोडाशिकं याजमानं होतारः हौत्रं पितृमेध इति सब्राह्मणानि सानुब्राह्मणानि प्राजापत्यानि। आध्वर्यवं ग्रहाः दाक्षिणानि समिष्टयजूंषि अवभृथयजूंषि वाजपेयः शुक्रियाणि सवाः इति सब्राह्मणानि सानुब्राह्मणानि सौम्यानि। अग्न्याधेयमग्निहोत्रमग्न्युपस्थानमग्निचयनं सावित्रं नाचिकेतं चातुर्होत्रीयं वैश्वसृजमारुणा इति सब्राह्मणानि सानुब्राह्मणान्याग्नेयानि। राजसूयः पशुबन्धः इष्टयो नक्षत्रेष्टयो दिवश्येनयोऽपाघाः सात्रायणमुपहोमाः कौलिकीसूक्तान्यौपानुवाक्यं याज्याश्वमेधः पुरुषमेधस्सौत्रामण्यच्छिद्राणि पशुहौत्रमुपनिषदः इति सब्राह्मणानि सानुब्राह्मणानि वैश्वदेवानीति। तैत्तिरीयशाखाध्ययनेऽयं क्रमः पूर्वमासीत्। तत्रैकैकस्य व्रतस्योपक्रम उत्सर्जनं च भवति। व्रतानामुत्तरायण एवोपक्रम उत्सर्जनं च। उपनयनानन्तरं क्रमेण व्रतोपक्रमं कृत्वा श्रावण्यां पौर्णमास्यामुपाकृत्यैवाधीयीत। सम्पूर्णभागाध्ययनानन्तरं तद्व्रतोत्सर्जनं कुर्यात्। पुनर्भागान्तराध्ययनार्थं तद्व्रतोपक्रमः, उपाकर्मानन्तरमध्ययनमिति नियमः। इदानीं यानुपूर्वी संहिताब्राह्मणयोर्वर्तते सा सरस्वतीपुत्रदृष्टेति सायणाचार्यवाक्येनावगच्छामः। अस्मिन्क्रमे उपनयनानन्तरं चतुर्णां व्रतानामुपक्रमः, उपाकर्मानन्तरं समग्रशाखामधीत्योत्सर्जनं च भवति।

अन्ये पुनराचार्याः पञ्चमं स्वायम्भुवं काण्डं समामनन्ति-आरण्यकद्वितीयप्रपाठकं पृथक्कृत्वा। अपरे पुनः आरुणं काण्डम्, सांहित्यो देवता उपनिषदः वारुणीर्देवता उपनिषदः याज्ञिकोर्देवता उपनिषद इति पूर्वोक्तैस्सह नव काण्डानि मन्यन्ते।

गच्छति काले धर्मानुष्ठानविमुखानां भारतीयानां त्रैवर्णिकानामभ्युदयं काङ्क्षमाणा महर्षयो यथावदध्ययनासंभवं चोत्प्रेक्षमाणाः प्रकारान्तरमपि न्यरूपयन्—यथावद्वेदमधीत्य पश्चात्समानेऽहनि व्रतानामुपक्रमं समानतन्त्रेण तथैवोत्सर्जनं चानुतिष्ठेत् इति। अत एवाद्यत्वे शिष्टाः प्रकारमिममाश्रित्य विवाहदिनात्पूर्वं समानेऽह्न्येव स्वगृह्योक्तप्रकारेणामूनि व्रतान्यनुतिष्ठन्ति। तत्र वेदाध्ययनं विना व्रतानुष्ठातॄन् व्रतस्नातः इति, व्रतानि विना वेदाध्यायिनो

मनुष्ठानपूर्वकं विहितम्। सामवेदे च गायत्रम् वेयगानम्, आरण्यकगानम्, शुक्रियम्, महानाम्न्यः मन्त्रब्राह्मणमुपनिषत्सहितम्, इति विभागा वर्तन्ते। पूर्वोक्तानां भागानामुक्रमोत्सर्जने स्तः। उपक्रम्य तद्भागं यथावदधीत्योत्सर्जनं कृत्वा भागान्तराण्यपि तथैवाधीयीरन्। उपनयन-गोदान-व्रातिका—दित्य-महानाम्न्युपनिषत्-ज्येष्ठसाम-भौतिकव्रतानीति भवन्त्यष्टौ व्रतानि छन्दोगानाम्। उपक्रमकर्मणः श्रावणकर्म, उत्सर्जनकर्मणोऽनुप्रवचनीयकर्मेति संज्ञान्तरं छन्दोगप्रयोगेषु। अष्टमे वर्षे कृतोपनयनो बटुराश्रम-[1]धर्मानष्टवर्षपर्यन्तमनुतिष्ठन् श्रावणकर्मपूर्वकं यथाविधि सावित्र्यामुत्पन्नं गायत्रमधीयीत। षोडशे वर्षे तदुत्सृज्य गोदानव्रतमनुतिष्ठेत्। महानाम्नीं विहाय शिष्टानि व्रतानि संवत्सरसाध्यानि भवन्ति। सर्वेषामुपनयनं पृथक् स्मृतम्। अत्राङ्गकलापः प्रसिद्धादुपनयनादागच्छति। [2]गोदानव्रते सावित्र्युपदेशकाले आग्नेयैन्द्रपवमानपर्वाणि ऋग्भिस्सहोपदेष्टव्यानि। असम्भवे एकैकस्य पर्वण आद्यन्ते ऋचौ तथा सामनी उपदेष्टव्ये। श्रावणेन श्रावयित्वाध्यापयीत। व्रतान्ते श्रावणमिति केचन मन्यन्ते। अपरे पुनरहरहरधीयीतेति वाक्येन व्रतानुष्ठानकाल एवाध्ययनमिति समर्थयन्ते।

एवं व्रातिकव्रते उपनयनकाले सावित्रीस्थाने आरण्यकसंहितायाः "इन्द्रज्येष्ठं नः" "सहर्षभा" इति, यद्यावई इत्यारभ्य स्वयंस्कुन्वाइ इत्यन्तमुपदिशेत्। असंभवेऽर्कद्वन्द्वव्रतपर्वणामाद्यन्ते सामनी आरण्यककाण्डस्य पूर्वोक्ते ऋचौ वा। व्रतान्ते श्रावणपूर्वकमध्ययनम्। तत्र ज्येष्ठसामपञ्चानुगानानां चोपरिष्टाद्व्रतनिर्देशादुद्धारः कर्तव्यः। अनन्तरं शुक्रियपर्वाध्ययनायादित्यव्रतं भवति। ब्रह्मोपदेशकाले "अग्न आयूंषि" इत्यारभ्य "सप्तत्वा हरितः" इत्यन्तं संहिताभागम्, अग्नेर्व्रतमित्यारभ्योन्नयामि पर्यन्तं गानमुपदिशेत्। पूर्वैव्रतापेक्षयाऽत्र सन्ति केचन नियमाः[3]। तान्यथावद्वर्षपर्यन्तं अन्यैस्साधारणैर्नियमैस्सहानुष्ठायान्ते यथाविधि शुक्रियं पर्वाधीते। तस्य व्रतस्योत्सर्जनानन्तरं महानाम्नीपर्वाध्येतुं महानाम्नीव्रतमनुतिष्ठति। तच्च व्रतं द्वादश नव

विद्यास्नात इति व्रतैस्सह वेदाध्यायिनो विद्याव्रतस्नात इति संज्ञितान् चक्रिरे गृह्यसूत्रकाराः। सर्वथा व्रतानन्तरमेव समावर्तनकर्म भवेत्। केचन भारतीयाः उपनयनकर्मणैव साकं समावर्तनमाचरन्ति समानेऽहनि। नेदं युक्तमिति प्रतिभाति-वेदाध्ययनाधिकारसिध्यर्थं विहितं कर्मोपनयनम्। समावर्तनं च "अधीत्य स्नायात्" इति वाक्येन स्वशाखाध्ययनात्परं विहितम्। उपनीतोऽप्युपनयनदिनादारभ्य नाधीते, उपाकर्मानन्तरमेव। अस्यां परिस्थितौ यदुपनयनेनैव साकं स्नातककर्मानुष्ठानंतत् कथं नु सङ्गच्छेत।

१. मेखलाधारणभैक्षचर्यदण्डसमिदाधानोपस्पर्शनप्रातरभिवादा नित्यम्। खा० गृ० सू० २.५.१६.

२. गोदानव्रातिकव्रतनियमाः खादिरे गृह्यसूत्रे—अधस्संवेशी। अमधुमांसाशी स्यात्, मैथुनक्षुरकृत्य स्नानावलेखनदन्तधावनपादधावनानि वर्जयेत्, नास्य कामे रेतस्स्कन्देत् न गोयुक्तमारोहेत्, न ग्राम उपानहौ॥ खा० गृ० सू० २.५.१०–१५.

३. ये चरन्त्येकवाससो भवन्ति। आदित्यं च नान्तर्दधते। नचापोऽभ्युपयन्ति। खा० गृ० सू० २.५.१९–२१.

षट् त्रीन् वा वर्षान् यथोत्साहमाचरति। अत्रापि विशिष्टा [1]नियमास्सन्ति। पूर्ववदेव ताननुतिष्ठेत्। अत्रोपनयने सावित्र्युपदेशकाले महानाम्नीऋचः सामानि चोपदिशति। श्रावणकर्मणि महानाम्नीपर्व श्रावयेत्। तत्र च चत्वारि सामानि सन्ति। अध्यापनकाले गुर्वन्तेवासिनौ पुरस्तादुदकपात्रे निधाय तत्र पाणी मज्जयित्वाध्यापनाध्ययने कुरुतः[2]। एकैकं साम पुरीषपदैस्सहैकस्मिन्नहन्यध्यापयीत। एवं दिनत्रयेणैतत्पर्वाध्येयं भवति। उत्सर्जनानन्तरं मन्त्रब्राह्मणाध्ययनार्थं उपनिषद्व्रतं भवति। सर्वेषु व्रतेपूपनयनं विद्यते। सर्वत्र ब्रह्मोपदेशकालेऽध्येतव्यभागस्यान्तमन्त्रावुपदिशेत्। प्रकृतकर्मणि "देव सवितः प्रसुव यज्ञम्" "आगामनागामदिति वधिष्ट" इत्यन्तम्, "ओमित्येतदक्षरमुद्गीथमुपासीत" इति "न स पुनरावर्तते" इत्यन्तं चोपदिशति गुरुः। नात्र श्रावणकर्मास्ति। संवत्सरान्ते मन्त्रब्राह्मणं सोपनिषदमधीते वटुः। यथोक्तप्रकारेण व्रतं समाप्य त्रयाणां ज्येष्ठसाम्नामध्ययनार्थं ज्येष्ठसामव्रतमनुतिष्ठति। ब्रह्मोपदेशकाले रुद्रसंहितान्तर्गतानामारण्यकगानस्थानां ज्येष्ठसाम्नामुपदेशः। नात्र "मूर्धानं दिवः" इति ऋच उपदेशः। पूर्वार्चिके तस्या अधीतत्वात्, उपदेश आद्योच्चारणं भवतीति नात्र तस्याः पाठः। अस्य व्रतस्योत्सर्जनानन्तरं पञ्चानुगानमिलान्दमध्येतव्यम्। तदर्थं भौतिकव्रतमाचरेत्। उपदेशकाले पञ्चानुगानं साम भवति। श्रावणकर्मणि तच्छ्रावयित्वाध्यापयीत। उत्सर्जनकर्म अनुप्रवचनीयकर्मेति छन्दोगा व्याहरन्तीति पूर्वमेवोक्तम्।

अत्र प्रसङ्गागतमन्यन्निरूप्यते—

"गोदानव्रातिकादित्यमहानाम्नीव्रतानि तु।
वेदव्रतानि चत्वारि तत्रादित्यव्रतं यदि॥
न कुर्यात्संहितात्वेन कुर्वीतोपनिषद्व्रतम्।

इति वामनाचार्यैः कारिकायां प्रतिपादितम्। अस्यायमर्थः—"चत्वारि वेदव्रतानि" इति गौतमधर्मसूत्रमस्ति। अयं च ग्रन्थस्सामवेदीय इति प्रसिद्धिरपि जागर्ति। तद्वचनानुसारेण सामवेदे नाष्टौ व्रतानि, परं चत्वार्येवेति प्रतिपादिते केषामनुष्ठानम् केषामुत्सर्ग इति सन्देहो जायते स्वभावतः। तत्रानुष्ठेयानि व्रतानि प्रतिपादयति वामनाचार्यः संहिताध्ययनार्थमिमानि व्रतानि प्रवृत्तानि। गानभागः "अग्न आयाहि" इत्यारभ्य "एवाहि देवाः" इत्यन्तो भवति। ग्रामेगेयाः केचन। अपरे अरण्येगेयाः साममन्त्रा भवन्ति। य उस्रियापर्यन्तग्रामेगेयाध्ययनाय गोदानव्रतमावश्यकम्। तथैवारण्यकपर्वाध्ययनार्थं व्रातिकव्रतम्। शुक्रियमहानाम्नीपर्वणोरध्ययनकाले ये

१. कृष्णवस्त्रः, कृष्णभक्षः, आचार्याधीनः, तिष्ठेद्दिवा, आसीत नक्तम्। खा० गृ० सू० २.५.२३–२७.

२. उपोषिताय परिणद्धाक्षायानुगापयेत्। खा० गृ० सू० २.५.२९.
निदानसूत्रे विस्तरशः प्रतिपाद्यते तासां खलु त्रीन्संवत्सरान् ब्रह्मचर्यं चरेत्। कृष्णवस्त्रः कृष्णभक्षः आचार्याधीनस्तपस्वी तिष्ठेद्दिवासीत नक्तम्। सायं प्रातरुदकोपस्पर्शी सर्वभूतेभ्यः पन्थानंददद्वर्षति शरणं नातीयात्। नित्यं स्निग्धवासा बभूयेत्। उदकसाधवो हि महानाम्न्य इति। एवं खलु चरतः कामवर्षी पर्जन्यो भवति। नि० सू० प्रपाठकः ४. खण्डः ३.।

नियमास्तेऽर्कद्वन्द्वव्रतपर्वाध्ययननियमैस्सह समुच्चयं न लभन्ते इति पृथगनुष्ठेये व्रते भवतः। उपनयनव्रतं न पृथग्भवति। सर्ववेदाध्ययनसाधारणं तत्। ततश्च गोदानव्रातिकादित्यमहानाम्नीव्रतानि चत्वारि भवन्ति। अपरे पुनः आदित्यव्रते ये नियमास्तेषां व्रातिकव्रतेन समुच्चये नास्त्यत्यन्तं बाध इति मन्यमानाः "नादित्यव्रतमेकेषाम्" इति स्मृतिवाक्यमारचयन्ति। तदानीं परमनिःश्रेयससाधनस्य ब्रह्मज्ञानस्य प्रतिपादिकामुपनिषदमध्येतुं व्रतस्यावश्यकता भवेदिति चतुर्थं व्रतमुपनिषत्। ततश्च "चत्वारि वेदव्रतानि" इतिस्मार्तं वाक्यं समर्थितं भवतीति[1]। प्रकृतमनुसरामः।

---

१. "चत्वारि वेदव्रतानि" इत्यस्य गौतमवाक्यस्यापरो व्याख्यामार्गः—"वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्" इति स्मृत्या त्रैवर्णिकैः ऋग्यजुस्सामाथर्ववेदा अवश्यमध्येतव्याः। असंभवे वेदद्वयमेको वा वेदः। सर्वत्र स्वपितृपितामहादिभिर्यो वेदोऽधीतस्स एव प्रथममध्येतव्य इति जानीमः। तत्र प्रतिवेदं बह्वृचश्शाखा विराजन्ते। तासां सर्वासामध्ययनं नेष्टम्। एकस्याश्शाखाया अध्ययनेनैव समग्रवेदाध्ययनसिद्धिः। यदि त्रैवर्णिको ऋग्वेदी तर्हि समग्रां ऋग्वेदशाखामधीत्य याजमानार्थं द्वितीयं यजुर्वेदमेवाधीयीत, तदनु सामवेदम्। यजुश्शाखाध्यायी याजुषीं शाखामधीत्य हौत्रार्थं ऋग्वेदं तदनु सामवेदम्, छन्दोगः स्वां शाखामधीत्य याजमानार्थं यजुर्वेदम्, तदनु ऋग्वेदमथर्ववेदम्। सर्वेपि नित्यमग्निहोत्रहोमं कुर्युः। यजर्वेद एव स होम उत्पन्नः। तत्रैव मन्त्रास्सेतिकर्तव्यताका विहिताः। तदनु दर्शपूर्णमासादीनां सप्तहविस्संस्थानां काम्यानां चेष्टीनामनुष्ठानार्थं हौत्राध्वर्यवयाजमानपदार्थज्ञानार्थं च ऋग्यजुषोरध्ययनम्। सोमयागानामनुष्ठानाय ताभ्यां सह सामवेदाध्यनं इति दृष्टप्रयोजनक्रमेण वेदानामध्ययनं शिष्टसम्मतम्।

ननु "स्वाध्यायोऽध्येतव्यः" इत्यनेनैकस्यैव वेदस्याध्ययनं विधीयते। कथं वेदानामध्ययनविधायिका पूर्वोक्ता स्मृतिः प्रमाणं भवेत्, मूलप्रमाणविरोधात्। अत्रेदं समाधानम्—यावान्धर्मस्स सर्वोऽपि विधिभागेनैव बोधयितव्य इति नास्ति नियमः। मन्त्रवर्णेभ्योऽर्थवादेभ्यश्च धर्मपरिज्ञानं भवत्येव। मन्दमतिभिरस्माभिस्तत्रतत्रोपदिष्टा धर्मास्सम्यक् ज्ञातुं न शक्यन्त इति सर्वज्ञकल्पैर्मन्वादिभिस्ते स्वग्रन्थेषु तत एवावगत्य निर्बद्धाः। मन्त्रवर्णश्चैवमाम्नायते "यमृषयः त्रैविदा विदुः" इति। भरद्वाजमधिकृत्य प्रतिपादितार्थवादादप्ययमर्थः सिध्यतीति वेदान्तराध्ययनविधायिका स्मृतिरनुपपन्ना नो भवति। अस्यां स्थितौ चतुर्णां वेदानामध्ययनाय चत्वारि वेदव्रतानि भवन्ति। यथा वा वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयाणां चतुर्णां पर्वणां यथाशास्त्रानुष्ठानेनैकश्चातुर्मास्यक्रतुरनुष्ठितो भवति तथैवावान्तरव्रतानुष्ठानेनैकं वेदव्रतमनुष्ठितं भवेत्। यद्येवं न व्याख्यायते तदा स्वगृह्योक्तां व्रतपद्धतिं यथावदनुष्ठाय नियमं विनैवेतरेषां वेदानामध्ययनं भवेत्। तन्माभूदिति चत्वारि वेदव्रतानीत्याह। तत्र प्रतिवेदमुपनयनं पृथगनुष्ठेयमिति केचनाशेरते। अपरे पुनरुपनयनस्य नास्त्यवसर इति मन्यन्ते। अत्र यथा देशाचारो भवेत्तथा ग्राह्यः।

कलिकालेऽस्मिन्वेदव्रतानि नानुष्ठीयन्त इत्याह सुबोधिनीकारः। दाक्षिणात्ये जनपदे साम्प्रतमपि छन्दोगा व्रतमनुतिष्ठन्त्येव। इदानीं दक्षिणभारते छन्दोगाः प्रायोऽष्टौ व्रतानि नानुतिष्ठन्ति। प्रथममुपनयनव्रतमनुष्ठाय स्नातककर्माचरन्ति। शास्त्रविरुद्धमिदं भाति। वामनप्रदर्शितं मार्गं वास्मदभिहितं पन्थानं वाश्रित्य व्रतानुष्ठानेनैव व्रतापूर्वसिद्धिः।

एवं समग्रस्यापौरुषेयगानस्याध्ययनार्थं कानिचन व्रतानि निर्दिष्टानि । ऊहोह्यगानयोरध्ययनवेलायां न किञ्चिदनुष्ठेयं व्रतं पश्यामः । अतोऽपि पौरुषेयो भवेदयं भाग इत्युत्प्रेक्षे ।

अन्यच्च--ऊहोह्यगानानां लक्षणग्रन्थप्रणेता भगवान्पुष्ययशाः स्वकीये पुष्पसूत्रे भागस्यास्यानित्यत्वमभिप्रेत्य पौरुषेयत्वसूचकं पदं प्रयुनक्ति स्म । तथाहि तदीयं सूत्रम् "दैर्घेऽपराङ्गं नित्यमाचार्यनियमात्" इति । आचार्यनियमादिति पदेन पूर्वोक्त एवार्थोऽभिप्रेत इति प्रामाणिकानां वाक्यजालेभ्योऽवगतः । पदमिदं विवृणोति भाष्यकारोऽजातशत्रुः "आचार्यनियमात्-ऊहवशादित्यर्थः । ऊहकारो हि द्वयोरपि कल्पयोरनुषङ्गं गकारेण प्रत्यारम्भं कुर्वन्नुभयत्र गकारो भवति[1]" इति । अत्राचार्यपदमूहकारपदेन व्याख्यातम् । फुल्लदीपे नानाभाई इत्यपरसंज्ञकरामकृष्णदीक्षितोऽपि व्यचख्यौ—आचार्यस्य ऊहकारस्य नियमात् इति । अन्येऽप्येतत्सूत्रविवरणकर्तारः शिवरामशुक्लप्रभृतयोऽप्येवमेव व्याचचक्षिरे ।।

तदेवं मीमांसकसिद्धान्तात्, आर्षेयब्राह्मणेऽनुल्लेखात्, व्रताभावात्, प्रामाणिकानां वाक्यनिकुरम्बेभ्यश्च पौरुषेयोऽयं भागो भवेदिति सम्भावयामि । विचार फलम्-कां योनिगीतिमवलम्ब्योहरहस्यगता गीतयो भवन्तीति पट्टिकया प्रदर्शयिष्यामि–

अथोहगीतीनां योनिगानपट्टिका

क्रम-	सामनाम	योनिऋक्	वेयगाने स्थलनिर्देशः			साम-
संख्या			प्रपाठकः	अर्द्धः	साम.	संख्या
१	अग्नेस्त्रिणिधनम्	प्रसोमदेववीतये	१४	२	२०	४
२	अङ्गिरसांगोष्ठः	परीतोषिञ्चत	१४	२	१४	२
३	अङ्गिरसांसंक्रोशः	तिस्रोवाचः	१५	२	१	१
४	अच्छिद्रम्	परीतोषिञ्चत	१४	२	१	२
५	अदारसृक्	वयमिन्द्र	४	१	७	३
६	अध्यर्द्धेडंसोमसाम	यस्तेमदः	१३	१	६	२
७	अभिनिधनंकाण्वम्	वयंघत्वासु	७	१	३०	५
८	अभीवर्तः	तंवोदस्म	६	१	३४	१८
९	अयासोमीयम्	अयासोम	१४	१	१६	१
१०	अर्कपुष्पम्	पवित्रंते	१६	२	३४	४
११	अर्कपुष्पोत्तरम्	,,	१६	२	३५	२
१२	आकूपारम्	आतूनइन्द्र	५	१	१८	६
	,,	यदिन्द्रचित्र	९	१	३०	
१३	आक्षारम्	गृणेतदिन्द्र	१०	२	१९	२

[1] पुष्पसूत्रम् पृ. १८२. (प्रपाठकः ८. खण्डः ८.) ।

१४	आजिगम्	स्वादिष्ठयामदिष्ठया	१२	२	१४	२
१५	आतीषादीयम्	सोमः पुनानः	१७	१	३१	१
१६	आत्रेयम्	बृहद्वयोहि	२	२	२८	२
१७	आनिधनंत्वाष्ट्री	सुतासोमधु	१६	१	१९	१
१८	आनूपंवाध्र्यश्वम्	अश्वीरथी	७	२	२३	४
१९	आन्धीगवम्	पुरोजितीवः	१६	१	१२	९
२०	आभीकम्	उच्चातेजातम्	१२	२	४	२
२१	आभीशवाद्यम्	परीतोषिञ्चत	१४	२	५	१
२२	आभीशवोत्तरम्	,,	१४	२	६	४
२३	आमहीयवम्	उच्चातेजातम्	१२	२	१३	७
२४	आर्षभम्	अभित्वावृषभा	५	१	३	१
२५	आशुभार्गवम्	वृषापवस्वधारया	१२	२	२५	५
२६	आश्वम्	यस्तेनूनम्	३	२	५	२
२७	आश्वसूक्तम्	यदिन्द्राहम्	३	२	१९	५
२८	आसिताद्यम्	रायेअग्ने महे	३	१	३	५
२९	आसितोत्तरम्	,, ,, ,,	३	१	४	१
३०	आष्कारणिधनंकाण्वम्	वयंघत्वा	७	१	२८	५
३१	अष्टादंष्ट्रपूर्वम्	इन्द्रंविश्वाअवीवृधन्	९	१	२०	२
३२	आष्टादंष्ट्रोत्तरम्	इन्द्रंविश्वाअवीवृधन्	९	१	२१	४
३३	इडानांसंक्षारः	तमिन्द्रंवाजयामसि	३	२	१३	४
३४	इदावासिष्ठम्	वयमेनमिदा	७	२	१६	२
३५	इन्द्रस्य यशः	त्वमिन्द्रयशाः	६	२	३१	१
३६	इन्द्रस्यापामीवम्	इन्द्रायसोम	१६	२	२५	१
३७	इषोवृधीयम्	इन्द्रायेन्दो	१३	१	१३	१
३८	इहवद्दैवोदासम्	अयंतइन्द्र	४	२	३२	१
३९	इहवद्वामदेव्यम्	अग्निस्तिग्मेन	१	२	६	२
४०	ईनिधनमार्गीयवम्	तद्वोगायसुते	३	२	४	१
४१	उक्थ्यामहीयवम्	एवाह्यसिवीरयुः	६	१	२५	२
४२	उत्सेधः	प्रसोमदेववीतये	१४	२	२३	७
४३	उभयतस्तोभंगौतमम्	त्वमित्सप्रथाअसि	९	१	१	२
४४	उद्वत्प्राजापत्यम्	पुनानस्सोमधारया	१४	१	२७	१
४५	उद्वद्भार्गवम्	अचोदसोनोधन्वन्तु	१६	२	७	२
४६	उद्वंशपुत्रम्	प्रवइन्द्राय	१२	१	९	१
४७	उद्वंशीयम्	गायन्तित्वागायत्रिणः	९	१	१६	३
४८	ऊर्ध्वेडंत्वाष्ट्री	सुतासोमधुमत्तमः	१६	१	१७	३
४९	ऋषभः पवमानः	उच्चातेजातमन्धसः	१२	२	३	४

५०	ऐटतम्	गावउपवदावटे	३	२	६	३
५१	ऐडंकावम्	अभिप्रियाणिपवते	१६	२	२	१
५२	ऐडंकौत्सम्	यइन्द्रचमसेष्वा	५	१	४	५
५३	ऐडंक्रौञ्चम्	सोमाः पवन्त इन्दवः	१६	१	२५	१
५४	ऐडमायास्यम्	पुनानस्सोमधारया	१४	१	२५	४
५५	ऐडमौक्षणोरन्ध्रम्	मृज्यमानस्सुहस्त्या	१५	१	१२	१
५६	ऐडंमाण्डवम्	परीतोषिञ्चतासुतम्	१४	२	१२	१
५७	ऐडंयामम्	वृषामतीनांपवते	१६	२	२१	२
५८	ऐडंसौपर्णम्	उद्घेदभिश्रुतामघम्	३	२	२४	६
५९	ऐध्मवाहम्	आधायेअग्निमिन्धते	४	१	११,१२	३
६०	ऐषिरम्	अधाहीन्द्रगिर्वणः	११	१	१०	१
६१	ओकोनिधनम्	तमुअभिप्रगायत	१०	१	२९	२
६२	औक्षणोरन्ध्रम्	मृज्यमानः सुहस्त्या	१५	१	६	१
६३	औदलम्	सुरूपकृत्नुमूतये	४	२	३६	४
६४	औपगवम्	अपादुशिऽयन्धसः	४	२	१	१
६५	औरुक्षयम्	अदर्दरुत्समसृजः	८	२	४	१
६६	और्णायवाद्यम्	परिप्रियादिवः कविः	१३	१	३७	१
६७	और्णायवोत्तरम्	,,	१३	१	३८	१
६८	और्ध्वसद्मनम्	पुरोजितीवोअन्धसः	१६	१	१०	१
६९	औशनम्	प्रतुद्रवपरि, प्रेष्ठंवः	१५	१	३२;१.१.९	९
७०	कण्वबृहती	आत्वासहस्रमा	६	२	२४	५
७१	कण्वरथन्तरम्	पुनानस्सोमधारया	१४	१	२९	१०
७२	काक्षीवतम्	सोमानांस्वरणम्	४	१	२२	३
७३	काण्वम्	वयमुत्वातदिदर्थाः	४	२	२६	१
७४	कार्णश्रवसम्	तंवस्सखायोमदाय	१७	१	१६	१
७५	कार्तयशम्	पुरोजितीवोअन्धसः	१६	१	९	२
७६	कालेयम्	तरोभिर्वोविदद्वसुम्	६	२	७	१८
७७	कावम्	अभिप्रियाणिपवते	१६	२	६	१०
७८	काशीतम्	शंनोदेवीरभिष्टये	१	२	१८	२
७९	कुत्सस्याधीरथीयम्	प्रसेनानीः शुरोअग्रे	१५	२	१६	१
८०	कौल्मलबर्हिषम्	त्वंह्योहिचेरवेविदा	६	२	१५	३
८१	कौत्सम्	इन्द्रसुतेषुसोमेषु	१०	१	२६	१
८२	क्रतुवासिष्ठम्	इन्द्रक्रतुन्नआभर	७	१	२४	१
८३	क्रोशम्	इन्द्रसुतेषुसोमेषु	१०	१	२४	२
८४	क्रौञ्चम्	इदंह्यन्वोजसा	५	१	११	१
८५	क्रौञ्चाद्यम्	अयंपूषारयिर्भगः	१६	१	१३	६

८६	क्षुल्लककालेयम	तरोभिर्वो विदद्वसुम्	६	२	४	१
८७	क्षुल्लकवैष्टम्भम्	तिस्रोवाचउदीरते	१३	१	११	३
८८	गतनिधनबाभ्रवम्	उच्चातेजातमन्धसः	१२	२	६	१
८९	गायत्रपार्श्वम्	एषस्यधारयासुतः	१७	२	३१	३
९०	गारम्	इदंवसोसुतमन्धः	३	२	२३	१
९१	गूर्दम्	अग्नेत्वंनोअन्तम	१२	१	१२	१
९२	गोराङ्गीरसम्	कस्यनूनंपरीणसि	१	२	२१	१
९३	गौङ्गवम्	त्वमङ्गप्रशंसिषः	६	२	३०	५
९४	गौतमम्	इममिन्द्रसुतंपिब	९	१	२५	४
९५	गौतमस्यमनाज्यम्	यथागौरोअपाकृतम्	७	१	८	१
९६	गौरीवितम्	अभिप्रगोपतिंगिरा	५	१	२२	२२
९७	गौभृङ्गम्	तरणिरित्सिषाससति	६	२	११	१
९८	गौषूक्तम्	यदिन्द्राहंयथात्वम्	३	२	१८	६
९९	घृतश्चुन्निधनम्	इदंह्यन्वोजसा	५	१	१२	१
१००	च्यावनम्	असाव्यंशुर्मदाय	१३	१	२८	२
१०१	जनित्रम्	सोमः पवतेजनिता	१५	२	८	१
१०२	जनित्राद्यम्	नहिवश्चरमञ्चन	६	२	१७	५
१०३	जनित्रोत्तरम्	,, ,,	६	२	१८	२
१०४	जमदग्नेरभीवर्तः	पिबासुतस्यरसिनः	६	२	१४	१
१०५	जराबोधीयम्	जराबोधतद्विविड्ढि	१	१	२६	१६
१०६	जागतंवारुणम्	घृतवतीभुवनानाम्	१०	१	२०	१
१०७	तृतीयंक्रौञ्चम्	अयंपूषारयिर्भगः	१६	१	१५	२
१०८	तैरश्च्यम्	श्रुधीहवंतिरश्च्या	९	२	२	१
१०९	त्रासदस्यवम्	अच्छावइन्द्रंमतयः	१०	१	१७	२
११०	त्रिणिधनमायास्यम्	पुनानस्सोमधारया	१४	१	२८	३
१११	त्रिष्टुप्श्यावाश्वम्	आजुहोताहविषा	२	१	३४	१
११२	त्रैककुभम्	यएकइद्विदयते	१०	२	१४	२
११३	त्रैतम्	यत्सोममिन्द्रविष्णवि	१०	२	१	२
११४	त्रैशोकम्	विश्वाः पृतनाअभि	९	२	३५	१
११५	त्र्यन्तंत्वाष्ट्रौ	सुतासोमधुमत्तमः	१६	१	१६	२
११६	त्वाष्ट्री	ईङ्खयन्तीरपस्युवः	५	१	३२	१
११७	दक्षणिधनमौक्षम्	अद्यानोदेवसवितः	४	१	२४	२
११८	दाढर्च्यच्युतम्	अर्षासोमद्युमत्तमः	१४	१	१०	१
११९	दावसुनिधनम्	तमिन्द्रंवाजयामसि	३	२	११	३
१२०	दाशस्पत्यम्	इन्दुर्वाजीपवते	१५	२	२९	१
१२१	दीर्घम्	ससुन्वेयोवसूनाम्	१७	२	२२	१

१२२	दैर्घश्रवसम्	योविश्वादयतेवसु	२	१	६	८
१२३	दैवातिथम्	आत्वेतानिषीदत	५	१	९	१
१२४	दैवोदासम्	यस्यत्यच्छम्बरम्	१०	२	२१	३
१२५	दैवोदासोत्तरम्	,, ,,	१०	२	२४	१
१२६	द्यौतानम्	वृत्रस्यत्वाश्वसथात्	८	२	२२	२
१२७	द्वितीयंक्रौञ्चम्	अयंपूषारयिर्भगः	१६	१	१४	१
१२८	द्विरभ्यासंत्वाष्ट्री	सुतासोमधुमत्तमः	१६	१	२२	४
१२९	द्विरभ्यासंलौशम्	प्रोअयासीदिन्दुः	१६	२	१५	२
१३०	द्विरभ्यासमाकूपारम्	परित्यंहर्यतम्	१६	१	३०	२
१३१	द्विहिङ्कारं वामदेव्यम्	प्रसोमदेववीतये	१४	२	२२	५
१३२	द्वैगतम्	यच्छक्रासिपरावति	७	२	१	५
१३३	धर्म	पवस्वसोममहान्	११	२	२०	१
१३४	धुरासाकमश्वम्	त्वावतः पुरूवसो	५	२	१९	४
१३५	नानदम्	प्रत्यस्मैपिपीषते	९	२	१३	२
१३६	नामेंधम्	पाहिनोअग्नएकया	१	२	२७	२
१३७	निधनकामम्	अहमिद्धिपितुः परि	४	२	१३	१
१३८	निषेधः	प्रसोमदेववीतये	१४	२	२४	८
१३९	निह्नवम्	असाविदेवं गोऋजीकम्	८	१	३६	२
१४०	नैपातिथम्	यदिन्द्रप्रागपागुदक्	७	२	२७	४
१४१	नौधसम्	तंवोदस्ममृतीषहम्	६	१	३७	१०
१४२	पञ्चम्	यदाकदाचमीढुषे	८	१	७	१
१४३	पदनिधनशुद्धाशुद्धीयम्	एतोन्विन्द्रंस्तवाम	९	२	७	७
१४४	पार्थम्	सुष्वाणासइन्द्र	८	२	६	७
१४५	पाष्ठौहम्	तिस्रोवाचउदीरते	१३	१	१२	१
१४६	पूर्वयामम्	अग्नेमृडमहाँअसि	१	२	७	१
१४७	पूर्ववारवन्तीयम्	अश्वंनत्वावारवन्तम्	१	१	२८	१
१४८	पूर्ववासिष्ठम्	अस्यप्रेषाहेमना	१५	२	४	३
१४९	पृष्ठम्	पित्रासुतस्यरसिनः	६	२	१२	३
१५०	पौरुमद्गम्	अग्नेजरितर्विश्पतिः	१	२	३२	२
१५१	पौरुमीढम्	अग्निमीडिष्वावसे	२	१	१६	३
१५२	पौरुहन्मनम्	योराजाचर्षणीनाम्	७	२	१७	५
१५३	पौष्कलम्	इन्द्रमच्छसुताइमे	१७	१	५	८
१५४	प्रतीचीनेडंकाशीतम्	वातआवातुभेषजम्	५	२	८	४
१५५	प्रतोदम्	परीतोषिञ्चतासुतम्	१४	२	१४	१
१५६	प्रमंहिष्ठीयम्	प्रमंहिष्ठायगायत	३	१	२६	१
१५७	प्रवद्भार्गवम्	प्रोअयासीदिन्दुः	१६	२	१६	२

१५८	प्लवः	पुनानस्सोमधारया	१४	१	३४	२
१५९	बार्हदुक्थम्	नत्वाबृहन्तोअद्रयः	८	१	१७	४
१६०	बृहत्कम्	आगन्तामारिषण्यत	११	१	१	१
१६१	बृहदाग्नेयम्	त्वंहिक्षैतवद्यशः	२	२	२३	२
१६२	बृहद्भारद्वाजम्	अग्निदूतंवृणीमहे	१	१	५	१
१६३	भरद्वाजस्यपृश्नि	बृहद्भिरग्नेअर्चिभिः	१	२	२९	७
१६४	भारद्वाजम्	आत्वासहस्रमाशतम्	६	२	२३	३
१६५	भासम्	यस्तेमदोवरेण्यः	१३	१	५	३
१६६	मधुश्चुन्निधनम्	सपूर्व्योमहोनाम्	९	२	१७	३
१६७	मरायम्	अग्निनरोदीधितिभिः	२	२	९	५
१६८	मरुतांधेनु	त्रिरस्मैसप्तधेनवः	१६	२	२४	२
१६९	महावैश्वामित्रम्	इन्द्रंविश्वाअवीवृधन्	९	१	२२	३
१७०	महावैष्टम्भम्	वयंघत्वासुतावन्तः	७	१	३१	७
१७१	माण्डवम्	अग्नेविवस्वदुषसः	१	२	३४	१
१७२	माधुच्छन्दसम्	त्वामिदाह्वोनरः	८	१	२३	३
१७३	मानवाद्यम्	नित्वामग्नेमनुर्दधे	२	१	२२	४
१७४	मानवोत्तरम्	प्रोअयासीदिन्दुरिन्द्रस्य	२	१	२३	४
१७५	मारुतम्	पुरांभिन्दुर्युवाकविः	९	२	२१	१
१७६	मार्गीयवम्	तद्वोगायसुतेसचा	३	२	१	८
१७७	मैधातिथम्	माचिदन्यद्विशंसत	६	२	१९	३
१७८	यज्ञसारथि	इमंस्तोममर्हतेजातवेदसे	२	१	३८	१
१७९	यज्ञायज्ञीयम्	यज्ञायज्ञावोअग्नये	१	२	२५	२४
१८०	यद्वाहिष्ठीयोत्तरम्	यद्वाहिष्ठंतदग्नये	२	२	२६	३
१८१	यामम्	प्रोअयासीदिन्दुरिन्द्रस्य	१६	२	१८	१
१८२	यामोत्तरम्	अग्नेमृडमहाँअसि	१	२	८	१
१८३	यौक्तश्रुचम्	इन्द्रमिद्देवतातये	७	१	१	२
१८४	यौक्ताश्वाद्यम्	वृषापवस्वधारया	१२	२	३०	१
१८५	यौक्ताश्वोत्तरम्	,, ,,	१२	२	३१	१
१८६	यौधाजयम्	पुनानस्सोमधारया	१४	१	३६	१०
१८७	रयिष्ठम्	परीतोषिञ्चतासुतम्	१४	२	२	३
१८८	रोहितकूलीयाद्यम्	एन्द्रसानसिंरयिम्	४	१	१	४
१८९	रोहितकूलीयोत्तरम्	,, ,,	४	१	२	१
१९०	रौरवम्	पुनानस्सोमधारया	१४	१	३५	५
१९१	लौशाद्यम्	प्रोअयासीदिन्दुरिन्द्रस्य	१६	२	१४	२
१९२	वरुणसाम	प्रमित्रायप्रार्यम्णे	७	१	१८	३
१९३	वसिष्ठप्रियम्	इममिन्द्रसुतंपिब	९	१	२७	२

१९४	वषट्कारणिधनम्	अभित्वापूर्वपीतये	७	१	१९	५
१९५	वाङ्निधनंक्रौञ्चम्	अभीनोवाजसातमम्	१६	१	२९	४
१९६	वाङ्निधनंसौहविषम्	परि.धन्वेन्द्राय	११	२	१५	१
१९७	वाचस्साम	आसोतापरिषिञ्चत	१७	२	१५	३
१९८	वाजजित्	अभिप्रियाणिपवते	१६	२	५	२
१९९	वाजजित्पूर्वम्	मृज्यमानः सुहस्त्या	१५	१	१३	१
२००	वाजदावर्यः	रेवतीर्नस्सधमादे	४	२	१४	२
२०१	वात्सम्	आतेवत्सोमनोयमत्	१	१	१६	१
२०२	वात्सप्रम्	जगृह्मातेदक्षिणंहस्तम्	८	२	१०	२
२०३	वात्सप्राद्यम्	,, ,, ,,	८	२	११	१
२०४	वामदेव्यम्	कयानश्चित्रआभुवत्	५	१	२५	१२
२०५	वाम्रम्	नसोमदेवआपः	७	२	६	३
२०६	वायोरभिक्रन्दम्	इन्द्रायसोमसुषुतः	१६	२	२६	१
२०७	वारवन्तीयम्	अश्वंनत्वावारवन्तम्	१	१	३०	२२
२०८	वाराहम्	प्रकाव्यमुशनेव ब्रुवाणः	१५	१	३६	२
२०९	वार्त्रतुरम्	यजामहइन्द्रम्	९	१	४	१
२१०	वार्शम्	आतेदक्षंमयोभुवम्	१४	१	२	२
२११	वाशम्	कईंवेदसुतेसचा	९	१	१८	३
२१२	वासिष्ठमाद्यम्	अस्यप्रेषाहेमनाः	१५	२	५	३
२१३	वासिष्ठमासितम्	प्रमंहिष्ठायगायत	३	१	२८	२
२१४	वासिष्ठोत्तरम्	अस्यप्रेषाहेमना	१५	२	६	४
२१५	विकल्पमारुतम्	एन्दुमिन्द्रायसिञ्चत	१०	२	७	१
२१६	विधर्म	पवस्वसोममहे	११	२	२१	१
२१७	विलम्बसौपर्णम्	उद्धेदभिश्रुतामघम्	३	२	२६	३
२१८	विशोविशीयम्	विशोविशोवोअतिथिम्	२	२	२७	४
२१९	वीङ्कम्	यदिन्द्रचित्रमइह	९	१	३१	१
२२०	वैखनंसोमसाम	अभित्यंमेषंपुरुहूतम्	१०	१	१८	१
२२१	वैखानसम्	नकिष्टंकर्मणानशत्	६	२	२०	२
२२२	वैतहव्यम्	पान्तमावोअन्धसः	४	२	१८	२
२२३	वैदन्वतचतुर्थम्	परिस्वानोगिरिष्ठाः	१३	१	३४	१
२२४	वैदन्वततृतीयम्	,, ,, ,,	१३	१	३३	१
२२५	वैदन्वताद्यम्	,, ,, ,,	१३	१	३१	१
२२६	वैधृतंवासिष्ठम्	एषप्रकोशेमधुमान्	१६	२	१३	१
२२७	वैयश्वम्	उभयंशृणवच्चनः	८	१	१०	३
२२८	वैरूपम्	अध्वर्योअद्रिभिस्सुतम्	१४	१	५	३
२२९	वैश्वज्योतिषमध्यमम्	प्रगायताभ्यर्चाम	१५	२	२०	१

२३०	वैश्वज्योतिषमुत्तरम्	प्रहिन्वानोजनिता	१५	२	२१	१
२३१	वैश्वज्योतिषाद्यम्	प्रतेधारामधुमतीः	१५	१	१९	१
२३२	वैश्वमनसम्	एतोन्विन्द्रंस्तवाम	१०	२	८	१
२३३	वैश्वामित्रम्	असाविसोमइन्द्रते	९	२	३	१
२३४	वैष्णवाद्यम्	तवाहंसोमरारण	१०	१	१	१
२३५	वैष्णवोत्तरम्	,, ,,	१०	१	२	१
२३६	शङ्कु	एतमुत्यंमदच्युतम्	१७	२	१८	४
२३७	शाकलम्	यदद्यकच्चवृत्रहन्	३	२	२७	२
२३८	शाक्त्यम्	प्रवइन्द्रायमादनम्	४	२	१९	१
२३९	शाक्वरवर्णम्	सुरूपकृत्नुमूतये	४	२	३३	२
२४०	शाम्मदम्	पवस्वदेवआयुषक्	१३	२	१३	३
२४१	शार्करम्	योनइदमिदंपुरा	१०	२	३५	१
२४२	शार्ङ्गम्	अञ्जतेव्यञ्जतेसमञ्जते	१६	२	३३	१
२४३	शुद्धाशुद्धीयम्	एतोन्विन्द्रंस्तवाम	९	२	७	२
२४४	शैखण्डिनम्	श्रत्तेदधामिप्रथमाय	१०	१	१	१
२४५	शैशवम्	उच्चातेजातमन्धसः	१२	२	८	२
२४६	शौक्तम्	सखायआनिषीदत	१७	१	१५	२
२४७	श्नौष्ठम्	अयापवापवस्वैना	१६	१	१	१
२४८	श्यावाश्वम्	पुरोजितीवोअन्धसः	१६	१	११	१०
२४९	श्येनः	उभेयदिन्द्ररोदसी	१०	१	२२	१
२५०	श्यैतम्	अभिप्रवः सुराधसम्	६	१	३२	९
२५१	श्रायन्तीयम्	श्रायन्तइवसूर्यम्	७	२	५	३
२५२	श्रुध्यम्	अग्नेवाजस्यगोमतः	३	१	१५	१७
२५३	श्रौतकक्षम्	इन्द्रायमद्वनेसुतम्	४	२	२९	२
२५४	सत्रासाहीयम्	त्यमुवस्सत्रासाहम्	५	१	२७	१४
२५५	सदोविशीयम्	पुनानस्सोमधारया	१४	१	३१	३
२५६	सन्तनि	एषस्यधारयासुतः	१७	२	३२	८
२५७	सफम्	पवस्वमधुमत्तम	१७	२	५	८
२५८	समन्तम्	त्वमग्नेगृहपतिः	२	१	३०	८
२५९	सञ्जयम्	आतेअग्नइधीमहि	११	२	२	१
२६०	सम्पा	अभित्रिपृष्ठंवृषणम्	१५	२	१०	२
२६१	संहितम्	स्वादिष्ठयामदिष्ठया	१२	२	२२	८
२६२	सहोदैर्घतमसम्	पिबासोममिन्द्र	१०	२	३२	४
२६३	साकमश्वम्	एहूषुब्रवाणि	१	१	१४	३
२६४	साध्यम्	यजिष्ठंत्वाववृमहे	३	१	३७	१
२६५	साध्रम्	त्वमिन्द्रयशाअसि	६	२	३२	५

२६६	साप्तिकमायास्यम्	पुनानस्सोमधारया	१४	१	३०	२
२६७	सामराजम्	अचोदसोनोधनुवन्तु	१६	२	९	२
२६८	सामराजस्वारम्	,, ,,	१६	२	११	१
२६९	संवर्तम्	एन्द्रनोगधिप्रिय	१०	२	२६	१
२७०	सिमानांनिषेधः	अचोदसोनोधनुवन्तु	१६	२	१२	१
२७१	सुज्ञानम्	सोमः पुनानऊर्मिणा	१७	१	२६	८
२७२	सुरूपाद्यम्	स्वादिष्ठयामदिष्ठया	१२	२	१५	२
२७३	सुरूपोत्तरम्	,, ,,	१२	२	१६	६
२७४	सैन्धुक्षितम्	अग्निवोवृधन्तम्	१	२	१	२
२७५	सैन्धुक्षितमैडम्	,, ,,	१	२	३	४
२७६	सोमसाम	यस्तेमदोवरेण्यः	१३	१	२	२
२७७	सोमसाम सत्सन्दस्यम्	पुनानस्सोमधारया	१४	१	२४	२
२७८	सौग्मतम्	आतेअग्न इधीमहि	११	२	१	१
२७९	सौभरम्	तंगूर्धया स्वर्णरम्	३	१	३१	७
२८०	सौमित्रम्	इन्द्रइषे ददातुनः	५	२	२६	४
२८१	,,	इन्द्रायसामगायत	१०	२	११	१
२८२	सौमेधम्	योगेयोगेतवस्तरम्	५	१	८	१
२८३	सौश्रवसम्	अपादुशिप्रन्धसः	४	२	२	२
२८४	सौहविषम्	परिप्रधन्वेन्द्राय	११	२	११	१
२८५	स्वः पृष्ठम्	अभिसोमासआयवः	१५	१	१८	२
२८६	स्वर्णिधनं सौहविषम्	परिप्रधन्वेन्द्राय	११	२	१३	१
२८७	स्वारंकौत्सम्	यइन्द्रचमसेष्वा	५	१	५	२
२८८	स्वारंत्वाष्ट्री	सुतासोमधुमत्तमः	१६	१	२१	३
१८९	स्वारंसौपर्णम्	उद्घेदभिश्रुतामघम्	३	२	२५	५
२९०	हरिश्रीनिधनम्	गिर्वणःपाहिनस्सुतम्	५	२	२१	२
२९१	हारायणम्	शग्ध्यूषुशचीपते	७	१	११	३
२९२	हारिवर्णम्	तंतेमदंगृणीमसि	१०	१	३४	१
२९३	हाविष्कृतम्	देवानामिदवोमहत्	४	१	२०	३
२९४	हाविष्मतम्	,, ,,	४	१	१९	४

एतेनेदमपि ज्ञातम् —अष्टनवत्युत्तरैकशतोत्तरसहस्रसंख्याकेषु ग्रामेगेयगतेषु सामसु केवलं चतुर्नवत्युत्तरद्विशतसामान्येवाश्रित्यायं भागः कल्पित इति । तत्रापि क्वचिदेकं द्वे बहूनि सामानि गीत्वा ९३६ मन्त्रान्सम्पादयन्ति । तस्यैव भागस्य विनियोगं प्रत्यपादयत् भगवान्मशको गार्ग्यः स्वकीये आर्षेयकल्पसूत्रे । क्षुद्रसूत्रकारश्च क्षुद्रसूक्तश्रौतसूत्रे ।

अथोह्यगीतीनां योनिगीतिपट्टिका

			आरण्यकगाने स्थलनिर्देशः			
			प्रपाठकः	अर्द्धः	साम-	
१	अग्नेरर्कः	अग्निर्मूर्धादिवः	१	२	७	३
२	अग्नेर्व्रतम्	,,	६	१	१	१
३	अञ्जोवैरूपम्	यद्यावहन्द्रते	१	१	१	१
४	अतिषङ्गम्	पुरोजितीवः	१	२	२२	३
५	अन्तरिक्षम्	पिबासुतस्य	१	१	९	६
६	अपत्यम्	उच्चातेजातम्	३	१	१२	१
७	अपांव्रतम्	समन्यायन्युप	४	२	३,४	२
८	अरिष्टम्	पवित्रंते विततम्	१	१	११	२
९	अश्विनोव्रतम्	इमाउवां दिविष्टये	४	१	१५,१६	२
१०	अष्टेडपदस्तोभम्	धर्तादिवः पवते	१	२	२५	२
११	आज्यदोहानि	मूर्द्धानंदिवोअरतिम्	१	२	१८,१७,१६	३
१२	आथर्वणम्	शन्नोदेवीरभिष्टये	१	१	२३	९
१३	आभ्राजम्	अग्निमूर्द्धा	६	१	६	१
१४	इलान्दम्	अग्निरस्मिजन्मना	५	१	१	१
१५	ईनिधनवार्कंजम्भोत्तरम्	प्रवइन्द्रायबृहते	३	१	२८	२
१६	उद्भित्	उपत्वाजामयोगिरः	२	२	९	१
१७	ऋषभशाक्वरः	स्वादोरित्थाविषूवतः	१	२	२१	१
१८	ऋषभरैवतः	सुरूपकृत्नुमूतये	१	२	१९	१
१९	ऋषभो वैराजः	पिबासोमम्मिन्द्र	१	२	२०	५
२०	एकवृषम्	यएकइद्विदयते	२	१	१४	१
२१	गवांव्रतम्	तेमन्वतप्रथमम्	४	१	१७	१
२२	,,	अग्निमीडेपुरोहितम्	४	१	१८	१
२३	चतुरिडपदस्तोभम्	धर्त्तादिवः पवते	१	२	२७	१
२४	चतुर्थस्वरम्	यज्जायथाअपूर्व्य	३	२	१२	२
२५	तृतीयस्वरम्	,,	३	२	११	२
२६	तौरश्रवाद्यम्	यदिन्द्रशासो	३	१	५	१
२७	तौरश्रवोत्तरम्	,,	३	१	६	१
२८	दीर्घतमसोऽर्कः	धर्तादिवः पवते	१	२	४	८
२९	देवस्थानम्	पिबासुतस्यरसिनः	१	१	१५	३
३०	द्वितीयस्वरम्	यज्जायथाअपूर्व्य	३	२	१०	२
३१	द्विरिडपदस्तोभम्	धर्तादिवः पवते	१	२	२८	१
३२	नित्यवत्सम्	अयांरुचाहरिण्यापुनानः	२	१	३०	६
३३	पञ्चनिधनंवामदेव्यम्	कयानश्चित्रआभुवत्	२	१	३०	१

३४	पञ्चनिधनंवैरूपम्	यद्यावइन्द्रतेशतम्	१	१	३	३
३५	पयः	अग्नेयुंक्ष्वाहियेतव	३	१	८	१
३६	पार्थुरश्मम्	स्वादोरित्थाविषूवतः	३	१	१८	२
३७	प्रथमस्वरम्	यज्जायथाअपूर्व्य	३	२	९	२
३८	प्रसर्पम्	चर्षणीधृतंमघवानम्	२	१	२	१
३९	बलभित्	उपत्वाजामयोगिरः	२	२	१०	१
४०	बार्हद्गिरम्	इन्द्रोमदायवावृधे	३	१	१६	१
४१	बृहत्	त्वामिद्धिहवामहे	१	१	२७	२४
४२	भद्रम्	इमानुकंभुवना	३	१	२१	१
४३	भर्गः	बृहदिन्द्रायगायत	२	२	११	४
४४	भासम्	प्रक्षस्यवृष्णोअरुषस्य	६	१	८	२
४५	भ्राजम्	अग्नआयूंषिपवसे	६	१	५	१
४६	मरुतांसंस्तोभम्	प्रवइन्द्रायबृहते	१	२	६	२
४७	महादिवाकीर्त्यम्	विभ्राड्बृहत्पिबतु	६	१	१५	५
४८	महावैराजम्	पिबासोममिन्द्र	२	१	३१	३
४९	महासाम	प्रयच्चक्रमराण्णे	२	१	२६,२७	२
५०	यण्वम्	इन्द्रमिद्गाथिनोबृहत्	३	१	११	१
५१	यशः	तवेदिन्द्रावमंवसु	२	२	१२	२
५२	यामम्	अग्निमीडेपुरोहितम्	४	१	१३	१
५३	रथन्तरम्	अभित्वाशूरनोनुमः	२	१	२१	२३
५४	राजनम्	इन्द्रंनरोनेमधिता	४	२	१९	१
५५	रायोवाजीयम्	स्वादोरित्थाविषूवतः	३	१	१४	५
५६	रेवती	रेवतीर्नः सधमादे	२	१	१७	३
५७	वाकँजम्भाद्यम्	प्रवइन्द्रायबृहते	३	१	२७	६
५८	वार्षाहरे	त्वमेतदधारयः	२	२	२०,२१	२
६९	विकर्णम्	विभ्राट्बृहत्पिबतु	६	१	७	३
६०	वृष्णि	योनइदमिदंपुरा	२	१	१५	१
६१	शाक्वरवर्णम्	उच्चातेजातमन्धसः	२	१	१९	१
६२	श्येनः	उभेयदिन्द्ररोदसी	३	१	१९	१
६३	श्रेयः	इमानुकंभुवना	३	१	२२	१
६४	षडिडपदस्तोभम्	धर्त्तादिवः पवते	१	२	२६	१
६५	सङ्कृति	स्वादोरित्थाविषूवतः	३	१	१७	३
६६	सप्तहम्	त्वामिद्धिहवामहे	२	१	२२	२
६७	संसर्पाद्यम्	चर्षणीधृतंमघवानम्	२	१	१	१
६८	संसर्पोत्तरम्	" "	२	१	३	१
६९	सिमाः	विदामघवन्विदा	महानाम्न्यः			२

७०	स्वाशिरामकँः	स्वादिष्ठयामदिष्ठया	१	२	३	६
७१	ह्रस्वावँरूपम्	यद्यावइन्द्रतेशतम्[1]	१	१	२	४

तदेतत्सर्वमपरे व्युत्थापयन्ति समाश्रयन्ति चानयोरपि भागयोरपौरुषेयत्वम्। तथाहि—"पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्वेदे"इति यास्कः सर्वेषां वेदानामपौरुषेयत्वं प्रतिपादयति। तत्र कर्मसम्पत्तिर्मन्त्राणां प्रयोजनम्। कर्मणः सम्पत्तिः कर्मसम्पत्तिः। मन्त्रानुच्चारयन्तस्तदवगमितार्था यदि यज्ञमनुतिष्ठेम तदानीमेव तत्फलं लभेमहि। पुरुषवाक्येषु विद्याया अनित्यत्वात् मन्त्रेषु तदसंभवान्मन्त्रा आम्नाता इति प्रघट्टार्थः। "ऋचो यजूंषि सामानि" इति मन्त्रवर्णादिमे मन्त्रास्त्रिविधाः। यथा होत्रध्वर्यू स्वकीयमपौरुषेयं मन्त्रभागमुच्चार्य यज्ञं समृद्धं कुरुतस्तथैवोद्गातापि भागाभ्यामाभ्यां स्तुतिं संपादयन्यज्ञं समर्द्धयति इति स्थितम्। यद्ययं भागः पौरुषेयः तर्हि इकारस्य क्वचिदाइभावः क्वचिच्च ओइ—भावः क्वचिदन्यथा क्वचित्ततोऽन्यथा च दृश्यते इति विश्वासाभावादस्माकं सन्देहो भवेदूहगाने। पुरुषापराधाच्च यज्ञो नश्यन्यजमानं नाशयेत्। अतोऽवश्यं पुरुषविद्यापरिहारार्थं मन्त्रत्वसामान्यादपौरुषेयत्वं स्वीकर्तव्यमेवेति।

पूर्वपक्षोक्तान्हेतूनपि खण्डयन्ति स्म। यदपि मीमांसकमतेन पौरुषेयत्वमनयोः स्थापितं तदपि न चमत्कृतिमावहति। यैरेव कारणैर्वेयारण्यकगानयोरपौरुषेयत्वं समर्थितं भट्टपादैः कल्पसूत्राधिकरणे—

> सामवेदे यदोग्नाइप्रभृतीनां प्रयुज्यते।
> रूपं तत्रापि पौंस्नत्वे नाभिप्रायोऽस्ति कश्चन॥

को नाम बुद्धिपूर्वकारी पुरुषोऽर्थाभिधानपराणामृगक्षराणां लोकव्याकरणादिष्वनवगतपूर्वमग्न इत्यस्य पदस्याकारमोकारेण प्लुतेन विकुर्यात्।

> तथा वीतय इत्यस्मिन्नीकारस्यापि विक्रियाम्।
> तशब्दस्य च तोशब्दं येशब्दस्यायिरूपताम्।
> को मूढो बुद्धिपूर्वो वा नियमात्कल्पयिष्यति।
> तेन वेदस्वतन्त्रत्वं रूपादेवावगम्यते॥

इत्यादि, तेषां हेतूनामत्रापि सद्भावात्। तथाहि "एवाह्यसिवीरयुः" इत्यत्र हिपदं सौभरे साम्नि गानकाले हो भवति—"एवाऽ३ हो ऽ३ असिवीरयोवा"इति। हो असि इति गाने न कश्चन शब्दार्थो भवति। ऋक्पाठे ह्यर्थोऽवगतः। कथं वा इकारस्यौकारः कर्तव्य इति ज्ञातः प्रयुक्तश्च। ननु "आइप्राप्तमोइ भवति" इति पुष्पसूत्रवचनादवगत्य तथा प्रयुक्तमिति। हन्त विचारयतु भवान् सिद्धेषु वेदेष्वसंमोहायाध्येतॄणां लक्षणग्रन्थान्प्राणयन् महर्षयः। न तु महर्षिवाक्यानि पूर्वमभूवन्।

---

[1] चतुर्नवत्युत्तरद्विशतसंख्याकेषु साम्सु साम्नामेकसप्तति गायन्ति। क्वचिदेकं द्वे बहूनि इति २०९ सामानि गीतानि। भूरादिपञ्च व्याहृतिसामानि स्तोभेषु भवन्ति। अश्वव्रतस्य प्रकृतरहस्यग्रन्थे योनिसाम नास्ति। शाखान्तरीयं साम दृष्ट्वा गीतम्।

हिशब्दस्य ओइभावो भवतु "तालव्यमाइ यद्वृद्धम्" इति सूत्रेण आइभावे कृते तथैवोच्चारणं मास्तु इति ओइभावार्थं सूत्रं प्राणयत्। सुहृद्भूत्वोपदिशति लक्षणशास्त्रम्। न तु लक्षणानुरोधेन लक्ष्यसिद्धिः। पौरुषेयेषु सर्वं भवितुं शक्यते। एवं द्युम्नानि मानुषाणाम् इति द्वे पदेऽर्थाभिधानपरायणे को नाम बुद्धिपूर्वकारी द्युम्नाना-
२ १ २
ऽऽइमाऽऽ। नुषाऽऽइ ३ णाम् इति द्युम्नानिमा, नुषाणाम्-एवं छेदं कृत्वाऽनर्थकतामापादयेत्।

किञ्च सर्वतन्त्रवेत्ता भट्टपादः बह्वभिप्राययुक्तं संक्षिप्तं शाबरवाक्यं विवृण्वन्संभावितान् दोषान् यथावदुद्घाटय पूर्वापरविरोधाभावेन समर्थयामास। स्वेनैव स्थापितानां वेदापौरुषेयत्वकारणानां प्रकृतगानयोः प्राप्तिं सम्भाव्य किमर्थं न निवारयामास "सामानि मन्त्रम्" इत्यधिकरणे।

अपि च कल्पसूत्रकारान्मशकाश्वलायनादीनिवानयोर्भागयोः कर्तॄन्न स्मरन्ति शिष्टाः। एतेन कर्त्रस्मरणं तु चिरकालव्यवधानादुपपन्नमिति यदुपवर्णयन्ति तन्नातीव मनोहरम्। पश्यन्तु प्रामाणिकानां वैदिकमूर्द्धन्यानां वचांसि वेदानामपौरुषेयत्वसाधने—"अतोऽवश्यं स्मर्तव्यानां पुरुषधौरेयाणां वेदकर्तॄणां कदापि यदा विस्मरणमद्यत्वे वा पूर्वतने वा नासीत्तदास्य वेदराशेर्नास्त्येव कर्तेति निश्चय एव साधीयान्। कर्तुरुच्छेदो हि क्वचिद्देशस्यैवोच्छेदेन वा अध्येतृपुरुषाणां सर्वनाशेन वा भवितुमर्हति। न तदुभयमत्र सम्भाव्यते" इत्यादि। येन न्यायेन वेदानां साधिताऽनादिता पुरा स सर्वोऽप्यत्र जागर्ति भागयोरपौरुषेयत्वे।

यदपि "यद्योन्यां तदुत्तरयोर्गायति" इति विधिवाक्यबलादनयोः पौरुषेयत्वं साधितं तदप्यपौरुषेयवादिनामनुकूलमेव। तथा हि—योनिपदस्य द्विविधोऽर्थः सम्पादनीयः। एकस्तावत् योन्यां यस्यामृचि सामोत्पन्नम्- यथा वा—रथन्तरं साम बृहत्यामभित्वाशूर इत्यस्यामुत्पन्नमिति सा ऋक् अभित्वा योनिः भवति। तत्र यत्साम रथन्तरं यथागीतं तद्वदेव तत्सूक्तस्थयोरुत्तरयो ऋचोर्गेयम् इति। द्वितीयस्तु—वृषापवस्वेति तृचेऽप्यामहीयवं गीयते। तत्र पूर्वोक्तोऽर्थोऽनुपपन्नः। आमहीयवसाम च "उच्चातेजातमन्धसः" इत्यस्यामृच्युत्पन्नं न तु वृषापवायाम्। अतः तृचे या प्रथमा ऋक् साऽपि योनिशब्देन व्यवहर्तव्या। तत्र यत्साम गीतं तदेवोत्तरयोरपि भवेत् इति। एतादृशो द्विविधोऽप्यर्थः पौरुषेयतासम्पादनाय न प्रभवति। त्रिष्वपि मन्त्रेषु पूर्वमेव गानं सिद्धम्। तदवलोक्य कस्यचन सन्देहो भवेत् छन्दोनामके ग्रन्थे सर्वाणि सामान्येकस्यामेवर्चि दृष्टानि। तथात्रापि भवितव्यम् न तु बह्वीष्वृक्ष्वेकमेव साम इति। ततश्चोत्तरसाम्नोरनाश्वासः स्यात्। तस्य सन्देहमपनुदति शास्त्रं "यद्योन्यां तदुत्तरयोर्गायति" इत्यपि वक्तुं शक्यते। तत्राज्ञातार्थं ज्ञापयन्विधिरनुकूलो भविष्यति। श्रुतिषु स्मृतिषु वा पौरुषेयत्वमनयोर्नोपदिष्टम्। अतस्तन्मूला शिष्टोक्तिरपि प्रमाणपदवीमारोढुं शक्नोति।

यदप्यार्षेयब्राह्मणमुल्लिख्य पौरुषेयत्वं साधितं तदप्यपेशलम्। अत्रत्यानां

साम्नां यथाक्रममृषिसंज्ञे भागान्तरे विवृतमिति पिष्टपेषणं माभूदित्युपेक्षितं आर्षेय-ब्राह्मणे। अस्ति ताण्डयब्राह्मणं प्रौढब्राह्मणं पञ्चविंशब्राह्मणमित्यनेकधा व्यवह्रियमाण-माद्यं ब्राह्मणं छन्दोगानाम्। येन क्रमेणामहीयवादीनि सामानि गीयन्ते तेनैव क्रमेण तेषां ऋषीन् संज्ञाः प्रयोगं च निर्दिशति तत्। न हि क्वचिदश्रवणमन्यत्र श्रुतं निवार-यितुमुत्सहते।

यदपि व्रताभावादनयोः पौरुषेयत्वं प्रतिष्ठापयति पूर्वपक्षी तत्रोच्यते यान्वेदभागान्व्रतं विनैवाध्यापयन्ति शिष्टास्तेषां किं पौरुषेयत्वम्, किमु तादृशीनामृ-चामाहोस्वित्तादृशानां साम्नामिति पृष्टो भवान्प्रथमं कल्पं न स्वीकरोति। यतोहि व्रतं विनैव ताण्ड्यब्राह्मणादीन् सप्त वेदभागानध्यापयन्ति। तेषां पौरुषेयता स्यात्। एषां ब्राह्मणानामपौरुषेयत्वं वार्तिककारः कण्ठतः स्थापयामास। तथा हि—"न असन्नियम-मात्"इति जैमिनिसूत्रं व्याख्यातं भाष्यकारैः "नैतदेवम्। असन्नियमात्। नैतत्सम्य-ङ्निबन्धनम्। स्वराभावात्" इति। स्वराभावात्पौरुषेयत्वं स्थापितमसङ्गतमिति मन्यमानो वार्तिककार आह "यत्तु भाष्यकारेण स्वराभावादित्यनियमार्थं व्याख्यानम् कृतम्—

तन्मन्त्रेष्वप्यवेदत्वं कल्पाधीतेषु साधयेत्।
तथा गृह्योपदिष्टेषु, छान्दोग्यब्राह्मणेषु च।
ब्राह्मणान्यपि यान्यष्टौ सरहस्यान्यधीयते।
छन्दोगास्तेषु सर्वेषु न कश्चिन्नियतस्वरः॥
तेन तेष्वप्यवेदत्वं स्वराभावात्प्रसज्यते।
तस्मादुक्तस्वसंवेद्यरूपाभावोऽत्र कारणम्॥ इति।

स्वराभावात्पौरुषेयत्वमिति यदि वर्ण्यते तर्हि छान्दोग्यब्राह्मणेषु स्वराभावात्पौरुषेयत्व-मापतेत्। अपौरुषेयाणीमानि छन्दोगब्राह्मणानि, इति वार्तिकाशयः।

द्वितीयः पक्षोऽपि न। द्वितीयं पक्षं स्वीकुर्वन् भवान्—

नन्वेवं तुरगारूढस्तुरङ्गं विस्मृतो भवान्।
वेदप्रामाण्यसिध्यर्थमुत्थितस्तत्प्रहीणवान्॥

इति मिश्रशालिकनाथवाक्यं स्मारयति। तथाहि समग्रा सामवेदसंहिता ऋग्रूपा अनादिनिधना इति भवतस्सिद्धान्तः। पूर्वार्चिकसंहिताध्ययनार्थमेव व्रतान्यु-पदिष्टानि। उत्तरार्चिकाध्ययनस्य किमपि व्रतं न हि विहितम् न वा श्रुतम्। व्रताभावात्पौरुषेयता भवेदस्य भागस्य। ततश्च सिद्धान्तहानिः।

तर्ह्यस्तु तृतीयः कल्प इति चेत् सोऽप्ययुक्त इति भाति। तथाहि "उद्वयं तमसस्परि"इत्यस्यामृचि उद्वयामे इति साम प्रकृतिग्रन्थे महानाम्न्यनन्तरं पठ्यते। अपौरुषेयत्वादिदं सामाधीयते। न चेदं वेदानन्तर्गतं वक्तुं शक्यते। अस्य साम्नस्तत्र तत्रापौरुषेयैस्सामान्तरैस्सह विनियोगात् "वेदादिवेदान्तानि त्रीण्याज्यदोहान्यादि-त्प्रत्नस्यरेतस उद्वयन्तमसस्पर्युन्नयामि" इत्यपरसूत्रे। "या रौहिणी पौषी वा पौर्णमासी स्यात्तदहरुद्यन्तमादित्यमुपतिष्ठेतोद्वयं तमसस्परीत्येतेन" इति जरामृत्युप्रयोगे साम-

विधानब्राह्मणे, "उद्वयं तमसस्परीति वा सर्वेषाम्" इत्येकमनुष्यवशीकरणप्रकरणे तत्रैव ब्राह्मणे। अस्य साम्नोऽध्ययनार्थं व्रतमुपदिष्टं न पश्यामो न वा स्मरामः। ततश्च व्रतं विनैवाधीतानां वेदभागानां पौरुषेयता यथा नास्ति तथैवात्रापि भवितुमर्हतीति।

एतयोरपौरुषेयत्वस्वीकारे को लाभ इति चेत्—पौरुषेयत्वे ह्यनयोर्भागयोरध्ययनविध्यभावात् सर्वेऽप्यत्राध्ययने न प्रवर्तेरन्। ततश्च साष्टब्राह्मणग्रामेगेयारण्यकगानाध्ययनानन्तरं समावृत्ता भवेयुः। अद्यत्वे पूर्वोक्तभागं यो नाधीते न तं समग्रवेदाध्यायिनं मन्यन्ते शिष्टाः। यावद्रहस्यभागपर्यन्तं नाधीतं तावत्समग्रैका शाखा नाधीतेति मन्यन्ते। तदध्ययनार्थं वाक्यं नावलोकयामः। वेदत्वे तु स्वाध्यायविधिना सङ्गृहीतत्वात्समग्रशाखाध्ययनसिद्धिः। ततश्चैकदेशाध्ययने पूर्वोक्तशिष्टाचारोऽनुगृहीतो भवति।

यदपि—आचार्यनियमात् इत्यादिवाक्यनिकुरम्बैः पौरुषेयत्वमुक्तं तत्प्रत्युच्यते। "संहिताकारपदकारसूत्रकारब्राह्मणकाराणां तृप्तिरस्तु" इति छन्दोगा अध्यायोत्सर्जनकर्मणि तर्पयन्ति। संहिता नित्यसिद्धा ब्राह्मणं च नित्यम्। नित्यानां कर्तारः कथं भवेयुः। तत्र या गतिस्सैवात्राप्यूहकारवाक्ये भवति।

नन्वत्र दृढतरं प्रमाणं न पश्यामः। युक्त्या ह्यपौरुषेयता साधिता। सा च क्वचिद्व्यभिचरेदेवेति चेत् प्रमाणमुपस्थापयामि—"सामवेदेनौद्गात्रम्" इत्यापस्तम्बवाक्यं वर्तते। औद्गात्रं केन वेदेन कर्तव्यमिति प्रश्ने सामवेदेनेत्युच्यते। न हि ग्रामेगेयारण्येगेयैस्सामभिरौद्गात्रं सिध्यति। तत्र पठितानां स्तुतिष्वविनियुक्तत्वात्। अत्र पठितानां गीतीनां स्तुतिसाधनत्वात्। यद्येतासां गीतीनां वेदत्वं न स्यात् तर्हि सामवेदेनेति कथनमयुक्तं स्यात्। मन्त्रवर्णोऽप्यत्र भवति "उद्गातेव शकुने साम गायसि ब्रह्मपुत्रइव सवनेषु शंससि" इति। उद्गाता हि प्रकृतगानानि गायन् सवनानि यथावत्सम्पादयति न तु ग्रामेगेयभागं अरण्येगेयगानं वा। ननु प्रस्तोतृप्रतिहर्तारावपि गायतः। तदपि कुतो न निर्दिष्टमितिचेत् तत्र प्राधान्यमुद्गीथस्यैव। उद्गीथभक्तेः प्रवक्ता उद्गातैव निर्दिष्टः। स्तोत्रेषु ग्रामेगेयभागस्थस्य मन्त्रस्य न विनियोगः। तेषामुच्चारयिता प्रस्तोता दीक्षणीयादीष्टिषु।

अपि च पौरुषेयत्वं स्वीकुर्वद्भिरवश्यमत्रोत्तरं देयम्। येन स्वरेण यथावा ग्रामेगेये गीतानि सामानि तेनैव स्वरेणात्रापि भवितव्यम्। परन्तु योनिग्रन्थे केषुचित्सामसु केचन स्वराः अत्रापरे। तथाहि—अस्ति तद्वोगाय इत्यस्यामृच्युत्पन्नं साम मार्गीयवम्। योनिग्रन्थे पाठक्रमः—तद्वौहोवा इति। तदेव सामात्र तद्वौहोवा इति। प्रथमे मन्त्रे पञ्चमचतुर्थपञ्चमस्वराः। अत्र द्वितीयप्रथमद्वितीयस्वराः। साममन्त्राणामुच्चारणमदृष्टार्थम्। यद्यपि ऋगक्षरस्य संस्कारो जायते तथापि दृष्टं फलं न भवति। अदृष्टार्थेषु कथं प्रयोक्तव्यमिति नरा न जानते। अत एष्वपि साममन्त्रेषु योनिवत्स्वरैर्भवितव्यम्। नास्ति च। न केवलमस्मिन्नेव साममन्त्रे, जराबोधीयादिषु योनिस्वराद्भिन्नः स्वर उपलभ्यते। किं च वामदेव्यसाम्नि कयानायाम् औऽ३हो हाइ इति। तत्रैवाभीषुणायां औऽ२३ होहाइ। इति तदेतत्सर्वमपौरुषेयत्वमनुमापयति।

यद्येवं ऊह इति भागस्यास्य नामधेयप्रतिलम्भः किंमूलकः। पौरुषेयत्वे मनुष्यैरूहः कृत इत्युपपद्यत इति चेत्, अत्रापि बहुभिः कारणैरूहत्वं समर्थयामः। इमानि सामानि नैकेनर्त्विजा प्रयुज्यन्ते परन्तु त्रिभिरुद्गातृपुरुषैः। तेऽपि न समं गायन्ति किन्तु स्वकीयं स्वकीयं भागमेव। तत्र कियानात्मीयो भाग इति विचार्य प्रयोक्तव्यः। ततश्चोहत्वं सम्पद्यते। यद्वा बर्हिर्निधनसामस्वध्ययनकाले सामान्तेऽधीतं निधनभागं प्रयोगकाले प्रथमसाम्नि द्वितीयसाम्नि च प्रयुञ्जीरन् इत्यप्यूहः। आहोस्वित् रथन्तरसाम यथाधीतं न तथा प्रयोगकाले प्रयुज्यते। उद्गीथभक्त्युच्चारणकाले भकारैर्गेयम्। सोऽयमूहः। अथवा "परिस्वानोगिरिष्ठाः" इतिर्तृचे "मदेषु सर्वधा असि" इति वारत्रयमागतम्। गाने तु तृतीये साम्नि। प्रयोगकाले सर्वेषु सामसु योज्यम्। एतावतापौरुषेयत्वं नापैति। एवं स्वादोरित्था त्रिकद्रकेषु इत्यादिसूक्तेषु।

तर्हि पट्टिकायां प्रदर्शितस्य योनिगानस्य का गतिः। अत्रोच्यते त्रिकद्रुकायां पञ्चनिधनं साम दृश्यते। तत्रैकमेव निधनमधीतम्। चतुर्णां निधनानामावश्यकतास्ति। अन्यथा नामनिर्देशो व्यर्थतामियात्। यत ऋकुतश्चिन्निधनचतुष्टयमपेक्ष्यते। नामसाहश्यात् कयानायां दृष्टानि निधनान्यत्रानीयन्ते। एवमेव सामोच्चारणकाले पूर्वग्रन्थयोस्साम्नामध्ययने ये धर्मास्तेऽत्रापि भवेयुरित्यत्र पट्टिकाया उपयोग इति गृह्यण।

ननूहभागस्य मन्त्रत्वं नास्तीति

ब्रह्मकुले जातोऽपि त्वद्भजनं निजमपास्य यो विकृतः।
न ब्राह्मणस्स भगवन्न हि मन्त्रो मन्त्रमध्यगोऽप्यूहः॥

इति मीमांसकमूर्द्धन्यैः श्रीमदप्पय्यदीक्षितेन्द्रैर्मीमांसकमर्यादा शिवमहिमकलिकास्तुतौ प्रतिपादितेति चेत् अत्र "देवस्यत्वा" इत्यादिनिर्वापमन्त्रे सूर्यदेवत्ययागे सूर्यायत्वेति य ऊहस्स एवाभिप्रेतः। न तु प्रकृताः साममन्त्राः। एतदपि तदधिकरणे सिद्धम् ऊहग्रवरादीनां मन्त्रत्वं पूर्वपक्षयित्वा सस्वरमिमानि प्रयोक्तव्यानीति फले प्रदर्शिते नास्त्येषां मन्त्रत्वम्। ततश्च स्वररहिता अपि प्रकृतमर्थं प्रतिपादयेयुः इति सिद्धान्तितम्। एषु सामसु स्वरलोपे यजमानस्य नाशो भविष्यतीति षड्विंशब्राह्मणे प्रतिपादितम्। किञ्च प्रयोगकाले छन्दोगाः साम्नां ऋषिछन्दोदेवताविनियोगं स्मरन्ति। मन्त्रेष्वेव तत्परिज्ञानं विहितम्। ततोऽप्यपौरुषेयोऽयं भागो भवेदिति।

अन्यच्च पदपाठः पौरुषेय इति सर्वसम्मतः। सामवेदोत्तरार्चिकपदपाठे विशेषोऽयमुपलभ्यते—पूर्वार्चिकाधीतानां ऋचां गणान्तपाठः। व्यर्थतया कालयापनमध्ययनाध्यापनयोर्मा भूदिति स पाठ आदृतः। एवमेवेमावपिभागौ यदि पौरुषेयौ भवेतां तर्हि यस्यामृचि छन्दोनामके ग्रन्थे यत्सामाधीतं तस्यैव साम्न ऊहोद्गानयोः किमर्थं गणान्तपाठेन निर्देशो न कृतः। अपौरुषेयत्वादत्र गणान्तपाठो न कृत इत्यपि स्वतन्त्रतां साधयन्ति[1] इत्यलम्।

---

[1] "एवमपौरुषेयत्वमास्थितैः एतस्यैव रेभतीषु वारवन्तीयमग्निष्टोमसामः कृत्वा पशुकामो ह्येतेन यजेत" इति ताण्डचश्रुतेरानुकूल्यं सम्पादनीयम्। तां श्रुति-

अथ क्रमप्राप्तं सामवेदस्वरस्वरूपमुपवर्णयामि। प्रत्यपादयं मदीयसामतन्त्रभूमिकायां सामवेदानां पाठभेदाः परिभाषापाठः, स्वरसङ्केतपाठः, राणायनीयपाठः इति। मद्रप्रान्ते पञ्चाशद्वर्षेभ्यः पूर्वं परिभाषानियममवलम्ब्य वेदस्याध्यापनमध्ययनं चाभवत्। ततः कलिकातानगरवास्तव्यैः सामश्रमिसत्यव्रतशर्मभिर्बहूनां मातृकाग्रन्थानां सहायेन प्रथमवारं समग्रः सामवेदः सम्पाद्य प्राकाश्यत। तदनुसन्धानतत्परैः तिरुवैय्यार (पञ्चनदक्षेत्रम्) नगरमधिस्थितैः ब्रह्मश्रीकृष्णश्रौतिभिः प्रथमवारं दक्षिणदेशे ग्रन्थाक्षरैस्स एव मुद्राप्य प्रकाशपदवीमारोपितः। तस्य च प्रचारार्थं तत्र-तत्र सभाः कारयामास श्रौतिवर्यः। तालपत्रेषु दाक्षिणात्येषु मया परिभाषापाठ एव प्रत्यक्षीकृतः। अक्षराणामुपरि पश्चाद्वा स्वरनिर्दिष्टः पाठः सोत्सुकस्य मम दृष्टिपथं न प्राप्तः। काशीमागतस्य मम दैववशादत्रत्यवैदिकवरैः परिचयो लब्धः। तेषां प्राचीनहस्तलिखितग्रन्थेभ्यः प्रथमद्वितीयादिस्वरचिह्नाङ्कितः पाठोऽपि समधिगतः। बहोः कालादुत्तरभारते वङ्गदेशे च स एव पाठः प्रचलति स्म। परिभाषापाठमाश्रित्य यथा सामगाः सामानि गायन्ति तथैव काशीस्थाः सामगा अपि। परमुत्तरत्र स्वरनिर्देश अङ्गुलीषु निक्षिप्तः। प्रथमपाठे तथा न। अङ्गुलीनिर्देशं विनैव परिभाषापाठः उच्चनीचतया प्रावर्तिष्ट। क्रमेण स्वरसङ्केतपाठेऽध्यापनाध्ययनसौकर्यमवलोक्य समस्ते दक्षिणप्रान्ते प्रवर्ततेस्म काचित्पद्धतिः। अस्य नवीनपाठ इति प्राक् संज्ञाप्यासीत्। नेदानीं परिभाषाविदो वर्तन्ते।

स्वरनिर्देशप्रकारश्च सामतन्त्रभूमिकायामुक्तोऽपि पुनरनूद्यते। तर्जन्या उपरि द्वियवान्तरोऽङ्गुष्ठः क्रुष्टस्य, तादृश एवैकयवान्तरः प्रथमस्य, तर्जनीमध्यरेखामाश्रितो द्वितीयस्य, मध्यमानामिकाकनिष्ठिकामध्यरेखाश्रितः क्रमेण तृतीयचतुर्थपञ्चमानाम्, कनिष्ठिकामूलरेखागतोऽतिस्वार्यस्य बोधकः। अयमेव क्रमः साम्प्रतमाश्रितः। तयाइ[१] इत्युच्चारणकाले तर्जन्या उपरि यवान्तरेऽङ्गुष्ठः स्थापनीयः। गिरा[२र] अस्य पर्वणः पाठसमये तर्जनीमध्यरेखायाम्, इ[३] अस्य पर्वणोऽध्ययनकाले मध्यमामध्यरेखायाम्, ओग्नाइ[४] इत्युच्चारणकालेऽनामिकामध्यरेखायाम्, अग्निन्दूताम्[५र] इति पर्वपाठकाले कनिष्ठिकामध्यरेखायां च तिष्ठत्यङ्गुष्ठः। तथाचोक्तं नारदशिक्षायाम्—

अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे तु प्रथमः स्वरः।
प्रदेशिन्यां तु गान्धार ऋषभस्तदनन्तरम्॥

मवलम्ब्य विचारे प्रक्रान्ते पूर्वपक्षिणा- "त्रिवृदग्निष्टुदग्निष्टोमः" पूर्ववाक्येन इति प्राप्तेऽग्निष्टुन्नाम्निकतौ पशुफलाय रेवत्याधारकवारवन्तीयसामाभिन्नाग्निष्टोमसाम गुणो विधीयते इति शङ्किते 'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः" इति वार्तिकप्रमाणेन वाक्यभेदः सिद्धान्तिना प्रदर्शितः। अपूर्वं च कर्म स्वीकृतम्। तत्र वारवन्तीयं साम "अश्वन्नत्वा" इत्यस्यां गीतम्। "रेवतीर्नः" इत्यस्यामध्ययनेननोसिद्धम्।

अनामिकायां षड्जस्तु कनिष्ठायां च धैवतः।
तस्याधस्ताच्च योन्यास्तु निषादं तत्र विन्यसेत्....इति।[1]
अङ्गुष्ठाग्रेण तानित्थं मध्यमे पर्वणि स्पृशेत्
स्वरान्मध्यमपर्वसु मुनिविष्ठान्निवेशयेत् इति च॥

एवमेवानेकस्वरवतां पर्वणामध्ययनकाले यस्य वर्णस्य यः स्वरस्तं पाणिना प्रतिपादयेत्॥ परिभाषापाठस्वरप्रदर्शनपुस्तके वररुचिनैवं प्रोक्तमवलोक्यते—

सप्तस्वराणां प्राधान्यात् तेषां स्थानानि—अङ्गुष्ठादिकनिष्ठान्तानि अङ्गुष्ठमध्यकनिष्ठिकानामग्रमध्यमूलानि क्रुष्टतृतीयातिस्वार्याणां स्थानानि। तर्जन्यनामिकयोर्द्वे द्वे प्रथम-द्वितीय-चतुर्थ-मन्द्राणां स्थानानि। अङ्गुष्ठाग्रश्च क्रुष्टस्य। तर्जन्या मूलमध्यरेखा (मध्यमूलरेखे?) प्रथमद्वितीययोः। मध्यमामध्यरेखा तृतीयस्य। अनामिकामध्यमूलरेखे चतुर्थमन्द्रयोः। कनिष्ठिकामूलरेखातिस्वार्यस्य। एवं स्थानानि सप्तस्वराणाम्॥

नारदशिक्षोक्तप्रकारेणैवाद्यतना अध्यापयन्ति। वररुचिप्रदर्शितं मार्गं नाश्रयन्ते। जैमिनीयशाखादिषु वाररुचस्स्वरनिर्देशप्रकारःस्यादिति सम्भावयामि। परिभाषापाठकालेऽपि नायं पन्थाः स्वीकृतः।

'वि(नि)वेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।
समुच्चारयेद्वाक्यं हस्तेन च मुखेन च।
यथैवोच्चारयेद्वर्णांस्तथैवैतान्त्समापयेत्[2] इति च नारदः।
स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ।
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति॥
यथा धनुष्याविततं शरे क्षिप्ते पुनर्गुणः।
स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः॥[3] इति चान्यत्र

एवं स्वरनिर्देशपूर्वकमधीतं साम गुरुशिष्यौ स्वाभीष्टफलेन संयोजयति[4]। विपक्षे च महद्दुःखं प्रापयतीति शिक्षावाक्यानि ब्रुवते—

हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः।
न साधयेद्याजुषाणि भुक्तमव्यञ्जनं यथा॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति।[5] इति

अस्मिन्प्रचलिते पाठे व्यामोहो नैव विद्यते। परिभाषापाठे सोऽवलोक्यते। तथाहि-
१ र २र
गृणानोह इति पर्वणि चत्वार्यक्षराणि सन्ति। प्रथमद्वितीयस्वरौ च प्रयोक्तव्यौ। तत्र

---

[1] नारदशिक्षा १. ७. ३, ४. [2] नारदशिक्षा १. ६. १३.
[3] याज्ञवल्क्यशिक्षा (अध्ययनविध्यधिकारे) ४७, ४८.
[4] साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते। शि. २. ३१.
वेदाभ्यासरतं शान्तं पञ्चयज्ञक्रियान्वितम्। न स्पृशन्तीह पापानि महापातकजान्यपि.
याज्ञ. स्मृ. ३१.
[5] वेदोपलक्षणम् [6] याज्ञवल्क्यशिक्षा २. ३९, ४१.

स्वेच्छयापि एकमक्षरं प्रथमेन शिष्टमक्षरसङ्गतं द्वितीयस्वरेणाऽपि समध्येतुं शक्यते। अत एव परिभाषापाठमाश्रित्याध्ययनं कुर्वन्तः काञ्चीमण्डलवासिनश्छन्दोगाः स्वपरंपरागतामन्यामेव सामगीतिं कुर्वन्ति। ज्ञायत एवैतत् "लुप्तप्रायाध्ययनसंप्रदायेऽस्मिन्समये प्रतिग्रामं प्रतिपुरुषम्, किं बहुना प्रतिनिमेषं च अन्यथाऽन्यथा नव्यनव्यपरिष्कारेण गानानि गीयन्ते, स्वरान् श्रुतीश्च पर्वाणि च स्वच्छन्दमन्यथयन्ति" इति ग्रामेगेयोपोद्घाते ब्रह्मश्री नारायणस्वामिदीक्षितवाक्यात्। स्वरनिर्देशपाठे नायं दोषस्समापततीति महान्गुणः।

परिभाषापाठक्रमेण प्रथममन्त्रमत्र निर्दिशामि-

उफ्त्वाताइणजातमन्धसाः। दि छू वाइसाद्भूप्रे। मि कः यददाइ। उरोग्रंशर्मा। मकः हाइश्रवाउ। वा च॥ एवमुत्तरे सामनी। पर्वसु द्वितीयो वर्णः स्वरबोधकः। तदनन्तरं ये वर्णा ऋचि न सन्ति पर्वणां मध्ये लिख्यन्ते तेऽपि स्वरबोधकाः। तथा ताइण इत्यत्रणकारः प्रणतस्वरबोधकः। एवम् छू स्वरः—रेवात्पाऽ१वाऽ२३। परमत्र प्रे लेखनात्द्भूऽ२३ इति पर्वरूपं न; किन्तुभूऽ२ इतिवत्। एवमादिपरिभाषापाठः सांप्रतं कथं गीयत इति पट्टिकया बोध्यते। कवर्गः ल व कवर्णाश्चप्रथमस्वरोपक्रमवतां पर्वणां ज्ञापकाः।

क च ट त पा पञ्च वर्गाः क्रमेण प्रथमद्वितीयतृतीयचतुर्थपञ्चमानां स्वराणां निर्देशका भवन्ति। लकारवकारककाराः कवर्गशेषा भवन्ति। श-ष-स-श्च-र-ळश्चवर्गस्य शेषाः। यकारस्टवर्गशेषः। हकारस्तवर्गशेषः। प्रथमस्वरेणोपक्रान्तानां नानास्वरवतां पर्वणां काकिइत्येवमादिभिर्वर्गाक्षरैः लकारादिभिश्च निर्देशो दृश्यते। तथाहि क तयाइ =तयाइ। का गृणानोह=गृणानोह। कि-समाये=समायेऽ३। की-ताम्=ताऽ२३४म्॥ कु ओइ=ओऽ२३४५इ। कू हाइषोहाइ=हाऽ२३४इषोऽ६हाइ॥ के आताइष्टात्=आताऽ२३४५ इष्टाऽ६५६त्॥ कै-समिद्धश्शुक्रया=समिद्धश्शुक्रया। को उपाहोइ=उपाऽ३होइ॥ कौ- नाकेसुपार्णमुपयात्पमूतन्ताम्=नाकेसुपार्णमुपयात्पतन्ताम्॥ कम् चादक्षसाइ=चाऽ२दक्षसाइ। कः गृणानोहव्यदातायाइ=गृणानोहव्यदाताऽ२३याइ॥ ख-नाऽ२३वेऽ३। खा=कूऽ२३४ वस्यवाऽ५र्षभोयुवा॥ खि. वार्तोमूहाइ-वाऽ२र्तोऽ३५हाइ। खी ष्णवाऽ३इ॥ खु=दाइवंययाउ॥ खू. दाइमा न उवा=दाइमाऽ३२उवाऽ३॥ खे-औ न होवा=औऽ३होऽ३वा॥ रवै=औ न होवा औऽ३होऽ३वाऽ३॥ खो-औ न होइ=औऽ३होऽ३४इ॥ रवौ माहान उवा=माहाऽ३२उवाऽ३४३॥ खम् ओनहाए=ओऽ२हाऽ२एऽ३४॥ खः स्वा न आओवा=स्वाऽ३आओऽ२३४वा॥ ग-द्रविणाऽ२३४स्यूः॥ गा=इहाऽ२३४५॥ गि-=औऽ३हो

ऽ२३४ ५वाऽ६५६ ॥ गी-औ न होवा=औऽ३होऽ३१इ ॥ गु. औ न हो=औऽ३होऽ
ऽ३१२ ॥ गू-औ न होए=औऽ३होऽ३१ येऽ३ ॥ गे. हौ न होइ=हौऽ३होऽ३१२३४५-
इ ॥ गै=ईऽ५हीहीहीहीहि ॥ गो=स्तोम७ रुद्रायदशीकाम् ॥ गौ ण्वाऋतअजा=ण्वा-
ऋतजाऽ३१ ॥ गम्.योवृत्रहोवाऽ३ओऽ२३४वा ॥ गः औहोवाहाऽ३होइ ॥

घ.नामत्वष्टुरपीचियामियाउवाऽ२३होवाऽ२३हाऽ२ईया ॥ घा. मधोअर्षन्तिधार-
याउवाहोवाहो प्रे ईया=मधोअर्षन्तिधारयाउवाऽ२३होवाऽ२३हाऽ२ईयाऽ२। घि.
=कस्यानूऽ१नाऽ२म्। घी.=नाइहोतासाऽ२३॥ घु.इन्द्रमर्चयाथाऽ१विदाऽ२३४इ ॥ घू.
गाइभिर्नवोऽ२३४वा। घे.यस्सुक्षितिताऽ२३४इनोऽ६हाइ॥ घै.गृणानोहव्यदाऽ१ताऽ३ ये ॥
घो.वाइश्वेभिस्सोऽ२३हाऽ३ ॥ घौ. उपमान्देवताताऽ२३याऽ३४इ ॥ घम् ओन अ री=
ओनरीऽ२३४३। घः होवाऽ३होऽ२ ॥

ङ.=सूनु७ सत्याऽ३१२३ ॥ ङा=आभिवत्साऽ३१२३४म् ॥ ङि. धियाऋ-
णयानओवाऽ३ओऽ२३४वा ॥ ङी आ७शुमतीमतिष्ठाऽ२३त् ॥ ङु षूऽ२दध्रिषोऽ२३४-
५इ ॥ ङू अभ्राजीज्ज्योतिरभ्राजीऽ२३४५त् ॥ ङे. इन्द्रा विन्७सबाधऊतयेविन्=इन्द्रा-
ऽ२७सबाधऊतयेऽ२ ॥ ङै.-सदा विन् याचन्नहञ्जिया=सदाऽ२याचन्नहञ्जियाऽ२३ ॥
ङो=इन्दुस्समुद्रमुर्वियाविभातीऽ२३४५ ॥ ङौ सेतू७स्तीर्त्वाचतुराऽ२३४५ः ॥ ङम्-
इन्द्रे विन्सोमा विन् सहइ=इन्द्रेऽ२सोमाऽ२स्सहइ ॥ ङः- त्वंवृत्राणिह७स्यप्रतीन्येक-
इत्पुरू।

ल-योजरित्रभ्योमघवा विन् पुरुवसुः=योजरित्रभ्योमघवाऽ२पुरुवसुः ॥ ला-
योरा विन् यामा विन् नेतायइडा विन् नाम्=योराऽ२यामाऽ२नेतायइडाऽ२नाऽ३म् ॥
लि-येकेचोदरसर्पिणस्तेभ्योनमाऽ२३४५ः ॥ ली-यस्मादापओषधयोमुवनानिचक्रदुः ॥ लु-
जनद्दिवमन्तरिक्षंपृथिवींविश्वभोजसंपुरुरूपाअजीजनः ॥ लू-अरूरुचद्वर्मौअरूरुचदुष-
सांदिविसूर्योविभातीऽ२३४५ ॥ ले-नमोन्नायनमोन्नपतयएकाक्षायचावपन्नादायचनमो-
नमः ॥ लै-तेजोघर्मस्संक्रीडन्तेवायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानिचक्रदुः ॥ लो-ऋश्यास-
इन्द्रभुड्डि-ति मघवन्निन्द्रभुड्डितिभुड्डितिप्रभुड्डतीन्द्रस्तसरपूताऽ२३४५ः ॥ लौ-तेजो-

२१ २ २ १ २ २ २ १ २ २ १ २ २ १

ज-ऊर्ध्व ऊषुणऽ३ऊताऽ२३४याइ ॥ जा-देवेभाऽ२३इर्मा । जि-जुहूमा-
ऽ२३सोऽ३ ॥ जी-प्रियादाऽ२३इवाऽ३४ः ॥ जु-तयेमाऽ२३साऽ३४३इ ॥ जू-अग्निराहु-
ताऽ२३४५ः । जे-औहोऽ२वाऽ२३४औहोवा ॥ जै-देवैरग्नेसयावाऽ२३भीः ॥ जो-आजि-
ग्मगाइवंवाऽ२३हाऽ३ः ॥ जौ सनिंमेविन्धामयासिषाम्=सनिम्मेऽ२धामयासिषाऽ२-
३४५म् ॥ जम्भृतासइद्वहन्तस्सन्तदाविन्शत=भृतासइद्वहन्तस्सन्तदाऽ२शत ॥ जः-
पवित्रन्तेविततंब्रह्मणस्पतेऽ३ ॥

झ-घर्मꣳप्रवृक्तस्तन्वासमानृधेवृधेसुवाऽ२३४५ः ॥ झा-अर्कस्यदेवाꣳपरमेवियो-
विन्मान्-अर्कस्यदेवाꣳपरमेवियोऽ२माऽ२३४५न् ॥ झि-नत्वदन्योमघवाऽ२३नाऽ२ ।
झी-रिपुरीशीतमाऽ३१उवाऽ२३ ॥ झु-तक्षद्यदाऽ३१२३४इ ॥ झू-द्रवाससाऽ३१उवाऽ२-
३४५ । झे-ल्येअन्धसाऽ२ः ॥ झै-तवेदसाऽ२३म् ॥ झो-सपर्यतायेऽ३४ ॥ झौ ई अ
न्द्रंवायाप्रेम्=इन्द्रंवायाऽ२म् ॥ झम् र अ रा=रराऽ२३ ॥ झः-जाअनानाम्=जनाऽ-
२३नाम् ॥

ञ-त्सअराहाइ=त्सराऽ२३हाऽ३४इ ॥ ञा-पुनानमभिगाऽ३ ॥ ञि-ई अ वा=
इवाऽ२३४ ॥ ञी-षूअवञ्त्रिणाम्=षुवञ्त्रिणाऽ२३४३म् ॥ ञु-अअमार्तायाम्=अमाऽ२-
र्तांऽ२३४याम् ॥ ञू-यूअवासाखा=युवाऽ२साऽ२३४५खाऽ६५६ ॥ ञे-ताअमाविन्भ्वं-
साम्-तमाऽ२भ्वंसाऽ२३म् ॥ ञै-अनूऽ२३हो ॥ ञो-त्रहान-त्रहाऽ३ । ञौ-ददा प्रे यान-
ददाऽ२याऽ३ ॥ ञम्-सुतेवया ७सियन्ताउ ॥ ञः-स्तुवौनहो-स्तुवौऽ३हौऽ३

श-सुषावसोममद्रिभीऽ२३४ः ॥ शा-औहोऽ३वा३४३ ॥ शि-क्रयाहुताऽ२३४५ः ॥
शी-वाऽ३चाऽ३ः ॥ शु-हाऽ३हाऽ३४ ॥ शू-ष्णुमोजसाऽ३४३ ॥ शे-वारावाऽ२३४न्ताम् ॥
शै-औऽ३होवाहाऽ३४औहोवा ॥ शो-याशाआऽ२३४सीऽ६ ॥ शौ-ओऽ३२३४५वाऽ६५६ ॥
शम्-पावकवर्णाः ॥ शः-सुषावसोममद्रिभिः ॥

ष-वोऽ३ग्नयएऽ३४ ॥ षा-इन्द्रस्येवाऽ३४३प्रतव ॥ षि-ऐयाऽ३४३ईऽ३४या ॥
षी-ओवाऽ३४३ओऽ३४५वाऽ६५६ ॥ षु-इतएतउण दारूहाप्रान्=इतएतऽउऽ३दारूऽ१हा-
ऽ२न् ॥ षू-हूणीणथा अअतिथिम्=हूणीऽ३थाअतिथीऽ३म् ॥ षे-पावाणकाअसा-

२र १ अ २ २र १ अ २ र र र
याम्=पावऽ३काश७साऽ२३याम्॥ षै-वावऽ३ताइवृत्राहाऽ२३४न्॥ षो-प्रतेधारा-
१ अ १११ २१२र१र२१र २ २ र २र १ ३र
मधुमऽ३ताइरसृग्राऽ२३४५न्॥ षौ-उतत्रातासिवोभुवः॥ षम्=प्रभुगोत्राणिपरियेषि-
१ २ १ २१ २र१र २र ३
विश्वताऽ२३ः॥ षः-हत्यस्सप्तभ्योजायमानाऽ२३४ः॥

० ० ० ० ० २र१र २र१र २र१वि.र ३ १११
स-वाजीजिगीवाविश्वाधना विन् नी=वाजीजिगीवाविश्वाधनाऽ२नीऽ२३४५॥
२१ २ १र र २र १र १११ २र र १ २ १र २ १ २ १र र
सा-घर्म४प्रवृक्तस्तन्वासमानशेमहेसुवाऽ२३४५ः॥ सि-ईयान४कृष्णोदशभिस्सहस्रैः॥
२१र २र१ २ १ २१ २ १र २१ २र १ १११
सी-महामपारंवृषभ७सुवज्राऽ२३म्॥ सु॰ वृत्रञ्जघन्वा अपतद्वारयत्तमाऽ२३४५ः॥
२ १ र २र १ २१ २ र १ २ १ २ र १ २ १
सू-तिदधानेभ्यश्चनम४प्रविध्यद्भ्यश्चप्रव्याधिभ्यश्चनमः स्थित्सरद्भ्यश्चत्सारिभ्यश्चन-
२ २ १ र२ १ र र र२ १र २ १ र२ १ २ १ र र र२ १ २ र
मश्रि॥ से=मन्युनावृत्रहासूर्येणस्वराड्यज्ञेनमघवादक्षिणास्यप्रियातनूराज्ञाविशन्दा-
र २ १ र र २र १ २ १ २ र १ २ र १ २ १ २ १ २
धार। सै=रुद्रायतीरसदेनमस्थिरायस्थिरधन्वनेनम प्रतिपदायचपटरिणेचनमस्त्रिय-
२ र २ २ १ ३ १११ २ १ २ र १ ३
म्बकायचक॥ सो=एऽ३महाऽ२३४५ः॥ सौ=अभित्रञ्जंतत्निषेगव्यमश्वियाऽ२३म्॥
२ १र २ १र ३ १११ २र १र२ १ २ र १र र र ३
सम्-जनितेन्द्रस्यजनितोतविष्णोऽ२३४५ः॥ सः=आयुर्द्धाअस्मभ्यंवर्चोधादेवेभ्याऽ-
१११
२३४५ः॥

२र१२र१ २ १ २र १ ३ १११ २र१ २१र र २र१
श्र=योषितांयन्मनस्तन्मयियोषिताऽ२३४५म्॥ श्रा=तोकंप्रजांगर्भोनोयमद-
२१र २ १ र २ १ २ १ ३ १११
ध्मह्याचपराचपथिभिश्चरन्ताऽ२३४५ः। श्रि नास्ति। श्री-अग्निर्नोविन्व७सतेरयीम्=
२ १ वि.र र३ २ २१ ४ २र३५
अग्निर्नोऽ२व७सतेरयीऽ१म्। श्रु=अर्चन्तुपूऽ२३त्राऽ३काउत॥ श्रू-उपनोऽ२३हरि-
५ ४ ५ २१र ४ ५४र५४५ ४ ५
भिस्सुतावा॥ श्रे-इमेताऽ२३इन्द्रतेवयंपुरुष्टुतोवा॥ श्रै इत्यादि नास्ति॥

२ १ २ १ २३र२ १ २ २
र-नन्दाइ॥ रा-काऽ३म्परः॥ रि-प्रप्रावयाम्॥ री-औऽ३होऽ३१इ॥ रु-
२ १२ १ २ १र र र १ २र १र १
षूऽ३महिषो॥ रू-परमाचित्सधस्थादैयाऽ२३होइया॥ रे-स्वानासइन्दवाउवाऽ२३हो-
— १ २ — १ २र १ २र १ २ १ २र
वाऽ२३हाऽ२ईया। रै-षाणाप्रेनाम्-षणाऽ२इनाम्॥ रो-माताइहत्याः॥ रौ-अरिरग्ने-
१ २ १र २ १र २ १र २ २ १र २ १२ १ २ १र १
तवस्विदा। रम्-जनिंतादिवोजनितापृथिव्याः॥ रः-ब्रध्नश्चित्रयस्यवातोनजूतिम्=
रेफस्वरवन्ति सर्वाण्युच्चैः॥

२ र १र २ १२ १-र१ २ १ २ १ २ १ र २ १र २ र १२ १ र २ १
ळ-चराचराय बृहतइदंवाममिदंबृहद्वद्स् ळा-वृषभस्त्वष्टावृत्रेणशचीपतिरन्नेनगय-
२ १र २ १र र २र १ २ १ २ १ २ विर. ३ २
४पृथिव्यासृणिकोग्निनाविश्वंभूतम॥ ळि-सुवृक्तिभिर्नृमादनंभरेऽ२षुवाऽ१॥ ळी-
२१ २ १र २१ २र १
वृत्रञ्जघन्वा७अपतद्वारयत्तमः॥ ळु-इत्यादि नास्ति॥

टवर्गस्तृतीयस्वराणां तदादीनां च पर्वणां ज्ञापकः - ट-इ ॥ टा-प्रत्यग्ने ॥ टि
हरसाहाऽ६ए ॥ टी-प्रगोऽ३ ॥ टु-एहियाऽ३४ ॥ टू-हीऽ२३४षी ॥ टे-यायाऽ३४औ-
होवा ॥ टै-मदाऽ२३४याऽ६ ॥ टो-कयाऽ३स्थाऽ५इराऽ६५६न् ॥ टौ-याहीन्द्राऽ२३ ॥
टम्-धुमत्तामाऽ२३४ः ॥ टः-दिवस्पायूऽ२३४५ः ॥

ठ-शमाऽ३१२३इ ॥ ठा-कण्वाऽ३१२३४ः ॥ ठि-औहोऽ२३४वा ॥ ठी-अग्ने-
जरितर्वि ॥ ठु-औहोऽ५इन्द्रतेशवाः ॥ ठू-आनोअग्नेवयोवृधम् ॥ ठे-अवद्रप्सोअंशुम-
तीम् ॥ ठै-अग्नेमृडमहाँअसि ॥ ठो-तुराणाऽ२३४ः ॥ ठौ-महाइत्राऽ२३४इणाम् ॥
ठम्-मदाऽ३२इन्ताऽ२३४राम् ॥ ठः-वृताऽ३४३ः ॥

ड-पिबाऽ३४तुवाऽ३ ॥ डा-महाऽ३४३मूविपोधाम् ॥ डि-कदाऽ३४औ-
होवा । डी-अहाऽ३१२न्याऽ२३४हा ॥ डु-औहोऽ३हाऽ३ ॥ डू-वियञ्जतेसमञ्जते ॥
डे-अस्तिसोमोअयंसुतः ॥ डै-इन्द्रमच्छसुताइमेवृषणंयन्तुहा ॥ डो-थिनाशवाऽ३२-
३२३४३ः । डौ-उपोपेन्नुमघवन्भूयइत् ॥

य-एहिया ॥ या-नुषेजना ॥ यि-ओहोऽ३१इ ॥ यी-औहोऽ३१२ ॥ यु-कविक्रतो-
ऽ२ । यू-योजाऽ३रितृ ॥ ये-नास्ति ॥ यै-घ्नताऽ३४वामाऽ१ ॥ यो-औहोवा ॥ यौ-
औहोऽ३वा । यम्-नवाऽ३२ ॥ यः-माहित्वा ननं न मा-माहित्वाऽ३२३२३मा ॥

तवर्गश्चतुर्थस्वराणां तदादीनां च पर्वणां ज्ञापकः—

त-ओग्नाइ ॥ ता-जारा ॥ ति-होऽ५तोऽ६हाइ ॥ ती-प्रष्ठवाः ॥ तु-अग्नआ-
याहि ॥ तू-हरिश्मश्रुन्नवर्मणाऽ६ ॥ ते-अग्नआयाहिवो ॥ तै-अग्नेजरितर्विरुपतिः ॥ तो-
अग्नेविवस्वदाभरो ॥ तौ-नयोमातरावन्वेतिधातवे ॥ तम्-त्वमिन्द्रबलादधिसहसाः ॥
तः-इन्दुꣳ पविष्टचेतनꣳ प्रियꣳ कवीनांमतिस्सृ ॥

थ-पाहिनोअग्नए । था-मघवानोजना ॥ थि-इमउत्वाविचक्षते ॥ थी-श्वासेप-
तयन्तमुक्षणम् ॥ थु-पाहिगोर्भिस्तिसृभिरुजाम् ॥ थू-ज्ञाऽ२वोऽ२ग्नायाइ ॥ थे-
यज्ञामिया = यज्ञाऽ५य थै-अभिप्रियाऽ२ ॥

ह-हाऽ३ । हा-ताऽ३उयम ॥ हि-होऽ३वाऽ३४ ॥

---

१ अत्र द्वितीय तृतीय द्वितीयादीनां "न" इत्येव संज्ञा दत्ता परिभाषापाठे ।

पवर्गो मन्द्रस्वराणां तदादीनां च पर्वणां ज्ञापकः—

५ र ५ ५ ५४
प-अग्निंदूताम् ॥ पा-अग्निंवाऽ६ए ॥ अतः परं प्रतिलोमगीतिः-पि-पुरू ॥ पी-
५ र र ४ ५ ३ २ ५ र ३ २ ५ र ३ र २ १ ५ र र ४ ५
आघायइहा ॥ पु-नारमोइ ॥ पू-षाहमे ऽ३इ ॥ पे-सहोवानन्ता ॥ पै-जराबोधोवा ॥
५ ४ ५ ५ र ४ २ ४ ५ र ५ ४ २ ४ ५
पो-तुविद्युम्नंविभाऽ६ ॥ पौ-दूताऽ३म्वोऽ३विश्ववेदसाम् ॥ पम्-तंगूऽ३र्धाऽ३यासुवर्ण-
४ ५ ५ र २ ४ र ५ ४ ५
रोवा ॥ पः-तरोभाऽ३इर्वोविदद्वसूम् ॥

५ २ ४ र ५ र ५ र र २ ४ र ५ ५ र ४ र ५ र
फ-प्रमꣳहाऽ३इष्ठायगायता ॥ फा-एह्यूषूऽ३ब्रवाणाऽ६इताइ ॥ फि-रायेअग्नेम-
४ ५ ४ ५ र ४ र ५ र ५ ४ ५ र ४ ५ ५ ४ ५ र ४ र ५ र
हाइ ॥ फी-अग्निमिन्धानोमनसा ॥ फु-शुक्रन्तेअन्यद्यजतम् ॥ फू-अग्निस्तिग्मेनशो-
४ ५ र ५ र ४ र ५ र ४ ५ ४ ५ ४ र ५ र ४ ५
चिषा ॥ फे-एनावोअग्निमेऽ५नमसा ॥ फै-समेतविश्वाओजसापतिम् ॥ अनया पट्टिकया प्रकटीकृतमेतदपि भवति—सामवेदे प्रथमस्वरादीनि पर्वाणि ९२-द्वितीयस्वरादीनि ११८ तृतीयस्वरादीनि ४५ चतुर्थस्वरादीनि २३ पञ्चमस्वरादीनि २० इति। निर्देशे च प्रथमतोऽवरोहक्रमेण तदन्वारोहक्रमेण, व्युत्क्रमेण पर्वाणि निर्दिष्टानि। एषैव पदशय्या सामवेदे गानग्रन्थे। क्रुष्टस्वरस्य द्वौ ककारौ वाचकौ ऊकक—
११
ऊ इति।

अत्रेदं विचारणीयम्-शम् शः इति वर्णाभ्यां प्रकृतपट्टिकायामेकविधमेव पर्व निर्दिष्टम्—पावकवर्णाः-सुषावसोममद्रिभिः इति। उभयत्र द्वितीयतृतीयद्वितीयतृतीय-द्वितीयस्वराः। तत्किमर्थं द्वाभ्यां वर्णाभ्यां निर्दिश्यत इति। प्रकृतपाठे न भेदः। परिभाषापाठादत्र स्वरभेदः—शम्-द्वि-तृ-द्वि-तृ-चतुर्थेषु। शः-द्वि-तृ-द्वि-तृ-च-तृ-चतुर्थेषु इति विवरणं तत्र कृतम्। तथा च पावकवर्णाः। सुषावसोममद्रिभिः इति परिभा-षापाठः सिद्धः। अतोऽत्र भेदाद्वर्णाभ्यां द्वे पर्वणी निर्दिष्टे। एवं यत्र स्वरैक्य-मुभाभ्यां बहुभिर्वर्णैर्वा प्रकटीकृतं तत्र सर्वत्र स्वरभेदः समस्तीति ज्ञातव्यम्। प्रकृतपाठे नास्ति स्वरभेदः।

१
ओऽ२३४५इ। एवं पङ्क्त्यां यत्र संख्या निर्दिष्टा तत्र पूर्वतनमचं तावत्पर्यन्तं अवरोहक्रमेण कर्षेत्। तथा च ओओओ ओओइ एवं भवति। यत्र विलोमेन संख्या-
१ २ ३ ४ ५
निर्दिष्टा तत्र (प्रत्युत्क्रमे) आरोहक्रमेणान्त्यमचं कर्षेत्। पुनाऽ३१। अत्र तृतीयात्प्रथम-
३ २
स्वरः आरोहक्रमेण आ इति कर्षेत्। दीर्घाक्षराणामुपरि 'र' इति चिह्नं कृतम्। मद्र-प्रान्तीयास्तं वर्णमत्याहन्ति स्वाध्यायकाले। काशीस्थाः—

मात्रद्विमात्रवृद्धानां विभागार्थं विभागवित्।
अङ्गुलीभिर्द्विमात्रं तु पाणेः सव्यस्य दर्शयेत्[१] ॥

इति शिक्षावाक्यमनुसृत्य र घटितवर्णोच्चारणकाले तादृशान्यक्षराणि सव्यपाण्यङ्गुलीभि-

[१] नारदशिक्षा-१-६-७।

र्गणयन्ति। साम्नि येषामक्षराणामुपरि 'र' वर्तते तान्यक्षराणि द्विमात्रायुक्तानि। दीर्घाक्षराणीति संज्ञा। येषां दीर्घाक्षराणामुपरि 'र' नास्ति तानि त्रिमात्रायुक्तानि वृद्धसंज्ञां लभन्ते। ऋचि दीर्घाक्षरस्य त्रिमात्रतायां वृद्धम्, ह्रस्वाक्षरस्य त्रिमात्रतायां प्लुतमित्यपि सङ्केतः। परमिदानीमुभयोरपि वृद्धमित्येव व्यवहारः। तदतिरिक्तान्यक्षराण्येकमात्रकाणि भवन्ति। तदेवं ज्ञात्वा साममन्त्राः प्रयोक्तव्याः। छलप्रक्रियेति कश्चन ग्रन्थो वर्तते। एकैकस्य साम्न एकं छलाक्षरं प्रत्यपादि। तस्य ज्ञानेन व्यामोहो नैव भविता। रौरवसाम्नः पुनानायां "बौ" इति छलाक्षरम्। तेनाक्षरेण दीर्घम्-उद्घातः मात्रा एतत्त्रयं ज्ञायते। द्वितीयस्वरात् प्रथमस्वरो यदा भवति तदा उद्घातः इति संज्ञा। सोऽपि स्वरो यदि पर्वादौ भवेत् तदैवैतां संज्ञां प्राप्नोति। पर्वमध्ये कर्षणेन वा तथाभूतस्तां संज्ञां नोपाप्नोति। मात्रालक्षणग्रन्थे मात्राः प्रतिपादिताः तदेतत्सर्वं बौ इत्यनेन जानीमः। तत्र वर्णे योऽच् स मात्राबोधकः। औकारश्च दशमः ऋकारलृकारौ वर्जयित्वा। ततश्च दशविंशति-त्रिंशत्संख्यां वा बोधयति सः। प्रकृतसाम्नि विंशत्यक्षराणां मात्रा भवति। वर्गतृतीयाक्षरं ब। तस्मात् त्रीणि उद्घातपर्वाणि। यत्राष्टौ त्रयोदश वा भवन्ति तत्र सर्वत्र वर्गतृतीयमक्षरं ज्ञेयम्। एवं पवर्गः पञ्चमः संख्योपेतान्यक्षराणि दीर्घाणि। शिष्टानि दीर्घाक्षराणि वृद्धानि। नेदं स्मर्तव्यं रौरवसाम्नि सर्वत्रैवमेव भवेदिति। पश्यन्तु तरणिरौरवम्। तस्य साम्नः छलाक्षरं जी भवति। सर्वत्रोद्घातस्समानः। शिष्टमन्यदेव। पुनानायां यद्यन्यत्साम परापतति तत्रापि छलाक्षरमन्यदेव। अभीवर्तसाम्नि पुनानायां भौ इति। अतस्तत्तत्सामान्ते छलाक्षरसन्निवेश आदर्शपुस्तकोल्लिखितस्संयोजितः। एवमार्चिकग्रन्थस्य पदपाठस्य च छलाक्षराणि सन्ति।

"एकं साम तृचे क्रियते स्तोत्रीयम्" इति वाक्येनैकं साम ऋक्षु तिसृषु गेयं भवति। प्रकृतग्रन्थे चैकर्चदृष्टानि बहूनि सामान्यवलोक्यन्ते। कथमेतत्साधु भवेत्। बाढम्। महाब्राह्मणकल्पसूत्रेषु त्रिवृत्पञ्चदशः सप्तदशः एकविंशः त्रिणवः त्रयस्त्रिंशः चतुर्विंशः चतुश्चत्वारिंशः अष्टाचत्वारिंशः चतुष्टोमः षोडशः इत्येवमादीनि पदान्यसकृत्पठ्यन्ते। तानीमानि पदानि बहिष्पवमानादिस्तोत्रेषु ऋक्संख्यां प्रतिपादयन्ति। त्रिवृद्बहिष्पवमानमित्यस्यायमर्थः बहिष्पवमानस्तोत्रं छन्दोगैर्नवसु ऋक्षु सम्पादनीयमिति[1]। स्तोत्राणि द्विविधानि—अनेकतृचसाध्यानि एकतृचसाध्यानीति। त्रीण्यपि पवमानस्तोत्राणि प्रथमां कोटिमाश्रयन्ते। एकस्य तृचस्य वारत्रयमावृत्यापि

[1] वेदभाष्यकर्ता श्रीसायणाचार्यः "त्रिवृद्बहिष्पवमानम्" इति वाक्यमन्यथैव व्यावृणोत् त्रयाणां तृचानां प्रथमवारं प्रथमामृचं गीत्वा द्वितीयपर्याये तेषामेव द्वितीयामृचम्, तृतीयपर्याये तूत्तमामृचं गायेत्-इति। तत्रोच्यते-पर्याय इति पदस्यायमर्थः यावान्मन्त्रो विहितस्तावन्तं सकृदुच्चार्यानन्तरं पुनरप्युपक्रमस्तस्यैवेति। एकं तृचं प्रथमवारमुक्त्वा तस्यैवावर्तने पर्यायशब्दः प्रयुज्यते। तत्र सायणमते पठितानां मन्त्राणां पुनरुपादानं नो भवति। अपि चैकस्मिन्तृचे तिस्र ऋचो मिलित्वैकमर्थं प्रतिपादयन्ति। तत्रैवं सति तासामृचामन्यथोच्चारणे प्रकृतो विवक्षितोऽर्थःपाठश्च न सिध्यति। सायणमार्गेण सांप्रतमुद्गातारो नानुतिष्ठन्ति। यत्र कुत्रापि विष्टुतेरुद्यत्याः समन्वयः कर्तव्य इति कृत्वा चिन्तया व्याचख्याविति ज्ञेयम्॥

बहिष्पवमानस्य त्रिवृत्वं सम्पादयितुं शक्यते, परं "पराग्बहिष्पवमानेन स्तुवन्ति" इति श्रुत्याऽऽवृत्तेर्निषेधात् नवसु ऋक्षु सम्पादनीयम्। अतोऽस्यत्र त्रयाणां तृचानामावश्यकता। एकं च गायत्रं साम तेषु तृचेषु विहितम्। माध्यन्दिनपवमानमप्यनेकतृचसाध्यं भवति। "पञ्चदशो माध्यन्दिनः पवमानः" इति शास्त्रेण पञ्चदशसु ऋक्षु सम्पादनीयं स्तोत्रं तत्। ताश्च ऋचः पञ्चभिस्तृचैरपि सम्भवेयुः समानच्छन्दस्कैश्च। तत्सर्वं न युक्तम्। "त्रिच्छन्दो माध्यन्दिन ϰपवमानः" इति श्रुत्या गायत्रीबृहतीत्रिष्टुभो भवन्ति। तच्छन्दस्का मन्त्रा अपि "उच्चा पुना प्रतु" इति प्रतीकेन गृहीताः। तत्र गेयानि सामानि गायत्रामहीयवरौरवयौधाजयौशनानि पञ्च भवन्ति। तेनैतेन विवरणेन "एतावता वाव माध्यन्दिनं सवनं पुपुवे त्रिभिश्चछन्दोभिः पञ्चभिश्च सामभिः" इति ताण्ड्यमहाब्राह्मणवाक्याशयः स्पष्टीकृतः। त्रिषु तृचेषु पञ्चानां साम्नां क्लृप्तिमाह षड्विंशब्राह्मणम् "द्वे गायत्र्यां सामनी द्वे बृहत्यामेकं त्रिष्टुभि" इति। एवमिदं स्तोत्रमनेकतृचसाध्यम्। एवमार्भवपवमानमपि। आज्यपृष्ठाग्निष्टोमोक्थ्यषोडशिरात्रिपर्यायस्तोत्राणि द्वितीयां कोटिमवलम्बन्ते। तत्र सर्वत्रैक एव तृचः। तस्मिंश्चैकमेव साम गीयते न तु माध्यन्दिनार्भवपवमानयोरिव बहूनि सामानि। एकस्य तृचस्य त्रिवृदादिस्तोमसम्पादनं सावान्तरभेदं बहुधा प्रदर्शयतस्ताण्ड्यस्य द्वितीयतृतीयावध्यायौ। इयं स्थितिः प्रकृतियागे।

एषु स्तोत्रेषु स्तोमानां ह्रासवृद्धी भवतो विकृतियागेषु। तत्र प्राकृतसंख्याया न्यूनसंख्याकस्तोमो उत्तरयोः पवमानयोः भवति। यथा वा दशरात्रक्रतोः प्रथमे

---

[१] तत्र त्रिवृत्स्तोमस्य तिस्रो विष्टुतयः-उद्यती परिवर्तिनी कुलायिनीति। सर्वस्तोमेष्वाद्या विष्टुर्तिनित्या। अन्याः काम्याः। आद्यापि संयोगपृथक्त्वन्यायेन नित्या काम्यापि भवति। तासां प्रतिष्ठा वृष्टिः प्रजापशवः क्रमेण फलानि। सत्रेषु तथाहीनेषु कुलायिनी नित्या। एवमेव पञ्चदशस्तोमस्य पञ्चपञ्चिनी उद्यता चेति द्वे विष्टुती। तत्र प्रथमा द्विप्रकारा। तासां प्रतिष्ठा तेजोब्रह्मवर्चसं स्वर्गश्च फलम्। सप्तदशस्तोमस्य सप्त विष्टुतयः दशसप्ता सप्तास्थितोद्यती भस्त्रा चेति। तासु प्रथमायाः द्वौ भेदौ द्वितीयायाः त्रयः भेदा इति सप्त भवन्ति। प्रतिष्ठा प्रकाशः ओजः प्रजापशवः तेजोब्रह्मवर्चसी स्वर्गः शत्रुपशुर्हिसा फलम्। एकविंशस्तोमस्य सप्तसप्तिनी उद्यती प्रतिष्टुतिः सूर्म्या चेति चतस्रः प्रतिष्ठायुः पौरोहित्यं ब्रह्मवर्च इति फलवत्यो विष्टुतयः। त्रिणवस्तोमस्य प्रतिष्ठिता उद्यती चेति द्वे विष्टुती। तयोश्च प्रतिष्ठा स्वर्गः फलम्। त्रयस्त्रिंशस्तोमस्य पञ्च विष्टुतयः समत्र्यंशा नेदीयस्सङ्क्रमा उद्यती प्रत्यवरोहिणी। अन्त्या द्विप्रकारेति पूर्वोक्तविभागो ज्ञेयः। आसां च प्रतिष्ठा पशवः स्वर्गः दीर्घायुः प्रतिष्ठा चेति फलम्। चतुर्विंशस्तोमस्यैकैव विष्टुतिः। चतुश्चत्वारिंशस्तोमस्य प्रतिष्ठिता निर्मथ्या समीषन्ती चेति तिस्रो विष्टुतयः। प्रतिष्ठा समृद्धिः पशवः इति तत्फलम्। अष्टाचत्वारिंशस्तोमस्य द्वे विष्टुती। प्रतिष्ठिता नेदीयस्संक्रमाचेति। प्रतिष्ठा अन्नादः फलं तयोः। तदेतेषां कुशानिधानप्रकारो यज्ञतत्त्वप्रकाशादिभ्योऽवगन्तव्यः। एवं नवप्रकारेषु स्तोमेषु सङ्कलनया त्रिंशत्संख्याका विष्टुतयः।

रथन्तरपृष्ठ्येऽहनि सर्वेषु स्तोत्रेषु त्रिवृत्वं प्रतिपादितम्। तत एव माध्यन्दिन आर्भवे च पवमाने त्रिवृत्वमायातम्। माध्यन्दिनपवमाने त्रीणिच्छन्दांसि भवन्तीत्युपवर्णितम्। तत्रैव त्रिवृत्त्वं सम्पादनीयम्। तत्प्रकारमुपदिशति ब्राह्मणं गायत्रं तृचमुपक्रम्य "एकस्यां गायत्रं भवति, आश्वं भवति, सोमसाम भवति" इति। ततो ब्राह्मणनिर्दिष्टे बार्हततृचे यौधाजयम् प्राकृते त्रैष्टुभे औशनमन्त्यमिति त्रिवृत्स्तोमसम्पत्तिः। एवमेव तत्रैव क्रतौ तृतीये वैरूपपृष्ठ्येऽहनि पूर्ववत्स्तोत्रेषु प्राकृतसंख्यां बाधित्वा साप्तदश्यं विधीयते। माध्यन्दिनपवमाने उच्चा अभि तिस्र इति गायत्रीबृहतीत्रिष्टुभो भवन्ति। गायत्रतृचे गायत्रवैष्टम्भे बार्हततृचे प्रथमायामृचि पौरुमद्गं तृचे गौतमान्तरिक्षे, अध्यास्यायामाष्कारणिधनं काण्वं त्रैष्टुभे तृचेऽङ्गिरसां संक्रोश इति सांप्तदश्यं भवति।

तत्र साप्तदश्यं पृष्ठंस्तोत्रादिषु ब्राह्मणप्रतिपादितदिशा पर्यायत्रयेण सम्पादयितुं शक्यते न पवमानस्तोत्रेषु। तेषु आवृत्तेर्निषेधात्। पञ्चसु तृचेषु पाञ्चदश्यम्, षट्सु तृचेष्वाष्टादश्यं स्यात्। अत एकस्यामृचि गानं द्वयोर्वा भवेत्। कुत्रापि सूक्ते द्वयोः ऋचोर्गानं नास्ति। परिशेषात्साप्तदश्यार्थमेकैकस्यामपि ऋचि गानं भवत्येव। एतेनेदमपि ज्ञायते यत्र वृद्धिर्ह्रासो वा माध्यन्दिनार्भवपवमानयोस्तत्र त्रैष्टुभस्य जागतस्य वा तृचस्य नावृत्तिः। गायत्रबार्हतयोरेवावृत्तिं विधाय भिन्नानि सामानि गायन्ति माध्यन्दिने। आर्भवे गायत्रानुष्टुभयोरावृत्तिः। इममेवार्थमाविष्करोति "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्। अत्र ह्येवावपन्ति। अतएवोद्वपन्ति" इति। स्तोमवृद्धौ साम्नामावापः एतास्वेवर्क्षु भवेत्। स्तोमह्रासे आभ्य ऋग्भ्यः साम्नामुद्धारः इत्यावपन्त्युद्वपन्तिपदयोरर्थः।

अत्रेयमन्या शङ्कोदेष्यति-दशरात्रादिपर्वसु बार्हतप्रगाथस्य द्वितीयायां तृतीयायां वा स्तोत्रीयायां बहूनि सामानि विद्यन्ते। तेषां च माध्यन्दिनपवमानादिषु विनियोगः। स्तोत्रात्पूर्वं यत्साम गीयते तस्याधारभूतऋचामाम्नानं शास्त्रतः सिद्धम्। तत्र कथमेषामाधारभूता ऋचो जपेयुः। न हि "मन्द्रया याति धारया म ा या याति धारया। अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः" इति ऋक् भवति रु. .क्षत्वादनन्वितत्वादभ्यस्तत्वाच्चेति। अत्रेदं समाधानम्—सत्यं भूयिष्ठानि सामानि पूर्वप्रतिपादितरीत्योपलभ्यन्ते। परं स्तोत्रकाले यावन्ति सामान्येकस्मिन्तृचे गीयन्ते तावतां साम्नामाधारभूतस्तृच एकवारमेव पठनीयः। न तु प्रतिसाम। यत्र द्वितीयायां तृतीयायां वा स्तोत्रीयायां साम गेयं भवेत् तत्र प्रथमापि स्तोत्रीया समग्रस्तृचो वा विनियुक्तो भवेत्। तथाचोपक्रमे तृचपाठसिद्धेः पूर्वोक्ताक्षेपानवसरः। न कुत्रापि स्तोत्रे प्रगाथेषु द्वितीयायां तृतीयायां वोत्पन्नस्य साम्न एव विनियोगो जागर्ति। एवमेवाध्यास्यायामपि समाधानं वेदितव्यम्।

"एकं साम तृचे क्रियते स्तोत्रीयम्" इति वाक्यमाज्यपृष्ठादिस्तोत्रपरम्। तेषु ह्येकं साम भवति। तत्राज्यादिस्तोत्रेषु साम्न एकत्वात्कति स्तोमास्संजाता इति न ज्ञायन्ते। तद्वेदनार्थमौदुम्बरनिर्मिताः कुशाः प्रस्तावभक्तिसमनन्तरं स्तोत्रकाले वैष्टुत-

वन्नस्योपरि प्रस्तोता निक्षिपति। तत्र च त्रयः पर्याया इति निरूपितम्। पर्यायस्य त्रेधा विभक्तस्यैकैको भागो विष्टावसंज्ञां लभते। एकस्मिन्विष्टावे तिस्रः पञ्च इत्येवं स्तोत्रीया भवेयुः। कुशानिक्षेपणप्रकारो बहुधा छन्दोगसूत्रग्रन्थेषु प्रतिपादितस्सङ्-गृहीतश्च यज्ञतत्त्वालोकादिषु ग्रन्थेष्विति नेह प्रतन्यते।

इदमपरं प्रतिपादयामि-योनौ यस्मिंश्छन्दसि सामोत्पन्नं तस्मिन्नेव छन्दसि तत्साम गेयमुतान्यस्मिन्नपीति। यद्यपि पुरस्तात् सर्वेषां साममन्त्राणां नित्यत्वं प्रतिपादितम्, कृतकत्वे ह्येष विचारः स्थानं लभेत। परं मीमांसकानां दृष्टया कतिपयानां सामगाचार्याणां मतेन चास्त्यवसरोऽस्य विषयस्य। ते हि मन्यन्ते पूर्वार्चिकदृष्टानि सामान्यत्र गीयन्ते इति। निदानसूत्रे च शाण्डिल्यायनो मेने "एकर्चि दृष्टानि सामानि" इति। अतस्तन्मतपरिज्ञानमनुपयुक्तं नो भवति। सामानि तदाधारभूता ऋचश्च प्रयोगमनुसृत्य द्वेधा विभक्तानि। सम्नां ग्रामेगेयमरण्ये गेयमित्येको भागः, ऊहरहस्यात्मकोऽन्यः। तथा ऋचः पूर्वार्चिकमुत्तरार्चिकमिति। प्रथमे भागे स्थितानि सामानि बहुलं प्रयोगकाले प्रस्तोता पठति यथासूत्रं दीक्षणीयादिष्विष्टिषु। प्रस्तोत्रा पठितव्यानां साम्नां परिसामानीति वैदिकी समाख्या। "सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत्स्वाध्यायवत्स्वासु"इति। सामविधानब्राह्मणे यानि विनियुक्तानि तेषां स्वाध्यायमधिकृतः करोति। एकस्यामृचि एकं द्वे बहूनि वा सामानि भवन्ति।

अग्निष्टोमादिक्रतुषु स्तोत्रत्वेन विहितानि सामानि द्वितीये भागे वर्तन्ते। तेषामुच्चारयितारः त्रयस्सामगाः प्रस्तोत्रुद्गातृप्रतिहर्तारः। ते च सहैव न पठन्ति। स्वकीयां भक्तिमेकैको गायति। सामानीमानि पूर्वार्चिके यस्मिंश्छन्दस्युत्पन्नानि तस्मिन्नेव छन्दसि गेयान्याहोस्विदन्यत्र कुत्रापीति भवति विचिकित्सा। तत्रानियमः। नियमकारिणः प्रमाणस्यादर्शनात्। अत एव अभित्वाबृहत्युत्पन्नं रथन्तरं साम कयानायां चोदितं सङ्गच्छते "कवतीषु रथन्तरं गायति"इति। कवती च गायत्रीछन्दः। नियमसत्वे गायत्र्यां गानविधानं प्रमाणपदवीमारोढुं न क्षमत इति पूर्वपक्षे सिद्धान्तः-जागर्त्यत्र नियामकं वाक्यं शरलेशभिया "समासु गेयम्" इति। अस्यार्थः शरो हिंसा। हिंसाकर्मणः शृणातेः पचाद्यचि शरपदनिष्पत्तेः। साम्नः हिंसाभिया समास्वेव गानं कर्तव्यम्। षट्त्रिंशदक्षरेषु रथन्तरं साम निष्पन्नम्। तस्य चतुर्विंशत्यक्षरवत्यां गायत्र्यां कयानायामन्यत्रवोहे पूर्वोक्ताक्षरसंख्याभावात् पीडा भवेत्। एवं गायत्र्यामुत्पन्नमामहीयवं साम यदि बृहत्यामन्यत्र वा गीयेत तदाक्षराणां चतुर्विंशत्या गाने निष्पन्ने शिष्टेष्वक्षरेषु गानकृतसंस्काराभावः प्रसज्येत। तदा लेश इति दोषः। "लिश अल्पीभावे" इत्यस्मात्तद्रूपसिद्धेः। ततश्च द्विविधदोषपरिहाराय समास्वेव गेयमिति।

यत्र तु विशेषवाक्यं भवति तदा प्रत्यक्षेण वाक्येनानुमानिकं समासु गेयमिति बाध्यते। विषमच्छन्दस्यपि गानं भवतीत्यर्थः। विषमच्छन्दसि गानं प्रत्यक्षश्रुत्या लिङ्गेन वेति प्रकारद्वयेन भवति। प्रत्यक्षश्रुत्या च विषमच्छन्दसि गानं द्विविधम्-विषमच्छन्दसि, समविषमच्छन्दसीति। बृहत्यामुत्पन्नं रथन्तरं गायत्र्यामुत्पन्नं वामदेव्यं वा "कवतीषु रथन्तरं भवति" "विराट्सु वामदेव्यमग्निष्टोमसाम भवति" इति प्रत्यक्षया श्रुत्या विषमच्छन्दसि गीयते। गवामयनीये प्रायणीयेऽहनि माध्य-

न्दिनपवमानप्रकरण एवमम्नायते-"पुनानस्सोमधारयेति समन्तं तिसृषु समन्तमेकस्यां प्लव एकस्यां दैर्घश्रवसमेकस्यां वा रथन्तरं तिसृषु" इति। बृहत्यामुत्पन्नं रथन्तरं पुनाप्रगाथे विधीयतेऽनेन वाक्येन। पुनाप्रगाथश्च बृहतीच्छन्दस्कः। अत्र द्वयोर्ऋचोः बृहतीसम्पादनार्थं प्रग्रथने सम्प्राप्ते "न वै बृहन्न रथन्तरमेकच्छन्दोऽयच्छतततः ककुभावुत्तरे उपादधुस्तस्माद्बृहती प्रथमा ककुभावुत्तरे। तस्माद्बृहद्रथन्तरे एकर्चे न कुर्वन्ति न हि ते एकच्छन्दोऽयच्छत्" इति श्रुत्या ककुबुत्तरायां बृहति गानं विधीयते। ततश्च रथन्तरस्य प्रथमा स्तोत्रीया बृहती शिष्टे स्तोत्रीये ककुभौ। तत्रोत्तरयोस्स्तोत्रीययोः बृहत्यामुत्पन्नं रथन्तरं ककुभ्यन्यच्छन्दसि गीयते इति समे विषमे च छन्दसि गानं सिद्धं भवति रथन्तरस्य।

ननु "तस्माद्बृहद्रथन्तरे एकर्चे न कुर्वन्ति" इति वाक्येन रथन्तरसाम्नि सर्वत्र ककुबुत्तरत्वे सिद्धे क्षुद्रपर्वणि पुनानायां बृहतीष्वेव रथन्तरगानमनुपपन्नमिति चेत्, बाढम्। सामान्योऽयं नियमः। सति विशेषवाक्ये सामान्यनियमस्य बाध इति सर्वतन्त्रसिद्धान्तः। प्रकृते चोभयसामानः केचन सवाः प्रतिपादिताः। तेषु बृहती पृष्ठस्तोत्रे माध्यन्दिनपवमाने रथन्तरमिति। "पुनानस्सोमधारयेति रौरवं योधाजयं दैर्घश्रवसमुद्वद्वा प्राजापत्यं त एकर्चाः रथन्तरं तिसृषु सर्वासु बृहतीषु"इति विशेषवाक्यात् क्षुद्रपर्वस्थपुनारथन्तरगाने दोषं न पश्यामः।

लिङ्गाद्विषमच्छन्दसि गानं यथा —

ज्योतिष्टोमेऽग्निष्टोमस्तोत्रे यज्ञायज्ञीयं साम भवति। तच्च योनिग्रन्थे "यज्ञा यज्ञा वः "इति बृहत्यामुत्पन्नम्। प्रकृतस्तोत्रे बार्हतप्रगाथे चातिदिष्टम्। प्रगाथे पूर्वा ऋक् बृहती, द्वितीया सतोबृहती। प्रग्रथनेन न बृहतीप्रकारं कुर्वन्ति। पूर्वा बृहती उत्तरे ककुभौ। नात्र रथन्तरवदुत्तरयोः ककुब्करणे प्रत्यक्षं वाक्यमस्ति। किन्तु लिङ्गमेव। तथाहि–तृतीयसवनमधिकृत्य चतुर्विंशतिर्जगत्यस्तृतीयसवने एका च ककुप्" इति श्रूयते। अस्यायमर्थः—तृतीयसवने आर्भवपवमानस्तोत्रम्, अग्निष्टोमस्तोत्रमिति द्वे स्तोत्रे नित्ये स्तः। आर्भवपवमानस्सप्तदशस्तोमकः, अग्निष्टोमस्य त्वेकविंशस्तोमः। आर्भवपवमानप्रकरणे "पञ्च छन्दा आर्भवः पवमानः सप्तसामा गायत्रसंहिते गायत्रे तृचे भवतः, उष्णिहि सफम्, ककुभि पौष्कलम्, श्यावाश्वान्धीगवे आनुष्टुभे तृचे भवतः कावमन्त्यम्" इति श्रुतम्। पञ्चभिः छन्दोभिः गायत्र्युष्णिक्ककुबनुष्टुब्जगतीभिः गायत्रसंहितसफपौष्कलश्यावाश्वान्धीगवकावैः सप्तभिस्सामभिरार्भवः पवमानस्सम्पाद्य इति श्रुतेस्तात्पर्यार्थः। गायत्रतृचयोः षट्स्तोत्रीयाः उष्णिह्येका, एका च ककुभि, अनुष्टुभि षट्स्तोत्रीयाः जगत्यां तिस्र इति सप्तदशस्तोमोऽस्मिन्स्तोत्रे भवति। षण्णां गायत्रीणामक्षराणि १४४. ककुभः २८. उष्णिहः, २८. षण्णामनुष्टुभां १९२. जगतीनां १४४ इति सर्वसङ्कलनया षट्त्रिंशदुत्तरपञ्चशतमक्षराणि भवन्ति।

अथाग्निष्टोमस्तोत्रम्। एकविंशः स्तोमोऽत्र भवेत्। यज्ञायज्ञप्रगाथे चैकविंशस्तोमकल्प्तिरेवमाम्नायते-"सप्तभ्यो हिंकरोति स तिसृभिस्स तिसृभिस्स एकया। सप्तभ्यो हिंकरोति स एकया स तिसृभिस्स तिसृभिः। सप्तभ्यो हिंकरोति स तिसृभिस्स

एकया स तिसृभिः। सप्तसप्तिन्येकविंशस्य विष्टुतिः" इति अत्रैकविंशतौ मन्त्रेषु साम गीयते। "साम्ने साम्ने हिङ्कुर्युः" इति प्रमाणवाक्येन प्रतिसाम हिङ्कारोच्चारणप्राप्तौ पर्यायारम्भ एव हिंकर्तव्यं न प्रतिसाम; अथवा पवमानव्यतिरिक्तस्तोत्रेष्वेकमेव साम विधीयते। तस्यैवावृत्या तत्रतत्रोपदिष्टाः स्तोमास्सम्पादनीयाः। अत्र सामैकत्वात्सकृदेव हिङ्कारप्राप्तौ पर्यायारम्भेषु हिङ्कारः कर्तव्य इति नियम्यते। तत्र प्रथमे पर्याये प्रथमां बृहतीं वारत्रयं द्वितीयां ककुभं वारत्रयमुत्तमां ककुभमेकवारं गीत्वा सप्त स्तोमास्सम्पादनीयाः। द्वितीयपर्यायार्थं पुनर्हिंकृत्य प्रथमां बृहतीमेकवारं ककुभौ वारत्रयं गीत्वा पूर्ववत्स्तोमाः सम्पादनीयाः। तृतीयपर्यायार्थं सकृद्धिंकृत्य प्रथमां बृहतीं वारत्रयं द्वितीयां ककुभं वारमेकमुत्तमां ककुभं वारत्रयं गायेत्। एवं संपन्नस्य एकविंशस्तोमस्य सप्तसप्तिनी विष्टुतिरिति संज्ञा। एवमनुष्ठीयमानेऽस्मिन्स्तोत्रे सप्त बृहत्यः चतुर्दश ककुभश्च भवन्ति। बृहतीनामक्षराणि २५२, ककुभामक्षराणि ३९२। आहृत्य संकलनेऽग्निष्टोमस्तोत्रेऽक्षराणि ६४४ भवन्ति। पूर्वस्तोत्रगताक्षरैस्सङ्कलने ११८० अक्षराणि। "जागतं तृतीयसवनम्"इति श्रुत्याक्षराणामेषां जगतीसम्पादने कृते अर्थात् अष्टाचत्वारिंशता पूर्वोक्ताक्षराणां भागे–भागफलं २४ शेषः २८। तदेव "चतुर्विंशतिर्जगत्यः तृतीयसवन एका च ककुप्"इति। यद्यत्रापि बृहतीत्रयं सम्पाद्यैकविंशः स्तोमो भवेत्तदोक्तिरियं पीड्येत। आनुमानिकं "समासु गेयम्"इत्येतत् लिङ्गेन बाध्यते। बृहत्यामुत्पन्नस्य यज्ञायज्ञीयस्य ककुभि गानं लिङ्गात्सिद्धं भवति। एवं योनिच्छन्दसो भिन्नच्छन्दस्सु गीयमानानां साम्नां विच्छन्दः शब्देन संज्ञां चकार भगवान्पुष्पसूत्रकारः पुष्ययशाः।

विशेषवाक्याभावे यस्मिंश्छन्दसि सामोत्पन्नं तत्रैवोत्तराग्रन्थेऽपि गानं कर्तव्यम्, विशेषविधौ नानाछन्दस्सु इति सिद्धम्। गायत्रीच्छन्दस्युत्पन्नस्य साम्नः त्रिष्टुबादिषु प्रसक्तावुद्गीथभक्तावक्षराणां समावेशः कर्तव्यः। एवं बृहत्यामुत्पन्नस्य गायत्र्यां गाने उद्गीथभक्त्यक्षराणां न्यूनता। रथन्तरस्योत्तरयोः स्तोत्रीययोः द्वे अक्षरे प्रस्तावभक्तौ भवत इत्येवमादिकं छन्दोगब्राह्मणेभ्योऽवगन्तव्यम्॥ न्यूनाधिकच्छन्दस्सूत्पन्नानां वाराहार्कपुष्पादीनां साम्नां प्रतिपादं गीतिः योनिवत्कर्तव्या। न तत्रोद्गीथभक्तावक्षराणां वृद्धिर्ह्रासो वा।

ऊहरहस्यगानयोः दशरात्र-संवत्सरै-काहा-हीन-सत्र-प्रायश्चित्त-क्षुद्रपर्वाणीति सप्त पर्वाणि भवन्ति। ताण्ड्यमहाब्राह्मणमवलम्ब्यायं क्रम आहृतोऽत्र। तच्च ब्राह्मणं गवामयनं निरूपयितुं प्रवृत्तम्। एकसंवत्सरसाध्योऽयं गवामयनयागस्सत्रं भवेत्। अयं च यागो द्वादशाहस्य विकृतिभूतः, द्वादशाहस्य बहुभिः दशभिरहोभिस्सम्पन्नो भवति। प्रकृतिभूतस्य द्वादशाहस्यानुष्ठानप्रकारानभिज्ञेनायं यागः कर्तुं न शक्यत इति प्रथमतो द्वादशाहक्रतुर्निरूपितः। द्वादशाहयागे प्रथमोत्तमे अहनी ज्योतिष्टोमातिरात्रसंस्थाके भवतः। तत्रोपयुक्तानां साम्नामपि सड्ग्रहः कृतः। अवशिष्टानामह्नां द्वितीयाद्येकादशान्तानां ये मन्त्रास्तैऽत्र प्राधान्येन सङ्गृहीताः। अतोऽस्य दशरात्रपर्वेत्यभिख्या। दशानामह्नां कृतिरेवमाम्नायते "पृष्ठ्यः षडहः त्रयश्छन्दोमाः अविवाक्यमुपान्त्यमहः" इति। तत्र षडहास्त्रिविधा भवन्ति पृष्ठ्यः षडहः, अभिप्लवः षडहः अभ्यासङ्गथः

षडहश्चेति। ज्योतिष्टोमे माध्यन्दिनसवने "पृष्ठैस्स्तुवते" इति पृष्ठस्तोत्रं विहितम्। तत्र च "रथन्तरं पृष्ठं भवति" "बृहत्पृष्ठं भवति" इति श्रुत्या विकल्पेन बृहद्रथन्तरे सामनी भवतः। प्रथमप्रयोगे रथन्तरमेव पृष्ठं भवति। द्वितीयादिषु विकल्पः। यदि रथन्तरं पृष्ठं भवति तर्हि ब्रह्मसाम नौधसम्। अथ बृहत्तर्हि श्यैतमिति। षडहक्रतौ पृष्ठस्तोत्रं षड्भिस्सामभिर्भवति। तानि च रथन्तरं बृहत् वैरूपं वैराजं शाक्वरवर्णं रैवतम् इति। क्रमेणेमानि सामानि यत्र पृष्ठस्तोत्रे क्रियन्ते स पृष्ठ्यः षडहो भवति। तत्र सर्वेषु स्तोत्रेषु त्रिवृत्पञ्चदश-सप्तदश-एकविंश-त्रिणव-त्रयस्त्रिंशस्तोमा भवेयुः। ज्योतिः गौः आयुः, गौः आयुः ज्योतिः इति यागानां क्रमेणानुष्ठानेऽभिप्लवः षडहो भवति।

अथाभ्यासङ्गत्यः षडहः-प्रथमेऽहनि माध्यन्दिनसवनपर्यन्तं सर्वस्तोत्रेषु त्रिवृत्स्तोमः। तृतीयसवने तथा द्वितीयस्याह्नो माध्यन्दिनसवनपर्यन्ते स्तोत्रे पञ्चदशः स्तोमः। एवं तृतीयदिने माध्यन्दिनपर्यन्ते सर्वेषु सप्तदशः स्तोमः। शिष्टेषु स्तोत्रेषु चतुर्थाहस्य पृष्ठस्तोत्रान्ते एकविंशस्तोमः। तस्यैवाह्नः तृतीयसवनीयस्तोत्रेषु पञ्चमस्य दिनस्य बहिष्पवमानाज्यमाध्यन्दिन पवमानपृष्ठस्तोत्रेषु च त्रिणवः स्तोमः। तत्रैव स्तोत्रान्तरेषु त्रयस्त्रिंशः षष्ठेऽहनि विश्वजिदतिरात्रो भवति। अयमर्थः एकस्मिन्नहनि द्वौ स्तोमौ क्रमेण स्याताम्। माध्यन्दिनसवनपर्यन्तमेकः, अन्यत्रेतरः। तौ च त्रिवृदादिक्रमेणानुष्ठेयौ। येन स्तोमेन पूर्वमहस्समाप्निमियाय तेनैवोत्तरस्याह्न उपक्रमः कर्तव्यः। प्रथमेऽहनि अग्निष्टोमयागः। द्वितीयतृतीयतुरीयाहस्सु उक्थ्ययागः। शिष्टयोरतिरात्रयागः। दशरात्रे पृष्ठ्यषडहस्यैवानुष्ठानम्। ततस्त्रयः छन्दोमाः। छन्दोमा इति चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशानां स्तोमानां नामानि। छन्दोभिर्मीयन्ते इति छन्दोमाः। गायत्र्यामक्षराणि चतुर्विंशतिः त्रिष्टुभि चतुश्चत्वारिंशत्, जगत्यामष्टाचत्वारिंशदिति संख्यासामान्यान्नामानि भवन्ति। दशममहरविवाक्यम्। एवेव विनियुक्तानि सामानि प्रथमे दशरात्रपर्वणि समाम्नायन्ते।

यद्यपि दशरात्रस्य प्रथमेऽहनि "प्रसोमासो विपश्चितः" इति सूक्ते द्वितीये मन्त्रे गीतमाश्वसाम निरूपणीयं तथापि ताण्ड्यमहाब्राह्मणे षष्ठाध्यायस्य तृतीयादिषु खण्डेषु यानि सामानि विहितानि तेषां पृथक्पर्वाभावादत्रैव प्रतिपादितानि। तानि च सामानि अग्निष्टोमोक्थ्यषोडश्यतिरात्रेषु विनियुज्यन्ते। अपि चार्भवपवमाने सप्तदशस्तोमो भवति। क्वचिदेकविंशोऽपि भवतीति मत्वा सफपौष्कले तृचयोर्गीयेते। विधायकब्राह्मणमप्येवम् "तासु सफम्" 'अथैतत्पौष्कलम्' इति। ज्योतिष्टोमे पुनरेकर्चं सामनी। एवं प्रथमेन पर्वणा सत्राहीनानां प्रकृतिभूते दशरात्रे प्रतिपादिते संवत्सरसाध्यं गवामयनं द्वितीयं स्थानं लभते। तदुद्देशेनैवास्य ब्राह्मणस्य प्रवृत्तिरभवत्[1]। गवामयनमादित्यानामयनमङ्गिरसामयनं दतिवातवतोरयनं कुण्डपायिनामयनं तपश्चितामयनमिति षड् यागाः संवत्सरसाध्याः। तत्र गवामयनं प्रकृतिः। एषु यागेषु विनियुक्तानि सामानि पठ्यन्त इति तत्प्रकरणं संवत्सरमिति व्यपदिशन्ति। प्रधानविषयनिरूपणानन्तरं काम्यानामे-

---

[1] तथा च सायणाचार्यः—"अस्मिन्ब्राह्मणे प्राधान्येन गवामयनं प्रतिपाद्यते" इति ताण्ड्यमहाब्राह्मणस्य द्वितीयाध्यायोपक्रमे।

काहाहीनसत्राणां महात्राह्मणस्य षोडशाप्रभृतिपञ्चविंशपर्यन्तै रध्यायैः प्रतिपादितान ां क्रतूनामुपयुक्तानि सामानि क्रमेण एकाहपर्व-अहीनपर्व-सत्रपर्वसु पठयन्ते। एवं समग्रे महात्राह्मणविषये प्रतिपादिते मध्ये सम्भावितानां द्रोणकलशविदारणसोमातिरेकादिनिमित्तानां दोषाणां निर्हरणाय यज्ञसमृद्धिहेतवे च नैमित्तिकानि स्तोत्रसामानि प्रायश्चित्तपर्वणि पठ्यन्ते। ऋग्वेदादित्राह्मणैः प्रतिपादितानामत्रानुक्तानां सोमयागानां स्तोत्रक्लृप्तिं क्षुद्रफलप्रदानां वा सोमयागानां स्तोत्रक्लृप्तिं क्षुद्रश्रौतसूत्रं प्रतिपादयति। तदनुसृत्यापूर्वाणि सामानि क्षुद्रपर्वणि पठ्यन्ते।

तत्र ग्रामेगेयगानतो धर्मा येषु सामस्वपेक्षन्ते तानि सामानि "ऊहगानम्" यानि च सामान्यारण्यकगेयगानतो धर्ममपेक्षन्ते तानि सामानि "ऊह्यगानम्" "रहस्यगानम्" इति वा संज्ञां लभन्ते।

सोमयागे ज्योतिष्टोमातिरात्रे बहिष्पवमानाज्यस्तोत्रमाध्यन्दिनपवमानपृष्ठस्तोत्रार्भवपवमानाग्निष्टोमस्तोत्रोक्थस्तोत्रषोडशिस्तोत्रपर्यायस्तोत्रसन्धिस्तोत्राणि भवन्ति। त्रयाणां पवमानस्तोत्राणां पवमानस्सोमो देवता। आज्यस्तोत्रेषु प्रथमस्याग्निः द्वितीयस्य मित्रावरुणौ तृतीयस्येन्द्रः तुरीयस्येन्द्राग्नी देवता भवन्ति। प्रातस्सवनीयस्तोत्राणि बहिष्पवमानाज्यानि गायत्रसाम्ना विहितानि। गायत्रगानस्योहस्सर्वत्रोपेक्षितः।

उत्तरयोस्सवनयोरारम्भे गायत्रं साम भवेत्। ननु वेयगानं "ओग्नाइ" इत्युपक्रम्य "एषस्यधारयाहाउ" इति, आरण्यकगानं च "यद्यावइ" इत्यारभ्य पञ्चपुरीषपर्यन्तं गीयेते। न तत्र कुत्रापि गायत्रसाम गीतम्। तत्कथमस्य वेदत्वं कथं वा प्रकृतिभावः। सन्ति गायत्रगानानि बहुलं ब्राह्मणग्रन्थेषु। तत्र दैवतब्राह्मणे तत्सवितुरिति सावित्र्यां गायत्रमुत्पन्नम्। एवं छान्दोग्योपनिषदि वासवरौद्रादित्य-वैश्वदेवसामानि गायत्रसाम्ना दृश्यन्त इति त्रय्यामन्तर्भावः प्रकृतित्वं चास्य गायत्रगानस्य। चतुर्णां पृष्ठस्तोत्राणां षोडशिस्तोत्रस्य द्वादशपर्यायस्तोत्राणां चेन्द्रो देवता। अग्निष्टोमस्तोत्रस्य प्रथमोक्थस्तोत्रस्य चाग्निर्देवता। उक्थयोरुत्तरयोस्तोत्रयोः इन्द्रः। सन्धिस्तोत्रस्य अग्निः उषा अश्विनौ देवताः। अतोऽत्र ग्रन्थे एता एव देवता अधिकृत्य सामानि दृश्यन्ते। सोमयागे इन्द्रः प्रधानदेवता। क्वचिदाग्नेयोऽपि क्रतुर्भवति। तस्मिन्यागे स्तोत्रादिषु अनाग्नेयी ऋच उद्धृत्य तत्स्थाने आग्नेयी ऋच आवपन्ति। न केवलमत्रैव यत्रेन्द्रपदं वर्तते तत्राप्याग्नेयाः शब्दाः प्रयोक्तव्याः। अत एव द्राह्यायणादयः सुब्रह्मण्यानिगदे आग्नेयक्रतावग्निदेवताकं सगुणं निगदं प्रतिपादयन्ति। मीमांसकाः पुनस्तत्राप्यनूहेनैव निगदं समर्थयन्ते। अनिरुक्तेष्वेकाहक्रतुषु सुब्रह्मण्यानिगदे इन्द्रस्थाने शक्रमामनन्ति कल्पकाराः।

सामवेदे समाम्नातानि सामानि त्रिविधानि भवन्ति। छन्नगानं लेशगानमाविर्गानमिति। स्तोभेष्वेव गीतानि सामानि प्रजापतेर्हृदयादीनि प्रथमां कोटिमारोहन्ति। एतादृशानि सामानि वेयगान एकम्, आरण्यकगाने षड्विंशतिः, ऊह्यगाने पञ्च च सन्ति। स्तोभाक्षरैस्सह ऋक्षु गीतानि द्वितीयां श्रेणिं लभन्ते। अल्पेन महता वा स्तोभेन युक्तानि बहूनि सामानि। स्तोभाक्षरहीनान्यृगाश्रितानि सामानि तृतीयां

विधामारोहन्ति। यथा वा-अग्ने मृड इति पूर्वयामम्। यौधाजयौशनादीन्यप्यत्रैवान्तर्भवन्ति। एतादृशान्यपि परिमितान्येव। तदयं विभागः—

ऋग्विहीनं छन्नगानं लेशं स्तोभमृचां सह।
आविर्गानं स्तोभहीनमेवं गानत्रयं विदुः।

इति वाञ्छिनाथेन प्रकटीकृतः॥

पुनरप्यन्तर्निधनं बहिर्निधनमिति सामानि द्विविधानि। यस्य साम्नः ऋगक्षराण्येव निधनभक्तावुच्चार्यन्ते तान्यन्तर्निधनानि। यथा यौधाजयम्। तत्र हिरण्ययः, सदत्, क्षण इत्येभिस्सामानि समाप्तानि। एतादृशानां साम्नां निधनानि साम्नामन्ते यथास्थानं गीतानि। ऋगक्षराद्बहिर्भूतान्यक्षराणि निधने यदि भवेयुस्तर्हि तानि सामानि बहिर्निधनानि। यथा आमहीयवम्। तत्र स्तौषे इति निधनम्। नैतत्पदं ऋचि दृष्टम्। श्रवः स्रव, वनामहे इत्येवं ऋगन्ताः। एतादृशानां बहिर्निधनानां साम्नामन्ते निर्दिष्टं निधनम्। प्रयोगकाले प्रतिसाम तन्निधनं निर्देष्टव्यम्। क्वचिदृगक्षरैस्सहैव निधनभक्तिस्संयुक्ता वर्तते। यथा वामदेव्यसाम्नि प्रथमः पादः प्रस्तावः। ऊतीसदावृधस्सखा कयाशचि उद्गीथः। घृया प्रतिहारः। वृताइत्युपद्रवेण हाइ इति निधनं योजयित्वा वाऽरतोऽ३५हाइ[१][२] इति पठन्ति। एवमादिहाइप्रभृतीनां बहिर्निधनानां प्रतिसाम पाठः कृतोऽत्र ग्रन्थे। यत्र समानबहिर्निधनवन्ति सामानि क्रमेणागच्छन्ति तत्रान्तिमे साम्नि तस्य निधनस्य निर्देशः कृतः। यथा ऊह्यगानारम्भे रथन्तरसामसु चतुर्थे साम्नि "अस्" इति निधनमवलोक्यते। एतत्सर्वं लक्षणग्रन्थेषु स्पष्टीकृतमपि सुबोधार्थमत्र सङ्गृहीतम्।

एकस्मिन्साम्नि पञ्च भक्तयो विराजन्ते—प्रस्तावः, उद्गीथः, प्रतिहारः, उपद्रवः, निधनं चेति। स्तोतारश्च त्रयः प्रस्तोता उद्गाता प्रतिहर्ता चेति। निधनं सर्वे समेत्योपेयुः। उद्गीथभक्तिमुपद्रवभक्तिं चोद्गाता गायति। शिष्टे प्रस्तोतृप्रतिहर्तारौ क्रमेण गायतः। प्रतिभक्ति बहूनि पर्वाणि भवेयुः। छन्दोगा यत्र विरम्य विरम्य पठन्ति तस्य पर्व इति नाम गेष्ण्य[१] इति च। तत्र विराम काले कश्चित्क्षणो गानहीनो भविष्यति। एवमेकः स्वकीयभक्तिमुच्चारयति। तदनन्तरमन्यो द्वितीयां भक्तिं यदोपक्रमते गातुं तत्रापि कश्चन क्षणो गानहीनः। निराकर्तुमशक्यस्यास्य परिपूर्त्यै केचन लौकिकाः पुरुषा एषां स्तोतृणां पश्चादुपविश्य होइति मन्द्रस्वरेण शब्दायन्ते। पुरुषाणामेषां न वरणं विद्यते। एषामेवोपगातार इति समाख्या। उपगातरः स्तोत्रारम्भप्रभृतिसमाप्तिपर्यन्तं पूर्वप्रतिपादितदिशा शब्दायन्ते। शब्दस्य तस्य न स्तोत्रत्वम्। प्रयोगकाले साम्नामादौ द्विरुच्चारः

---

[१] तस्य गेष्ण्यौ पर्वणी इति कल्पतरुकाराः। यद्यपि प्रस्तावादिसामभक्त्यवयवरूपे सामगानां पर्वेत्येव प्रसिद्धे साम्नामवच्छेदे गेष्ण्याख्या तेषां प्रसिद्धा, औक्थिक्याख्ये सामपर्वलक्षणग्रन्थेऽपि तथैव व्यवहारः इत्येवमादि छन्दोगशिरोमणयः परिमलकारपादाः।

कर्तव्यः। "साम्नेसाम्ने हिंकुर्युः" इति विधिवाक्ये बहुवचनस्य विवक्षितार्थत्वात्सर्वे स्तोतारो हिंकारमुच्चारयेयुः। अयं हिङ्कारोऽपि भक्तिः। उद्गीथाङ्गं प्रणवमुच्चारयति स्तोत्रकाले उद्गाता। अतस्सोऽपि भक्तिरिति सप्त भक्तयः साम्नि भवन्तीति प्रवादः। रथन्तरादीनां साम्नां प्रयोगकाले यथाशक्ति छान्दोग्योपनिषत्प्रतिपादितदिशा भक्त्युपासनां समामनन्ति स्तोतारः।

रथन्तरसाम्नि कश्चन विशेषः प्रतिपादितो ब्राह्मणग्रन्थे। तद्यथा—उद्गीथभक्त्युपक्रमात्पूर्वं प्रणवोच्चारणानन्तरं वाक् इति पदं मध्ये संयोज्यानन्तरमुद्गीथोपक्रम इति। रथन्तरसाम्न्येव वाक्शब्दस्योच्चारणादन्यसामस्वप्रयोगान्नास्य हिङ्कारप्रणववद्भक्तित्वं सम्भवति। उद्गीथभक्तौ द्वे पर्वणी स्तः। तत्र प्रथमं पर्व प्रथमद्वितीयस्वरोपेतम्। द्वितीयं प्रथमद्वितीयतृतीयद्वितीयस्वरोपेतम्। प्रथमपर्वणि व्यञ्जनानां स्थाने भकारं प्रतिनिधायोन्मीलितनेत्रो गायेदुद्गाता। निदर्शनपूर्वकं प्रतिपादयामि—ज्योतिष्टोमाग्निष्टोमे पृष्ठस्तोत्र अभित्वायां रथन्तरं भवति। हिम्। आभित्वाशूरनोनुमोवा इति प्रस्तावं प्रस्तौति प्रस्तोता। तदनूद्गाता ओं वाक् इत्युच्चार्य अदुग्धाइव धेनवईशानमस्य जगतः इति ऋगवयवे उद्गीथं भकारैस्संयोज्य भाभुभाभिभभेभभभीभाभभभभभभ इत्य् उद्गायति। द्वितीयं पर्व यथास्वाध्यायम्। एषा रीतिस्सर्वत्र रथन्तरसामसु।

एषां साम्नामाधारभूता ऋचो यत्र पठ्यन्ते तदिदं "उत्तरार्चिकम्" भवति। अध्यायप्रपाठकभेदेन विभजन्त्येतां सामवेदसंहिताम्। एकविंशतिरध्यायाः। प्रपाठकाः पुनर्नवैव। प्रपाठकस्य द्वाववान्तरभेदौ स्तः, प्रथमोऽर्द्धः, द्वितीयोऽर्द्ध इति। कुत्र चित्तृतीयः। एकोऽर्द्धः एकोऽध्यायो भवति। उभयत्र खण्डात्मना विभागः। अत्रत्यानां येषामृङ्मन्त्राणां "गानं न विद्यते" इति औन्ध्रप्रदेशमुद्रितग्रन्थस्य ऋगनुक्रमणिकायां निर्दिष्टं तत्र सर्वत्र गायत्रं गीयते। प्रायस्सर्वेषां प्रातस्सवने विनियोगः। अन्तिमस्त्वध्यायः "अप्रतिरथसूक्तम्" भवति। यदि सामवेदीयो ब्रह्मत्वं करिष्यति तदाग्निचयने ब्रह्मणा पठनीयेऽप्रतिरथसूक्ते विनियुक्तोऽयमध्यायः। शिष्टा अध्यायास्सोमयागे विनियुक्ताः। खण्डानां तृचात्मना प्रगाथात्मना च विभागः। समग्रसूक्तसंख्या ४०२ वर्तते येन क्रमेण क्रतवो निरूपितास्तं क्रममनुसृत्य तत्रोपयुक्तानामृङ्मन्त्राणां क्रम आश्रितः। आसामृचां पवमानस्सोमः अग्निः मित्रावरुणौ इन्द्राग्नी इन्द्र अश्विनौ उषाः देवताः। मन्त्रेषु गायत्र्यादिछन्दसां संख्या ग्रन्थान्तरतोऽवगन्तव्या।

पुष्पसूत्रादिदमवगम्यते विंशतिना भावैरुपेतान्यूहोह्यगानयोस्सामानि भवन्तीति। ते च भावाः श्लोकैस्संगृहीताः—तद्यथा—

आयित्वं प्रकृतिं चैव वृद्धं चावृद्धमेव च।
गतागतं च स्तोभानामुच्चनीचं तथैव च॥
सन्धिवत्पदवद्गानमत्वमाभाव एव च।
प्रश्लेषाश्चाथ विश्लेषा ऊहेत्वेवं निबोधत॥
संकृष्टं च विकृष्टं च व्यञ्जनं लुप्तमतिहृतम्।
आभावांश्च विकारांश्च भावानूहेऽभिलक्षयेत्॥
एतैर्भावैस्तु गायन्ति सर्वाः शाखाः पृथक्पृथक्॥इति॥

आइत्वम्—गानकाले वृद्धिं प्राप्तानां तालव्याचामृक्स्थानां आइ इति गानम्। यथा "दिवि" इति पदे दिवाइ इति आइभाव आमहीयवे।

प्रकृतिभावः—वृद्धं प्राप्तानां तेषामक्षराणां त्रिमात्राकालेनोच्चारणम्। आइभावेन न गानमिति यावत्। यौधाजये द्वितीयस्तोत्रीयायाः प्रस्तावे देवशब्दः देऽ३वो इत्येकारेणैव वर्तते।

वृद्धम्—ऋचि ह्रस्वं दीर्घं वाक्षरं गाने त्रिमात्रतां प्राप्नोति। तस्य वृद्धमिति संज्ञा। कुत्रचिद्ध्रस्वस्य वृद्धत्वे प्लुतेनापि व्यवहारः। अत्र वृद्धपदेनैव। यौधाजये चतुर्थमक्षरं वृद्धं भवति। तेन नाऽ३स्सो। अत्र दीर्घ ओकारो वृद्धः।

अवृद्धः—सर्वत्र यौधाजयादिषु तुरीयाक्षरस्य वृद्धप्राप्तस्य क्वचिद्वृद्धाभावः। इयावाश्वे च इत्यनेनइयावाश्वसाम्नि चतुर्थाक्षरे वृद्धे प्राप्ते "अयावास्वासोमधा" इत्यनेन वृद्धाभावः। तेन प्रीऽ३याः इति।

गतम्—गतिशब्देनाप्यभिधीयते। हाइ, हाउ इति गानं गतिः।

अगतम्—गतस्य प्रमाणेन लोपः। यथा-राजादेवौहोऽ२ऋतंबृहात्। अत्र होइकारस्य गतेर्लोपः।

उच्चम्—ऋचि नीचस्वरस्य गाने उच्चस्वरता। आमहीयवद्वितीयायाम् "वरिवोवित्" इत्यत्र वकारस्य ऋचि निघातस्य साम्नि वरिवोवाइत् इत्युच्चीभावः। अथवा उद्गीथादेर्नीचीभूतस्योच्चता।

नीचम्—नीचीभावः। योनावुच्चस्वरस्योहगाने नीचीभावः। समन्ते त्वमग्ने इत्यत्र चतुर्थस्वरानन्तरं पञ्चमः स्वरः। अर्थादुच्चादिः। पुना समन्ते द्वितीयस्वरानन्तरं प्रथमः स्वरः। ततश्चानुच्चम्।

सन्धिवत्—स्वराणां विसर्गादीनां च लक्षणेन सन्धिर्भवति। तद्वत् प्रमाणाभावेऽपि सन्धिं कृत्वा गानम्। पवस्वशङ्कुसाम्नि मदः इति समाप्तम्। उत्तरत्र यस्यते इति वर्तते। सन्धौ मदोयस्ते इति हि भवति। पदपाठे विसर्गान्तः। विसर्गान्तेनैव गानेन भवितव्यम्। परं मदो इति ओकारान्तं पर्व। तस्यैव सन्धिवदिति संज्ञा।

पदवत्—ऋचि सन्धिशास्त्रेण विकारं प्राप्तस्य सन्ध्यभावः। हितो ग्रा इत्यस्य सन्धिं प्राप्तस्य हिताः। इति पदवद्गानम्।

अत्वम्—आकारो ह्रस्वो भवति। पावकः इत्यत्र पाकारः पकारो भवति वाराहे।

आर्भवः—वृद्धमक्षरमृ आर्भवति। घ्नन्तः कृष्ण इत्यत्र ऋकारो वृद्धस्सन् गाने घ्नन्ताःकाऽ२३र्ष्णाम् इत्यार्भवति।

श्लेषः—लक्षणेन ऋचि पूर्वरूपं प्राप्तस्य गानेऽपि तथैव स्थितिः। यथावा पुनानोऽविभिःइत्यस्य संकृत्यादिषु तथैव गानम् नूनंपुनानोविभिः इति।

विश्लेषः—पूर्वरूपं प्राप्तमकारं विश्लिष्य गानम्। तत्रैव देवस्थाने नूनंपुनानोअविभिः इति।

संकृष्टः—संयुक्ताक्षराणां तथैव गानम् कावे सूर्योवा इति रेफयकारयोस्तथैव गानम्।

विकृष्टः संयुक्ताक्षरयोर्मध्येऽचोऽन्तर्भाव्य गानम्। सूर्य इतीदं पदं बण्महानैपातिथे सूरियाऽ३ए इति।

लोपः वृत्रहानृभिः इत्यादौ विसर्गस्य लोपः इन्द्रो मदाबार्हद्गिरे वृत्रहाऽ२नृभाइ इति। एवमकारादीनामपि।

अतिहृतिः—अनुस्वारस्पर्शरेफाः स्तोभे प्रत्यये स्तोभमतीत्य ऋगक्षरेण सन्धीयन्ते। तंगूर्धयस्वर्णरं इत्यत्र स्वशब्दादनन्तरं स्तोभ आगते रेफाक्षरं परेण णकारेण सन्धीयते-तंगूर्धयास्वौ होर्णाराम् इति॥

आभावः वृद्धं प्राप्तानां तालव्याचामन्तः पदिकानां हकारादिषु परेषु आभावः। तथा औहोवायां सर्वेषामक्षराणां आभावः। यथा नदाऽ३हाइ, प्राणाशिशाऔहोहाइ।

विकल्पः तत्रैकस्मिन्नेव पादे द्विधा गानं दृश्यते। यथा—तरणिरौरवे नेमिन्तष्टेवसूऽ२३हाइ इति। नेमिन्तष्टेवसाऽ२३उहाइ इति। प्रयोगकाले यथेच्छमेकस्य पर्वण उच्चारणम्॥

इतोऽन्यदस्मत्सामतन्त्रभूमिकायामवलोकनीयम्॥

अथ ज्योतिष्टोमेऽग्निष्टोमे रथन्तरपृष्ठस्तोत्रस्य पद्धतिं निरूपयामि। माध्यन्दिनपवमानादूर्ध्वं चत्वारि पृष्ठस्तोत्राणि भवन्ति। होतुः पृष्ठम् मैत्रावरुणपृष्ठम् ब्रह्मसाम अच्छावाकपृष्ठमिति। तत्र सर्वाण्यमूनि सप्तदशस्तोमकानि। होतृपृष्ठविधिः—पूर्वं नाराशंसं भक्षयित्वाऽऽहवनीये प्रस्तोता पृष्ठहोमं जुहुयात्-रथन्तरं पिबतु सौम्यं मध्वायुर्दधज्ञपतावविहृतमिमं यज्ञमभिसंवसाना होत्रास्तृप्यन्तु सुमनस्यमानाः स्वाहा रथन्तरायेदं न मम। स्वाहा प्रजापतय इदं न मम। यथेतं प्रत्याव्रज्य स्वस्थान उपविशेत्। प्रस्तोत्रुद्गातृप्रतिहर्तारः पुरस्ताज्जपेयुः

३ १ २ ३ १ २ ३ १ २
अभित्वाशूरनोनुमोऽदुग्धा इव धेनवः॥
१ २ ३ १ २ र ३ २ ३ १ २ ३ १ २
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥
१ २ र ३ २ ३ १ २ र ३ २ ३ १ २ र
नत्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।
३ १ २ ३ १ २ ३ १ २
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे। इति

अध्वर्युणा प्रदत्तमुपाकरणतृणद्वयं प्रस्तोता गृहीत्वा "ब्रह्मन् स्तोष्यामः, प्रशास्तः" इत्युद्गात्रे दद्यात्। स्तोमयोगकाले तेन तृणद्वयेनोद्गाता स्वीयां जङ्घां स्पृशेत्। ऐरं वै बृहदैड ं रथन्तरं मनो वै बृहद्वाग्रथन्तरं साम वै बृहत् ऋग्रथन्तरं प्राणो वै बृहदपानो रथन्तरं असौ वै लोको बृहदयं रथन्तरमित्युद्गाता मनसा ध्यायेत्-यस्ते गोषु महिमा

यस्ते अप्सु रथे वाते स्तनयित्नौ य उ ते यस्ते अग्नौ महिमा तेन सम्भव रथन्तर द्रविणवन्न एधि इति जपित्वा। दीक्षायै वर्णेन तपसो रूपेण मनसो महिम्ना वाचो विभूत्या प्रजापतिस्त्वा युनक्तु प्रजाभ्योऽपानाय त्वेति स्तोमयोगः।

रथन्तरसाम्नो वसिष्ठ ऋषिः, ककुबुत्तराबृहतीच्छन्दः। इन्द्रो देवता। प्रजापतिरकामयत बहुस्यां प्रजायेयेति विधायकब्राह्मणम्। अभिमन्थति स हिंकार इत्युद्गीथोपासनम्। प्रस्तावस्य प्राणो देवता आदित्य उद्गीथस्य, अन्नं प्रतिहारस्य, हो इत्युपगातृणाम्, ओमिति यजमानस्य, अग्नेरुद्गीथः अनिरुक्तः प्रजापतेः, निरुक्तस्सोमस्य, मृदुःश्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य, क्रौञ्चं बृहस्पतेः, अमृतत्वं देवेभ्य आगायानि, स्वधां पितृभ्य आगायानि, आशां मनुष्येभ्य आगायानि तृणोदकं पशुभ्य आगायानि, स्वर्गं लोकं यजमानायागायनि अन्नमात्मन आगायानि। क्रुष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वा आदित्यानां प्रथमः साध्यानां द्वितीयः अग्नेस्तृतीयः वायोश्चतुर्थस्सौमो मन्द्रः, मित्रावरुणयोरतिस्वार्यः।

हिम् (त्रयः।) आभित्वाशूरनोनुमोवा-इति प्रस्तावः प्रस्तोतुः। ओम् वाक् भाभुभाभिभभेभभभीभाभभभभभ (एतावत्पर्यन्तं चक्षुस्सम्मीलनम्) सुवाऽऽइ दृशाम् इत्युद्गीथ उद्गातुः। आइशानमाऽऽइन्द्राऽऽइ। इति प्रतिहारः प्रतिहर्तुः। सूस्थूऽऽइषा। ओवाऽऽ। हाउवा। इत्युपद्रव उद्गातुः। अस् इति निधनं त्रयाणाम्। एवं वारत्रयम्। इति तिस्रः स्तोत्रीयाः।

ईशोवा। इति प्रस्तावः प्रस्तोतुः। ओम् वाक् भाभिभभुभुभोभभाभाभभोभिभिभोः (एतावत्पर्यन्तं चक्षुस्सम्मीलनम्) नपाऽऽइर्थिवाः इत्युद्गीथ उद्गातुः। नजातोनाऽऽइजाऽऽइ॥ इति प्रतिहारः प्रतिहर्तुः॥ नाइष्याऽऽइऽऽइता। ओवाऽऽ। हाउवा इत्युपद्रव उद्गातुः। अस् इति निधनं त्रयाणम्। इत्येका।

नजोवा इति प्रस्तावः प्रतिहर्तुः। ओम्वाक् भोभभभिभभेभभाभभोभभभि (एतावत्पर्यन्तं चक्षुस्संमीलनम्) द्रवाऽऽइ जिनाः इत्युद्गीथ उद्गातुः। गव्यन्तस्वाऽऽइहाऽऽइ इति प्रतिहारः प्रतिहर्तुः। वामाऽऽइहा। ओवाऽऽ। हाउवा इत्युपद्रव उद्गातुः। अस् इति निधनं त्रयाणाम्। एवं प्रथमपर्याये पञ्च स्तोमाः।

पुनर्द्वितीयपर्यायार्थं हिंकृत्य पूर्वोक्तरीत्या प्रथमां स्तोत्रीयां सकृत्, द्वितीयां वारत्रयं तृतीयामेकवारं गीत्वा पञ्चस्तोमाः संपादनीयाः। ततस्तृतीयपर्यायार्थं हिंकृत्य प्रथमामेकवारं द्वितीयां वारत्रयं उत्तमां च वारत्रयं गीत्वा सप्तस्तोमाः सम्पादनीयाः। सप्तदशस्तोमस्य प्रस्तावं प्रस्तुत्य होतरेषा इति होतारं ब्रूयात्। स्तुत्वावरं चोदयेत्। तत्र द्वितीये कयान इति मैत्रावरुणपृष्ठे-सप्तदशस्तोमप्रस्तावान्ते प्रशास्तरेषा इति तृतीये तंवो-

दस्म इति ब्रह्मपृष्ठे-सप्तदशस्तोमस्य प्रस्तावान्ते ब्राह्मणाच्छंसिन् एषा इति, चतुर्थे तरोभिरिति अच्छावाकपृष्ठे सप्तदशस्तोमस्य प्रस्तावान्ते-अच्छावाक एषा इति तत्र-तत्र शंसिष्यन्तं ब्रूयात्। "स्तुतस्य स्तुतमस्यूर्जस्वत्पयस्वदा मा स्तोत्रस्य स्तोत्रं गम्यादिन्द्रवन्तो वनेमहि भक्षीमहि प्रजामिषम्" इति यजमानं वाचयेत्। "अभित्वा शूर" इति पूर्ववज्जपो मन्त्रस्य। अयमेवोपरिष्टाज्जपः। शंसनान्ते स्तोमगणनार्थं निक्षिप्तानां कुशानाम् "ऋतस्य त्वा देव स्तोमपदे विष्णोर्धामनि विमुञ्चाम्येतत्त्वं देव स्तोमानवकरमगन्नशीमहि वयं प्रतिष्ठाम्" इति मन्त्रेणादानम्। एतदेव स्तोमविमोचनम्। "दीक्षायै वर्णेन" इति मन्त्रपाठ एव स्तोमयोगः। अस्य मन्त्रस्य पाठेऽपि बहवः पक्षाः वर्तन्ते।

रथन्तरं सामेन्द्रदेवताकं पृष्ठस्तोत्रे विनियुक्तम्। तत्रैव पूर्वोक्ता भकारादयो धर्मा भवेयुः। तदेव साम पवमानदेवताकं यदि माध्यन्दिनपवमाने आर्भवपवमाने वा, आग्नेयं स्यात् अग्निष्टोमस्तोत्रे वा, तदा नैते धर्मा भवेयुरिति लाट्यायनादीनां मतम्। तथा च सूत्रम्—तस्यापृष्ठस्य सतो निवर्तेरन्धर्मा इति। धानञ्जय्यमते भकारोऽनुवर्तते। इतरे निवर्तन्ते। शाण्डिल्यस्तु पवमानादतिरिक्ते अग्निष्टोमस्तोत्रे सन्धिस्तोत्रे च भकारानुवृत्तिं मनुते। स्थविरगौतमस्तु अभित्वायां रथन्तरगाने पृष्ठापृष्ठगते सर्वत्र स्तोभानुवृत्तिमितरासु ऋक्षु गीयमाने रथन्तरे पृष्ठापृष्ठगते स्तोभानुवृत्तेरभावं च वर्णयति। ततश्च स्थविरगौतममते चतुर्वीराख्ये चतूरात्रे तृतीयेऽह्नि होतुः पृष्ठस्तोत्रे "अभित्वावृषभा" रथन्तरे यथासमाम्नातं साम भवति। न तत्रोद्गीथभक्तौ भकारप्रयोगः। सप्तदशस्तोमस्य सप्त विष्टुतयो भवन्ति। तत्र होतुः पृष्ठे या विष्टुतिराश्रिता सैवोत्तरत्रानुवर्तनीयासति विशेषविधिवाक्ये।

साम्नां काश्चन देवता अपि निश्रिता इति जानीमः। यथा रथन्तरस्यान्तरिक्षस्थान इन्द्रः, समन्तस्याग्निः पृथिवीस्थानः, रौरवस्य द्युस्थानः पवमानस्सोम इति। ननु रथन्तरादिशब्दैर्निषादादिस्वरघटिता गीतयो ज्ञायन्ते। गीतिस्थानां सप्तानां स्वराणां प्रजापतिप्रभृतयो देवता इति [1]सामविधानब्राह्मण-बृहद्देवतावाक्येभ्यो विदितमेव।

---

[1] कृष्टः प्राजापत्यो ब्राह्मो वा वैश्वदेवो वा आदित्यानां प्रथमः साध्यानां द्वितीयः, अग्नेस्तृतीयः वायोश्चतुर्थः सौमो मन्द्रः मित्रावरुणयोरतिस्वार्य इति (सा. वि. ब्रा. १-१-२१)

वैश्वदेवः स्वरः कृष्टो नित्यं यो मूर्ध्नि तिष्ठति।
तालव्यः प्रथमः साम्नां स्वर आदित्यदैवतः॥
स्वरो द्वितीयः साध्यानां भ्रुवोर्देशं समाश्रितः।
आश्विनस्तु तृतीयोऽत्र स्वरः कर्णौ समाश्रितः॥
चतुर्थस्त्वत्र वायव्यो नासिक्यः स्वर उच्यते।
पञ्चमस्तु स्वरः प्रोक्तश्चाक्षुषः सूर्यदैवतः॥
यस्तु सामस्वरः षष्ठः स सौम्यो मन्द्र उच्यते।
विकर्षेण तु मन्द्रस्य युक्तोऽतिस्वार्य उच्यते॥
स मैत्रावरुणो ज्ञेयः मन्द्रस्थानसमाहितः (बृहद्देवता ८-११६-१२०)

अपिच परस्परमन्वितैः पदार्थैर्वाक्यार्थबोधो भवति। वाक्यार्थनिर्णयाच्च मन्त्रेष्व—निरुक्तेषु देवतावगमः कर्तुं शक्यते। गीतीनां न कश्चन विशिष्टः सांकेतिकोऽर्थोऽस्ति। ततश्च रथन्तरादिगीतिभ्यः कथं देवताया बोधः। यासु ऋक्षु सामान्युत्पन्नानि तासु विद्यमानैः पदैर्विशिष्टोऽर्थोऽवगतः। देवताज्ञानं च तत एव जातम्। सैव देवता निषादादिस्वरसमूहस्यैकस्य भवितुमर्हति। व्यस्तानां सप्तानां स्वराणां तत्र-तत्र देवतानिर्देशः कृतः। न तु समवेतानाम्। अतश्च न कश्चन विरोधः। ऋगाश्रितानि छन्दांस्येव साम्नाम्। सामसु बह्वक्षरतया भिन्नैश्छन्दोभिर्भवितव्यम्। तथापि गायत्रीच्छन्दसैव व्यवहारः। सावित्र्यां "तत्सवितुः" इत्यस्यामुत्पन्नं साम हिम् स्थिआऽऽ इत्यादिवर्णघटितमपि गायत्री इत्येव व्यवह्रियते। तदेव गानं इमे वै लोकाः गायत्रम् इत्यादिना ब्राह्मणग्रन्थेषु बहुधा स्तूयते। ततश्च देवतायाः छन्दसश्च निर्णयः ऋगाश्रित एव। यद्येवं ऋषिरपि सर्वत्र समान एव स्यादिति चेत्। सत्यम्। परन्तु "युक्ताश्वो वा आङ्गिरसः शिशू जातौ विपर्यहरत्तस्मान्मन्त्रोऽपाक्रामत्स तपोऽतप्यत स एतद्यौक्ताश्वमपश्यत्तं मन्त्रमुपावर्तत"इति ब्राह्मणबलेन साम्नामन्ये ऋषयः, ऋचां चान्ये भवितुमर्हन्ति। तदेवं साम्नां देवता सिद्धा। यदैकं साम देवतान्तरघटितासु ऋक्षु गीयते तदा देवताभेदो भवति। अत एव अभित्वायामैन्द्र्यामुत्पन्नं रथन्तरं साम पावमान्यां पुनानायां गीतं सत् पवमानसोमदेवताकं भवति[1]।

साम्नां नामानि-कचिदृगाश्रितपदघटितानि यद्वाहिष्टीयम्, यज्ञायज्ञीयम्, इति, कचिदृषिनाम्ना निर्दिष्टानि रौरवम्, यौधाजयम् इति, कचिन्निधननाम्ना ओकोनिधनम् ईनिधनमिति-कचित्पूर्वम् उत्तरमिति अर्कपुष्पोत्तरम् अष्टादंष्ट्रपूर्वम् इति। इतोऽप्यन्ये विषया अनुलोमगीत-प्रतिलोमगीतोभयविधगीत--प्रत्युत्क्रमगीत-कर्षण-विनत-नमन-प्रेङ्खादयो मदीयसामतन्त्रभूमिकातोऽवगन्तव्याः। ग्रन्थगौरवभिया नात्र निर्दिष्टाः।

४४. प्र । सोमासः । मदच्युतः । मद । च्युतः । श्रवसे । नः । मघोनाम् ।

---

१३. यौधाजयम् ॥ युधाजित् । बृहती । पवमानः सोमः ।

प्रसोऽ३१ । माऽ२दे । व । वाइताऽ२३४याइ ॥ साइन्धूऽ३ः ।
नपाऽ२इ । प्येआऽ३४५ । णाऽ२३४सा । अꣳशोꣳपया । सा । मदिरोऽ२ ।
नजाऽ३४५ । गृऽ२३४वीः ॥ अच्छाऽ२ ॥ कोशाऽ२म् । मधूऽ३४५ ॥
श्चूऽ२३४ताम् ॥ श्रीः ॥ अच्छाऽ३१ । कोऽ३शम् । म । धूश्चूऽ२३४-
ताम् ॥ आच्छाऽ३ । कोशाऽ२म् । मधूऽ३४५ । श्चूऽ२३४ताम् ।
आहार्यतो । अ । जुनोआऽ२ । त्केआऽ३४५ । व्याऽ२३४ता ॥ प्रियाऽ२ः ॥
सूनूऽ२ः । नमाऽ३४५ ॥ जीऽ२३४याः ॥ श्रीः ॥ प्रियाऽ३१ः ।
सूऽ३नुः । न । मार्जाऽ२३४याः ॥ प्रायाऽ३ः । सूनूऽ२ः । नमा३४५ ।
जीऽ२३४याः । तमाइꣳहिन्वा । ति । अपसोऽ२ । यथाऽ३४५ ।
राऽ२३४थाम् ॥ नदाऽ२इ ॥ षूवाऽ२ । गभाऽ३४५ ॥ स्तीऽ२३४योः ॥

दी. ७. उत्. ६. मा. २८. चै ॥३३॥

१४. सꣳहितम् ॥ सꣳहितः साध्या देवाः । गायत्री । पवमानः सोमः ।

प्रसोमासोम । दाऽ२च्युताः ॥ श्रवाऽ२ । साऽ२३इनो ।

१२०. आदीꣳहꣳसो यथा गणं विश्वस्यावीवशन्मतिम् ।
अत्यो न गोभिरज्यते ॥२॥

१२१. आदीं त्रितस्य योषणो हरिꣳहिन्वन्त्यद्रिभिः ।
इन्दुमिन्द्राय पीतये ॥३॥
धा. १४. उ. न. स्व. ४. ली ॥२१॥

४५. प्रथमयोः अग्निश्चाक्षुषः । तृतीयस्याः प्रजापतिर्वैश्वामित्रो वाच्यो वा । उष्णिगनुष्टुभौ । पवमानः सोमः ।

१२२. अया पवस्व देवयू रेभन्पवित्रं पर्येषि विश्वतः । मधोर्धारा असृक्षत ॥१॥
१२३. पवते हर्यतो हरिरति ह्वराꣳसि रꣳह्या । अभ्यर्ष स्तोतृभ्यो वीरवद्यशः॥२॥

सुताः । विदथे । अक्रमुः ॥ आत् । ईम् । हꣳसः । यथा । गणम् । विश्वस्य । अवीविशत् । मतिम् । अत्यः । न । गोभिः । अज्यते ॥ आत् । ईम् । त्रितस्य । योषणः । हरिम् । हिन्वन्ति । अद्रिभिः । अ । द्रिभिः । इन्दुम् । इन्द्राय । पीतये ॥

४५. अया । पवस्व । देवयुः । रेभन् । पवित्रम् । परि । एषि । विश्वतः । मधोः । धाराः । असृक्षत ॥ पवते । हर्यतः । हरिः । अति । ह्वराꣳसि ।

माऽघोनाम् ॥ सूऽताः ॥ वाऽइदा । थाऽऽ । हाउवाऽ ॥ क्राऽऽमूः ॥ दी. ४. उत्. १. मा. ८. तै ॥३४॥

१५. सफम् ॥ देवाः । ककुप् । पवमानः सोमः ।

अयापाऽवस्व । दाइवाऽऽमूः ॥ रेभन्पवाइत्राऽम् । परियाइषीऽवाऽइ । श्वाऽऽताः ॥ मधोः ॥ धाराआऽसाऽ । क्षाऽतोऽ"हाइ ॥ दी. ३. उत्. ४. मा. १० ढौ । ॥३५॥

१६. आक्षारम् ॥ प्रजापतिः । उष्णिक् । पवमानः सोमः ।

पव । तेहाऽऽ । औहोऽयतोहराइः ॥ अतिह्वराꣳसिरꣳहाऽऽ-

१२४. प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।
अप श्वानमराधसꣳहता मखं न भृगवः ॥३॥

धा. ९. उ. न. स्व. ३. लि. ॥२२॥

षष्ठः खण्डः ॥

इति द्वितीयोऽध्यायः ॥

(इति प्रथमप्रपाठकस्य द्वितीयोऽर्धः)

(प्रथमप्रपाठकश्च समाप्तः)

रꣳह्या । अभि । अर्ष । स्तोतृभ्यः । वीरवत् । यशः ॥ प्र । सुन्वानाय । अन्धसः । मर्तः । न । वष्ट । तत् । वचः । अप । श्वानम् । अराधसम् । अ । राधसम् । हतं । मखम् । न । भृगवः ॥

इति द्वितीयोऽध्यायः ॥

याऽ३४ ॥ अभाऽ३४अर्षा ॥ स्तोतृभ्योवाइ । राऽ३वद्य ॥ शाऽ२३४५ः ॥

दी. ६. उत्. १. मा. ५. कु ॥३६॥

१७. गौरीवितम् ॥ गौरीवितिः । अनुष्टुप् । पवमानः सोमः ।

प्रसु । न्वानाऽ३ । यअन्धसाः ॥ मर्तोनवष्टतद्वचाऽ२३ः । आपश्वानाऽ३१२३म् । अराऽ४धसाम् ॥ हातामखाऽ३१२३म् ॥ नभोवा । गाऽ५वोऽ६"हाइ ॥

दी. ४. उत्. न. मा. ७. ले ॥३७॥

१८. गौतमम् ॥ गोतमः । अनुष्टुप् । पवमानः सोमः ।

प्रसुन्वानायअन्धसाः । मर्तोनवा । ष्टतद्वचाऽ२ः । अपा । औहोऽ२३४वा । श्वानमराधसाऽ२३४५म् ॥ हता । औहोऽ२३४वा । मखा । औहोऽ२३४वा ॥ नभूऽ५गवाः । होऽ५इ ॥ डा ॥

दी. ७. उत्. २. मा. ६. छू ॥३८॥

अथ तृतीयोऽध्यायः ।

(द्वितीयप्रपाठकस्य प्रथमोऽर्द्धः)

४६. जमदग्निर्भार्गवः । गायत्री । पवमानः सोमः ।

१२५. पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।
अभि विश्वानि काव्या ॥१॥

१२६. त्वꣳसमुद्रिया अपोग्रियो वाच ईरयन् । पवस्व विश्वचर्षणे ॥२॥

१२७. तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यं धावन्ति धेनवः ॥३॥
धा. १२. उ. न. स्व. ४ यी. ॥ १ ॥

४७. अमहीयुराङ्गिरसः । गायत्री । पवमानः सोमः ॥

१२८. पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥१॥

१२९. यस्य ते सख्ये वयꣳसासह्याम पृतन्यतः । तवेन्दो द्युम्न उत्तमे ॥२॥

१३०. या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।
रक्षा समस्य नो निदः ॥३॥
धा. ११. उ. न. स्व. १. ह ॥ २ ॥

४८. कश्यपो मारीचः । गायत्री । पवमानः सोमः ॥

१३१. वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥१॥

---

४६. पवस्व । वाचः । अग्रियः । सोम । चित्राभिः । ऊतिभिः । अभि । विश्वानि । काव्या ॥ त्वम् । समुद्रियाः । सम् । उद्रियाः । अपः । अग्रियः । वाचः । ईरयन् । पवस्व । विश्वचर्षणे । विश्व । चर्षणे ॥ तुभ्य । इमा । भुवना । कवे । महिम्ने । सोम । तस्थिरे । तुभ्यम् । धावन्ति । धेनवः ॥

४७. पवस्व । इन्दो । वृषा । सुतः । कृधि । नः । यशसः । जने । विश्वाः । अप । द्विषः । जहि ॥ यस्य । ते । सख्ये । स । ख्ये । वयम् । सासह्याम । पृतन्यतः । तव । इन्दो । द्युम्ने । उत्तमे ॥ या । ते । भीमानि । आयुधा । तिग्मानि । सन्ति । धूर्वणे । रक्ष । समस्य । नः । निदः ॥

४८. वृषा । सोम । द्युमान् । असि । वृषा । देव । वृषव्रतः । वृष ।

१३२. वृष्णस्ते वृष्ण्यꣳशवो वृषा वनं वृषा सुतः । स त्वं वृषन्वृषेदसि ॥२॥
१३३. अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । विनो राये दुरो वृधि ॥३॥

धा. ९. उ. न. स्व. ५. लु ॥ ३ ॥

४९. भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । गायत्री । पवमानः सोमः ॥

१३४. वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमान स्वर्दृशम् ॥१॥
१३५. यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः । द्रोणे सधस्थमश्नुषे ॥२॥
१३६. आ पवस्व सुवीर्यं मन्दमानस्स्वायुध । इहो ष्विन्दवा गहि ॥३॥

धा. ७. उ. न. स्व. न. यौ. ॥ ४ ॥

५०. अमहीयुराङ्गिरसः । गायत्री । पवमानः सोमः ।

१३७. पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमा वृणीमहे ॥१॥
१३८. ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया । तेभिर्न्स्सोम मृडय ॥२॥
१३९. स नः पुनान आ भर रयिं वीरवतीमिषम् ।
ईशानस्सोम विश्वतः ॥३॥

धा. १४. उ. न. स्व. २. ला. ॥५॥

प्रथमः खण्डः ॥

व्रतः । वृषा । धर्माणि । दधिषे । वृष्णः । ते । वृष्ण्यम् । शवः । वृषा । वनम् ।
वृषा । सुतः । सः । त्वम् । वृषन् । वृषा । इत् । असि । अश्वः । न । चक्रदः ।
वृषा । सम् । गाः । इन्दो । सम् । अर्वतः । वि । नः । राये । दुरः । वृधि ॥

४९. वृषा । हि । असि । भानुना । द्युमन्तम् । त्वा । हवामहे ।
पवमान । स्वर्दृशम् । स्वः । दृशम् ॥ यत् । अद्भिः । परिषिच्यसे । परि ।
सिच्यसे । मर्मृज्यमानः । आयुभिः । द्रोणे । सधस्थम् । सध । स्थम् । अश्नुषे ॥
आ । पवस्व । सुवीर्यम् । सु । वीर्यम् । मन्दमानः । स्वायुध । सु । आयुध ।
इह । उ । सु । इन्दो । आ । गहि ॥

५०. पवमानस्य । ते । वयम् । पवित्रम् । अभ्युन्दतः । अभि । उन्दतः ।
सखित्वम् । स । खित्वम् । आ । वृणीमहे ॥ ये । ते । पवित्रम् । ऊर्मयः ।

५१. मेधातिथिः काण्वः । गायत्री । अग्निः ।

१४०. अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥१॥

१४१. अग्निमग्निꣳहवीमभिस्सदा हवन्त विश्पतिम् ।
हव्यवाहं पुरुप्रियम् ॥२॥

१४२. अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ॥३॥

धा. १२. उ. न. स्व. न यौ ॥६॥

५२. मेधातिथिः काण्वः । गायत्री । मित्रावरुणौ ।

१४३. मित्रं वयꣳहवामहे वरुणꣳसोमपीतये । या जाता पूतदक्षसा ॥१॥

१४४. ऋतेन या वृतावृधावृतस्य ज्योतिषस्पती । ता मित्रा वरुणा हुवे ॥२॥

१४५. वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नस्सुराधसः ॥३॥

धा. १०. उ. न. स्व. २ वा. ॥७॥

अभिक्षरन्ति । अभि । क्षरन्ति । धारया । तेभिः । नः । सोम । मृडय ॥ सः । नः । पुनानः । आ । भर । रयिम् । वीरवतीम् । इषम् । ईशानः । सोम । विश्वतः ॥

५१. अग्निम् । दूतम् । वृणीमहे । होतारम् । विश्ववेदसम् । विश्व । वेदसम् । अस्य । यज्ञस्य । सुक्रतुम् । सु । क्रतुम् ॥ अग्निमग्निम् । अग्निम् । अग्निम् । हवीमभिः । सदा । हवन्त । विश्पतिम् । हव्यवाहम् । हव्य । वाहम् । पुरुप्रियम् । पुरु । प्रियम् ॥ अग्ने । देवान् । इह । आ । वह । जज्ञानः । वृक्तबर्हिषे । वृक्त । बर्हिषे । असि । होता । नः । ईड्यः ॥

५२. मित्रम् । मि । त्रम् । वयम् । हवामहे । वरुणम् । सोमपीतये । सोम । पीतये । या । जाता । पूतदक्षसा ॥ पूत । दक्षसा । ऋतेन । यौ । ऋतावृधौ । ऋत । वृधौ । ऋतस्य । ज्योतिषः । पतीइति । ता । मित्रा । मि । त्रा । वरुणा । हुवे । वरुणः । प्राविता । प्र । अविता । भुवत् । मित्रः । मि । त्रः । विश्वाभिः । ऊतिभिः । करताम । नः । सुराधसः । सु । राधसः ॥

५३. मधुच्छन्दा वैश्वामित्रः । गायत्री । इन्द्रः ॥

१४६. इन्द्रमिद्गाथिनो बृहदिन्द्रमर्कैभिरर्किणः । इन्द्रं वाणीरनूषत ॥१॥

१४७. इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः॥२॥

१४८. इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥३॥

१४९. इन्द्रो दीर्घाय चक्षस आ सूर्यꣳरोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥४॥

धा. ११. उ. २. स्व. २. खा. ॥८॥

५४. वसिष्ठो मैत्रावरुणिः । गायत्री । इन्द्राग्नी ।

१५०. इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे । धिया धेना अवस्यवः ॥१॥

१५१. ता हि शश्वन्त ईडत इत्था विप्रास ऊतये । सबाधो वाजसातये ॥२॥

१५२. ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे । मेधसाता सनिष्यवः ॥३॥

धा. ११. उ. न. स्व. ५. हु. ॥९॥

द्वितीयः खण्डः ॥

---

५३. इन्द्रम् । इत् । गाथिनः । बृहत् । इन्द्रम् । अर्केभिः । अर्किणः । इन्द्रम् । वाणीः । अनूषत ॥ इन्द्रः । इत् । हर्योः । सचा । संमिश्लः । सम् । मिश्लः । आ । वचोयुजा । वचः । युजा ॥ इन्द्रः । वज्री । हिरण्ययः ॥ इन्द्र । वाजेषु । नः । अव । सहस्रप्रधनेषु । सहस्र । प्रधनेषु । च । उग्रः । उग्राभिः । ऊतिभिः ॥ इन्द्रः । दीर्घाय । चक्षसे । आ । सूर्यम् । रोहयत् । दिवि । वि । गोभिः । अद्रिम् । अ । द्रिम् । ऐरयत् ॥

५४. इन्द्रे । अग्ना । नमः । बृहत् । सुवृक्तिम् । सु । वृक्तिम् । आ । ईरयामहे । धिया । धेनाः । अवस्यवः ॥ ता । हि । शश्वन्तः । ईडते । इत्था । विप्रासः । वि । प्रासः । ऊतये । सबाधः । स । बाधः । वाजसातये । वाज । सातये ॥ ता । वाम् । गीर्भिः । विपन्युवः । प्रयस्वन्तः । हवामहे । मेधसाता । मेध । साता । सनिष्यवः ॥

६

५५. भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । गायत्री । पवमानः सोमः ।

१५३. वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥१॥

१५४. तं त्वा धर्तारमोण्यो३ꣳ पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ॥२॥

१५५. अया चित्तो विपानया हरिꣳ पवस्व धारया । युजं वाजेषु चोदय ॥३॥

धा. १३. उ. १. स्व. १. ट. ॥१०॥

---

५५. वृषा । पवस्व । धारया । मरुत्वते । च । मत्सरः । विश्वा । दधानः । ओजसा । तम् । त्वा । धर्तारम् । ओण्योः । पवमान । स्वर्दृशम् । स्वः । दृशम् । हिन्वे । वाजेषु । वाजिनम् ॥ अया । चित्तः । विपा । अनया । हरिः । पवस्व । धारया । युजम् । वाजेषु । चोदय ॥

---

१९. यौक्ताश्वाद्यम् ॥ युक्ताश्वः । गायत्री । पवमानः सोमः ।

औहोहोहाइ । वृषा ॥ पवस्वऽ३धारायाऽ३ । मारूऽ२त्वाऽ२३४ताइ । ओइ । चमाऽ२३ । चमाऽ२त्साऽ२३४राः ॥ औहोहोहाइ । विश्वा ॥ दधाऽ२नाऽ२३४ओ । जासाऽ२३४औहोवा ॥ श्रीः ॥ औहोहोहाइ । तन्त्वा ॥ धर्तारऽ३मोणायोऽ३ः । पावाऽ२माऽ२३४ना । ओइ । सुवाऽ२३ । सुवाऽ२ꣳऽ२३४शाम् । औहोहोहाइ । हिन्वाइ ॥ वाजाऽ२इषूऽ२३४वा । जाइनाऽ२३४औहोवा ॥ श्रीः ॥ औहोहोहाइ । अया ॥ चित्तोविऽ३पानायाऽ३ । हाराऽ२इꣳपाऽ२३४वा । ओ । स्वर्धाऽ२३ । स्वधाऽ२राऽ२३४या ॥ औहोहोहाइ । युजाम् ॥ वाजाऽ२इषूऽ२३४चो । दायाऽ२३४औहोवा ॥ ओइ । ज्वरआ ॥

दी. १६. उत्. ६. मा. २४. की. ॥३९॥

*२०. ऐडमायास्यम् ॥ अयास्यः । बृहती । पवमानः सोमः ।

आइपुना ॥ नास्सो । मघारया । आपोवसाऽ३१ । नोअर्षसी ।

---

*नवमसूक्ते गीयते ।

आरत्नघाऽ३१ः । योनिमृता । स्यसीदसी ॥ ऊत्सोदेवाऽ३१ः ॥ हिरण्याऽ२३याऽ३४३ः ॥ श्रीः ॥ आउत्साः ॥ दाइवो । हिरण्ययाः । ऊत्सोदेवाऽ ३१ः । हिरण्ययाः । दूहानऊऽ३१ । घर्दिवियाम् । मधुप्रियाम् ॥ प्रात्नꣳसघाऽ३१ ॥ स्थमासाऽ२३दाऽ३४३त् ॥ श्रीः ॥ आइग्नाम् ॥ साधा । स्थमासदात् । प्रात्नꣳसघाऽ३१ । स्थमासदात् । आपृच्छियाऽ३१म् । धरुणंवा । जियर्षसाइ ॥ नृभिर्धौताऽ३१ः ॥ विचक्षाऽ२३णाऽ३४३ः ॥ ओऽ२३४५इ ॥डा॥

दी. ९. उत्. १२. मा. २४. थी. ॥४०॥

प्रथमः प्रपाठकः ॥

द्वितीयो विꣳशः ॥

*१. त्रिणिधनमायास्यम् ॥ अयास्यः । बृहती । पवमानः सोमः ।

पुनानस्सोमधाहाउहोवा ॥ रायाआऽ२३४पो । वसाऽ२ । नआऽ३४५ । षाऽ२३४सो ॥ आराऽ३४ । औहोवा ॥ त्नघायोनिमृताऽ२ । स्यसाऽ३४५इ । दाऽ२३४सो ॥ उत्साऽ३४ । औहोवा ॥ दाइवोऽ२ । हिराऽ३४५ ॥ ण्याऽ२३४याः ॥ श्रीः ॥ उत्सोदेवोहिराहाउहोवा ॥ ण्यायाऊऽ२३४त्साः । दाइवोऽ२ । हिराऽ३४५ । ण्याऽ२३४याः ॥ दुहाऽ३४ । औहोवा ॥ नऊघर्दिवियाऽ२म् । मधूऽ३४५ । ग्रीऽ२३४याम् ॥ प्रत्नाऽ३४ । औहोवा ॥ साघाऽ२ । स्थमाऽ३४५ ॥ साऽ२३४दात् ॥ श्रीः ॥ प्रत्नꣳसघस्थमाहाउहोवा ॥ सादत्प्राऽ२३४त्नाम् । सघाऽ२ । स्थमाऽ३४५ । साऽ२३४दात् ॥ आपाऽ३४ । औहोवा ॥ छ्यंधरुणंवाऽ२ । जियाऽ३४५ । षाऽ२३४सो ॥ नृभाऽ३४ । औहोवा ॥ धौतोऽ२ । विचाऽ३४५ ॥ क्षाऽ२३४णाः ॥

दी. २८. उत्. ३. मा. १९. डो ॥४१॥

---

*नवमसूक्ते गीयते ।

५६. उपमन्युर्वासिष्ठः । त्रिष्टुप् । पवमानः सोमः ॥

१५६. वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥१॥

१५७. रसाय्य॑ पयसा पिन्वमान ईरयन्नेषि मधुमन्तमꣳशुम् ।
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥२॥

१५८. एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥३॥

धा. ३८. उ. न. स्व. ३. रि. ॥११॥

तृतीयः खण्डः ॥

---

५६. वृषा । शोणः । अभिकनिक्रदत् । अभि । कनिक्रदत् । गाः ।
नदयन् । एषि । पृथिवीम् । उत । द्याम् । इन्द्रस्य । इव । वग्नुः । आ । शृण्वे ।
आजौ । प्रचोदयन् । प्र । चोदयन् । अर्षसि । वाचम् । आ । इमाम् ॥
रसाय्यः । पयसा । पिन्वमानः । ईरयन् । एषि । मधुमन्तम् । अꣳशुम् ।
पवमान । सन्तनिम् । सम् । तनिम् । एषि । कृण्वन् । इन्द्राय । सोम ।
परिषिच्यमानः । परि । सिच्यमानः । एव । पवस्व । मदिरः । मदाय । उदग्रा-
भस्य । उद । ग्राभस्य । नमयन् । वधस्नुम् । वध । स्नुम् । परि । वर्णम् ।
भरमाणः । रुशन्तम् । गव्युः । नः । अर्ष । परि । सोम । सिक्तः ॥

---

२. वासिष्ठम् ॥ वसिष्ठः । त्रिष्टुप् । पवमानः सोमः ।

औहोवाहाऽ३होइ । इहा । वृषाशोणो । अभिक । निक्रदद्गाः ॥
नदयन्नाइ । षीऽ३पृथि । वीमुतद्याम् ॥ इन्द्रस्येवा । वग्नुरा । शृण्व-
आजाउ ॥ प्रचोदयान् । अर्षसि । वाऽ३४३ । चाऽ३माऽ५इ"माऽ६५६म् ॥
श्रीः ॥ रसायियाः । पयसा । पिन्वमानाः ॥ ईरयन्नाइ । षीऽ३मधु ।
मन्तमꣳशूम् ॥ पवमाना । सन्तनिम् । एषिकृण्वान् ॥ इन्द्रायसो ।

५७. शंयुर्बार्हस्पत्यः। बृहतीसतोबृहत्यौ (प्रगाथः)। इन्द्रः।

१५९. त्वामिद्धि हवामहे सातौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वा काष्ठास्वर्वतः ॥१॥

१६०. स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः।
गामश्वꣳरथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२॥

धा. १०. उ. २. स्व. ५. फु ॥१२॥

५८. वालखिल्याः; प्रस्कण्वः काण्वः। बृहतीसतोबृहत्यौ (प्रगाथः)। इन्द्रः॥

१६१. अभि प्रवस्सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुस्सहस्रेणेव शिक्षति ॥१॥

---

५७. त्वाम्। इत्। हि। हवामहे। सातौ। वाजस्य। कारवः। त्वाम्। वृत्रेषु। इन्द्र। सत्पतिम्। सत्। पतिम्। नरः। त्वाम्। काष्ठासु। अर्वतः। सः। त्वम्। नः। चित्र। वज्रहस्त। वज्र। हस्त। धृष्णुया। महः। स्तवानः। अद्रिवः। अ। द्रिवः। गाम्। अश्वम्। रथ्यम्। इन्द्र। सम्। किर। सत्रा। वाजम्। न। जिग्युषे।

५८. अभि। प्र। वः। सुराधसम्। सु। राधसम्। इन्द्रम्। अर्च।

माऽ३परि । षाऽ३४३इ । च्याऽ३माऽ५"नाऽ६५६ः ॥ श्रीः ॥
एवापवा । स्वाऽ३मदि । रोमदाया ॥ उदग्राभा । स्याऽ३नम । यन्व-
धस्नूम् ॥ परिवर्णाम् । भरमा । णोरुशन्ताम् ॥ औहोवाहाऽ३होइ ।
इहा । गव्युनोआ । षाऽ३परि । सोऽ३४३ । माऽ३साऽ५इ"क्ताऽ६५६ः ॥

दी. २१. उत्. १८. मा. २४. गी. ॥४२॥

३. श्यैतम्॥ प्रजापतिः। बृहती। इन्द्रः।

अभिप्रवस्सुरा । धसाऽ३४औहोवा ॥ आइन्द्रमर्च । यथाविदा-
ऽ२३४इ । ओऽ६हा । योजरितृभ्यः । माघाऽ२३वा । पुरूऽ२ । वाऽ२३४-

१६२. शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥
धा. १६. उ. न. स्व. ३. हि ॥१३॥

५९. नृमेध आङ्गिरसः । बृहतीसतोबृहत्यौ (प्रगाथः) । इन्द्रः ।

१६३. त्वामिदाह्यो नरोऽपीप्यन्वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥१॥

यथा । विदे । यः । जरितृभ्यः । मघवा । पुरूवसुः । पुरु । वसुः । सहस्रेण ।
इव । शिक्षति । शतानीका । शत । अनीका । इव । प्र । जिगाति । धृष्णुया ।
हन्ति । वृत्राणि । दाशुषे । गिरेः । इव । प्र । रसाः । अस्य । पिन्विरे ।
दत्राणि । पुरुभोजसः । पुरु । भोजसः ॥

५९. त्वाम् । इदा । ह्यः । नरः । अपीप्यन् । वज्रिन् । भूर्णयः । सः ।
इन्द्र । स्तोमवाहसः । स्तोम । वाहसः । इह । श्रुधि । उप । स्वसरम् । आ ।

सूः ॥ सहस्रेणाइवाऽ३शा ॥ हुम्माइ । क्षाऽ२ताऽ२३४औहोवा ॥ श्रीः ॥
सहस्रेणेवशि । क्षताऽ३४औहोवा ॥ साहस्रेणे । वशाइक्षताऽ२३४इ ।
ओऽ६हा । शतानीकेव । प्राजाऽ२३इगा । तिघाऽ२ । ष्णूऽ२३४या ॥
हन्तिवृत्राणीऽ३दा ॥ हुम्माइ । शूऽ२षाऽ२३४औहोवा ॥ श्रीः ॥
हन्तिवृत्राणिदा । शुषाऽ३४औहोवा ॥ हान्तिवृत्रा । णिदाशुषाऽ२३४इ ।
ओऽ६हा । गिरेरिवप्र । रासाऽ२३आ । स्यपाऽ२इ । न्वाऽ२३४इराइ ॥
दत्राणिपूरूऽ३भो ॥ हुम्माइ ॥ जाऽ२साऽ२३४औहोवा ॥ वाऽ२३४सू ॥
दी. २७. उत्. ६. मा. २२. चा. ॥४३॥

४. माधुश्छन्दसम् ॥ मधुच्छन्दाः । बृहती । पवमानः सोमः ॥

त्वामिदा । होइ । हियोनराऽ६ए ॥ अपाइप्यन्वा । जाइन्भूर्णा-
ऽ२३४याः ॥ सइन्द्रस्तोमवाहसः । इहाश्रूधा । औहोऽ३४वाहाइ ॥
उपास्वासा । औहोऽ३४वाहा ॥ रमागाऽ२३हाऽ३४३इ ॥ श्रीः ॥ उप-

१६४. मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः ।
तव श्रवाꣳस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः ॥२॥
धा. १९. उ. न. स्व. १. ल. ॥१४॥

चतुर्थः खण्डः ।

६०. अमहीयुराङ्गिरसः । गायत्री । पवमानः सोमः ॥

१६५. यस्ते मदो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशꣳसहा ॥१॥
१६६. जह्निर्वृत्रममित्रियꣳसस्निर्वाजं दिवेदिवे । गोषातिरश्वसा असि ॥२॥

गहि ॥ मत्स्व । सुशिप्रिन् । सु । शिप्रिन् । हरिवः । तम् । ईमहे । त्वया । भूषन्ति । वेधसः । तव । श्रवाꣳसि । उपमानि । उप । मानि । उक्थ्य । सुतेषु । इन्द्र । गिर्वणः । गिः । वनः ॥

६०. यः । ते । मदः । वरेण्यः । तेन । पवस्व । अन्धसा । देवावीः । देव । अवीः । अघशꣳसहा । अघशꣳस । हा । जह्निः । वृत्रम् । अमित्रियम् । अ । मित्रियम् । सस्निः । वाजम् । दिवेदिवे । दिवे । दिवे । गोषातिः । गो ।

स्वसा । हो । रमागहीऽ६ए ॥ उपास्वसा । रामागाऽ२३४ही । मत्स्वा-
सुशिप्रिन्हरिवः । तमाइमाहा । औहोऽ३४वाहाइ ॥ त्वयाभूषा । औहो-
ऽ३४वाहा । तिवेधाऽ२३साऽ३४३ः ॥ श्रीः ॥ त्वयाभूषा । हो । तिवेध-
साऽ६ए ॥ त्वयाभूषा । तीवेधाऽ२३४साः । तवश्रवाꣳस्युपमा । नियूक्थाया ।
औहोऽ३४वाहाइ ॥ सुताइषूवा । औहोऽ३४वाहाइ ॥ द्रगिर्वाऽ२३णा-
ऽ३४३ः । ओऽ२३४५इ ॥ डा ॥ दी. २९. उत्, १२. मा. २१. थ. ॥४४॥

५. हाविष्मतम् । हविष्मान् । गायत्री । पवमानः सोमः ।

हाउयस्तेमदोवरेणियोहाउ ॥ तेनापवाऽ३ । स्वाअन्धाऽ२३४सा ।
ऐऽ२होऽ१आऽ२३इहो ॥ देवावाऽ३इरा ॥ घश । साऽ२हाऽ२३४औ-
होवा ॥ श्रीः ॥ हाउजह्निर्वृत्रममित्रियꣳहाउ ॥ सस्निर्वाजाऽ३म् । दाइवेदा-

१६७. सम्मिश्लो अरुषो भुवस्सूपस्थाभिर्न धेनुभिः ।
सीदं च्छ्येनो न योनिमा ॥३॥
धा. १२. उ. १. स्व. न. चौ. ॥१५॥

६१. नहुषो मानवः । अनुष्टुप् । पवमानः सोमः ।

१६८. अयं पूषा रयिर्भगस्सोभ~पुनानो अर्षति ।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥१॥

सातिः । अश्वसाः । अश्व । साः । असि ॥ संमिश्लः । सम् । मिश्लः । अरुषः । भुवः । सूपस्थाभिः । सु । उपस्थाभिः । न । धेनुभिः । सीदन् । श्येनः । न । योनिम् । आ ।

६१. अयम् । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति । पतिः । विश्वस्य । भूमनः । वि । अख्यत् । रोदसीइति । उभेइति ॥ सम् । उ ।

ऽ२३४इवाइ । ऐऽ२होऽ१आऽ२३इही ॥ गोषाताऽ३इरा ॥ श्वसाः । आ-ऽ२साऽ२३४औहोवा ॥ श्रीः ॥ हाउसम्मिश्लोअरुषोभुवोहाउ ॥ सूपस्थाभो-ऽ३ः । नाधेनूऽ२३४भाइः । ऐऽ२होऽ१आऽ२३इही ॥ सीदाञ्छ्याऽ३इ-नाः । नयो । नाऽ२इमाऽ२३४औहोवा ॥ हविष्मतेऽ२३४५ ॥
दी. २६. उत्. ७. मा. ३०. खौ. ॥४५॥

६. शङ्कु ॥ प्रजापतिः । ककुप् । पवमानः सोमः ॥

*पवस्वमा । एऽ२ । धुमा ॥ तमाः । इन्द्रायसोमक्रतुवित्तमो-माऽ२३दाः ॥ माहीऽ२द्यूक्षाऽ२३ ॥ तमोऽ२३४वा । माऽ५दोऽ६"हाइ ॥
दी. ४. उत्. १. मा. ३. ति. ॥४६॥

७. सुज्ञानम् ॥ इन्द्रः । उष्णिक् । पवमानः सोमः ।

†इन्द्रमच्छा ॥ सुताइमाइ । वृषणांयाऽ२ । तुहरयाः ॥ श्रुष्टे-जाताऽ२ ॥ सइ । दाऽ२वाऽ२३४औहोवा ॥ सुवर्विदएऽ३उपाऽ२३४५ ॥
दी. ४. उत्. ५. मा. ७. ने. ॥४७॥

---

*षोडशसूक्तस्य प्रथमायामृचि गीयते । †सप्तदशसूक्तस्य प्रथमायामृचि गीयते ।

१६९. सम्मु प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमास॒ः कृण्वते पथ॒ः पवमानास इन्दवः ॥२॥

१७०. य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
य॒ः पञ्च चर्षणीरभि रयिं येन वनामहे ॥३॥

धा. १९. उ. २. स्व. ५. थु ॥१६॥

प्रियाः । अनूषत । गावः । मदाय । घृष्वयः । सोमासः । कृण्वते । पथः । पवमानासः । इन्दवः ॥ यः । ओजिष्ठः । तम् । आ । भर । पवमान । श्रवाय्यम् । यः । पञ्च । चर्षणीः । अभि । रयिम् । येन । वनामहे ॥

---

८. गौरीवितम् ॥ गौरीवितिः । अनुष्टुप् । पवमानः सोमः ।

अयम् । पूषाऽ३ । रयिर्भगाः ॥ सोम॒ः पुनानोअर्षताऽ२३इ ।
पातिर्विश्वाऽ३१२३ । स्यभूऽ५मनाः ॥ वायख्यद्रोऽ३१२३ । दसोवा ।
ऊऽ५भोऽ६"हाइ ॥ दी. ४. उत्. न. मा. ६. लू. ॥४८॥

९. तृतीयं क्रौञ्चम् ॥ क्रुङ्. अनुष्टुप् । पवमानः सोमः ।

अयंपूषा । हो । रयिर्भगाऽ६ए ॥ सोमाऽ२॒पुनाऽ२ । नआ-
ऽ३४५ । षाऽ२३४ती । पतिर्विश्वस्यभूमनाऽ२३४५ः । वियख्याऽ२३द्रो ॥
दसीऊऽ२३भाऽ३४३इ ॥ श्रीः ॥ सम्मुप्रियाः । हो । अनूषताऽ६ए ॥
गावोऽ२मदाऽ२ । यघाऽ३४५ । ष्वाऽ२॒३४याः । सोमास॒ः कृण्वते-
पथाऽ१ः ॥ पवमाऽ२३ना ॥ सइन्दाऽ२३वाऽ३४३ः ॥श्रीः॥ यओजिष्ठाः ।
हो । तमाभराऽ६ए ॥ पावाऽ२मानाऽ२ । श्रवाऽ३४५ । योऽ२३४-
याम् । य॒ः पञ्चचर्षणीरभीऽ१ ॥ रयिम्याऽ२३इना ॥ वनामाऽ२३हा-
ऽ३४३इ । ओऽ२३४५इ ॥डा॥ दी. १५. उत्. ६. मा. १८. पै. ॥४९॥

७

६२. सिकता निवावरी पृश्नियोऽजाः। जगती। पवमानः सोमः॥

१७१. वृषा मतीनां पवते विचक्षणस्सोमो अह्नां प्रतरीतोषसां दिवः।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥१॥

१७२. मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत्।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुँ सख्याय वर्धयन् ॥२॥

१७३. अयं पुनान उषसो अरोचयदयँ सिन्धुभ्यो अभवदु लोककृत्।
अयं त्रिस्सप्त दुदुहान आशिरँ सोमो हृदे पवते चारु मत्सरः ॥३॥

धा. ३६. उ. ३. स्व. ४. गी ॥१७॥

पञ्चमः खण्डः।

---

६२. वृषा। मतीनाम्। पवते। विचक्षणः। वि। चक्षणः। सोमः। अह्नाम्। अ। ह्नाम्। प्रतरिता। प्र। तरिता। उषसाम्। दिवः। प्राणा। प्र। आना। सिन्धूनाम्। कलशान्। अचिक्रदत्। इन्द्रस्य। हार्दि। आविशन्। आ। विशन्। मनीषिभिः॥ मनीषिभिः। पवते। पूर्व्यः। कविः। नृभिः। यतः। परि। कोशान्। असिष्यदत्। त्रितस्य। नाम। जनयन्। मधु। क्षरन्। इन्द्रस्य। वायुम्। सख्याय। स। ख्याय। वर्द्धयन्। अयम्। पुनानः। उषसः। अरोचयत्। अयम्। सिन्धुभ्यः। अभवत्। उ। लोककृत्। लोक। कृत्। अयम्। त्रिः। सप्त। दुदुहानः। आशिरम्। आ। शिरम्। सोमः। हृदे। पवते। चारु। मत्सरः॥

---

१०. याममम्॥ यमः। जगती। पवमानः सोमः।

आऽइ। इया। वृषामताइनाऽम्पवताऽइ। वाऽइचक्षणाः॥ सोमोअह्नांप्रतरीतोऽइ। षाऽइसांदिवः॥ प्राणासिन्धूनाऽम्कलशाऽइ। आऽइचिक्रदत्॥ इन्द्रस्यहार्दियाविशाऽइन्। मनाऽइषाऽइ"भाऽइइः॥श्रीः॥ मनीषिभाइः पवतेपूऽइ। वींऽइयः कविः॥ नृभिर्य-

६२. श्रुतकक्षः सुकक्षो वा आङ्गिरसः । गायत्री । इन्द्रः ॥

१७४. एवाह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥१॥

१७५. एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।
अधा चिदिन्द्र नस्सचा ॥२॥

१७६. मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥३॥

धा. १४. उ. १. स्व. ३. ति ॥१८॥

---

६३. एव । हि । असि । वीरयुः । एव । शूरः । उत । स्थिरः । एव । ते । राध्यम् । मनः ॥ एव । रातिः । तुवीमघ । तुवि । मघ । विश्वेभिः । धायि । धातृभिः । अध । चित् । इन्द्र । नः । सचा । मा । उ । सु । ब्रह्मा । इव । तन्द्रयुः । भुवः । वाजानाम् । पते । मत्स्व । सुतस्य । गोमतः ॥

ता॒ परिकोशꣳऽ२३ । आऽ३सिष्यदत् ॥ त्रितस्यनामजनयाऽ२३न् ।
माऽ३धुक्षरन् ॥ इन्द्रस्यवायुꣳसखियाऽ२३ । यवाऽ३द्धाऽ५"याऽ६५६न् ॥
श्रीः ॥ अयंपुनानउषसोऽ२३ । आऽ३रोचयत् ॥ अयꣳसिन्धूभ्योऽ१अभवा-
ऽ२३त् । ऊऽ३लोककृत् ॥ अयंत्रिस्साप्तदुदुहाऽ२३ । नाऽ३आशिरम् ॥
आऽ२इ । इया । सोमोहृदाइपवतेचाऽ२३ । रुमाऽ३त्साऽ५"राऽ६५६ः ॥

दी. २७. उत्. न. मा. २९. यो. ॥५०॥

११. उक्थ्यामहीयवम् ॥ अमहीयुः । गायत्री । इन्द्रः ।

एवाहोऽ३असिवीरयूः ॥ एवाशूऽ१राऽ२रः । उताऽ२३स्थिराः ॥
आइवातेरा ॥ धियाऽ२३म्मनाउ । वाऽ३ ॥ श्रीः ॥ एवाराऽ३तिस्तुवी-
मघा । विश्वाइभाऽ१इर्धाऽ२ । यिधाऽ२३तृभाइः ॥ आधाचिदाइ ॥ द्रना-
ऽ२३स्सचाउ । वाऽ३ ॥श्रीः॥ मोषुब्राऽ३ह्मेवतन्द्रयूः ॥ भुवोवाऽ१जाऽ२ ।
नाऽ२३म्पताइ ॥ मात्स्वासुता ॥ स्यगोऽ२३मताउ । वाऽ३ ॥
स्तोषेऽ३४५ ।

दी. १४. उत्. ३. मा. १५. दु. ॥५१॥

६४. जेता माधुच्छन्दसः। अनुष्टुप्। इन्द्रः।

१७७. इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः।
रथीतमꣳरथीनां वाजानाꣳसत्पतिं पतिम् ॥१॥

१७८. सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।
त्वामभि प्र नोनुमो जेतारमपराजितम् ॥२॥

१७९. पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः।
यदा वाजस्य गोमत स्तोतृभ्यो मꣳहते मघम् ॥३॥

धा. १८. उ. न. स्व. ४. री. ॥१९॥

षष्ठः खण्डः॥

इति तृतीयोऽध्यायः॥

(द्वितीयप्रपाठकस्य प्रथमोऽर्धः)

---

६४. इन्द्रम्। विश्वाः। अवीवृधन्। समुद्रव्यचसम्। समुद्र। व्यचसम्। गिरः। रथीतमम्। रथीनाम्। वाजानाम्। सत्पतिम्। सत्। पतिम्। पतिम्। सख्ये। स। ख्ये। ते। इन्द्र। वाजिनः। मा। भेम। शवसः। पते। त्वाम्। अभि। प्र। नोनुमः। जेतारम्। अपराजितम्। अ। पराजितम्। पूर्वीः। इन्द्रस्य। रातयः। न। वि। दस्यन्ति। ऊतयः। यदा। वाजस्य। गोमतः। स्तोतृभ्यः। मꣳहते। मघम्॥

इति तृतीयोऽध्यायः।

---

१२. आष्टादꣳष्ट्रं पूर्वम्॥ अष्टादंष्ट्रः। अनुष्टुप्। इन्द्रः।

इन्द्रंविश्वाअवीवृधन्। ऐयाहाइ॥ समूद्राऽ१व्याऽ२। चसाङ्गाऽ१इराऽ२३ः। ऐयाऽ२३हाइ॥ रथाइताऽ१माऽ२म्। रथाइनाऽ२३म्। ऐयाऽ२३हाइ॥ वाजानाऽ१ꣳसाऽ२त्। पताइम्पाऽ१तीऽ२३म्। ऐयाऽ२३हाऽ३४३इ॥ श्रीः॥ सख्येतइन्द्रवाजिनः। ऐयाहाइ॥ माभाइमाऽ१शाऽ२। वसास्पाऽ१ताऽ२३इ। ऐयाऽ२३हाइ॥ तुवामाऽ१भीऽ२। प्रनोनूऽ१मा२३ः। ऐयाऽ२३हाइ॥ जेताराऽ१माऽ२। पराजाऽ१इता-

अथ चतुर्थोऽध्यायः ॥

(द्वितीयप्रपाठकस्य द्वितीयोऽर्धः)

६५. जगदग्निर्भार्गवः । गायत्री । पवमानः सोमः ।

१८०. एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा ॥१॥

१८१. विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
त्मनाकृण्वन्तो अर्वतः ॥२॥

---

६५. एते । असृग्रम् । इन्दवः । तिरः । पवित्रम् । आशवः । विश्वानि ।
अभि । सौभगा । सौ । भगा ॥ विघ्नन्तः । वि । घ्नन्तः । दुरिता । दुः । इता ।

ऽ२३म् । ऐयाऽ२३हाऽ३४३इ ॥ श्रीः ॥ पूर्वीरिन्द्रस्यरातयः । ऐयाहाइ ॥
नवाइदाऽ१स्याऽ२ । तियूताऽ१याऽ२३ः । ऐयाऽ२३हाइ ॥ यदावाऽ१-
जाऽ२ । स्यगोमाऽ१ताऽ२३ः । ऐयाऽ२३हाइ ॥ स्तोतृभ्योऽ१माऽ२ । हता-
इमाऽ१घाऽ२३म् । ऐयाऽ२३हाऽ३४३इ । ओऽ२३४५इ ॥डा॥

दी. २०. उत्. २०. मा. ३७. दे. ॥५२॥

१३. क्षुल्लकवैष्टम्भम् ॥ विष्टम्भः । गायत्री । पवमानः सोमः ।

*उच्चाऽ५ते । जाऽ३तमन्धसाः ॥ दाइविसद्भू । मियादाऽ१देऽ२३ ।
होवाऽ३हाइ ॥ उग्राःशाऽ१र्माऽ२३ । होवाऽ३हाइ ॥ महि ॥ श्राऽ२वा-
ऽ२३४औहोवा ॥ श्रीः ॥ सनाऽ५इ । द्राऽ३ययज्यवाइ ॥ वारुणाय ।
मरुद्भाऽ१याऽ२३ः । होवाऽ३हाइ ॥ वराइवोऽ१वीऽ२३त् । होवाऽ३हाइ ॥
परि । स्राऽ२वाऽ२३४औहोवा ॥ श्रीः ॥ एनाऽ५वि । श्वाऽ३नि
अयंआ ॥ द्युम्नानिमा । नूषाऽ१णाऽ२३म् । होवाऽ३हाइ ॥ सिषासाऽ-
ऽ१न्ताऽ२३ः । होवाऽ३हाइ ॥ वना । माऽ२हाऽ२३४औहोवा ॥
दीऽ२३४शाः ॥

दी. १३. उत्. ५. मा. २१. ण. ॥५३॥

---

* अष्टमे सूक्ते गीयते ।

१८२. कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् । इडामस्मभ्यꣳसंयतम् ॥३॥
धा. ७. उ. न. स्व. २. या. ॥१॥

६६. भृगुर्वारुणिः । जमदग्निर्भार्गवो वा । गायत्री । पवमानः सोमः ॥

१८३. राजा मेघाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥१॥

१८४. आ नस्सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥२॥

१८५. आ न इन्दो शतग्विनं गवां पोषꣳस्वश्व्यम् । वहा भगत्तिमूतये॥३॥
धा. १४. उ. न. स्व. २. ला. ॥२॥

६७. कविर्भार्गवः । गायत्री । पवमानः सोमः ।

१८६. तं त्वा नृम्णानि बिभ्रतꣳसधस्थेषु महो दिवः । चारुꣳसुकृत्ययेमहे ॥१॥

१८७. संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् । शतं पुरो रुरुक्षणिम् ॥२॥

१८८. अतस्त्वा रायरभ्य यद्राजानꣳसुक्रतो दिवः । सुपर्णो अव्यथी भरत् ॥३॥

१८९. अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥४॥

१९०. विश्वस्मा इत्स्वदृशे साधारणꣳरजस्तुरम् । गोपामृतस्य विभरत् ॥५॥
धा. २६. उ. न. स्व. ६. हू. ॥३॥

पुरु । सुगा । सु । गा । तोकाय । वाजिनः । त्मना । कृण्वन्तः । अर्वतः ॥
कृण्वन्तः । वरिवः । गवे । अभि । अर्षन्ति । सुष्टुतिम् । सु । स्तुतिम् । इडाम् ।
अस्मभ्यम् । संयतम् । सम् । यतम् ॥

६६. राजा । मेघाभिः । ईयते । पवमानः । मनौ । अधि । अन्तरिक्षेण ।
यातवे ॥ आ । नः । सोम । सहः । जुवः । रूपम् । न । वर्चसे । भर ।
सुष्वाणः । देववीतये । देव । वीतये ॥ आ । नः । इन्दो । शतग्विनम् ।
शत । ग्विनम् । गवाम् । पोषम् । स्वश्व्यम् । सु । अश्व्यम् । वह । भगत्तिम् ।
ऊतये ॥

६७. तम् । त्वा । नृम्णानि । बिभ्रतम् । सधस्थेषु । सध । स्थेषु ।
महः । दिवः । चारुम् । सुकृत्यया । सु । कृत्यया । ईमहे ॥ संवृक्तधृष्णुम् ।

६८. कश्यपो मारीचः। गायत्री। पवमानः सोमः।

१९१. इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि ॥१॥
१९२. पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम् ॥२॥
१९३. पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः ॥३॥
धा. १७. उ. न. स्व. २. या ॥४॥

प्रथमः खण्डः ॥

६९. मेधातिथिः काण्वः। गायत्री। अग्निः।

१९४. अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा। हव्यवाड्जुह्वास्यः ॥१॥
१९५. यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति। तस्य स्म प्राविता भव ॥२॥
१९६. यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृडय ॥३॥
धा. १३. उ. न. स्व. ३. रि. ॥५॥

सवृक्त। धृष्णुम्। उक्थ्यम्। महामहिव्रतम्। महा। महिव्रतम्। मदम्। शतम्। पुरः। रुरुक्षणिम्। अतः। त्त्वा। रयिः। अभि। अयत्। राजानम्। सुक्रतो। सु। क्रतो। दिवः। सुपर्णः। सु। पर्णः। अव्यथी। अ। व्यथी। भरत्॥ अध। हिन्वानः। इन्द्रियम्। ज्यायः। महित्वम्। आनशे। अभिष्टिकृत्। अभिष्टि। कृत्। विचर्षणिः। वि। चर्षणिः। विश्वस्मै। इत्। स्वः। दृशे। साधारणम्। रजस्तुरम्। गोपाम्। गो। पाम्। ऋतस्य। विः। भरत्॥

६८. इषे। पवस्व। धारया। मृज्यमानः। मनीषिभिः। इन्दो। रुचा। अभि। गाः। इहि॥ पुनानः। वरिवः। कृधि। ऊर्जम्। जनाय। गिर्वणः। गिः। वनः। हरे। सृजानः। आशिरम्। आ। शिरम्॥ पुनानः। देववीतये। देव। वीतये। इन्द्रस्य। याहि। निष्कृतम्। निः। कृतम्। द्युतानः। वाजिभिः। हितः।

६९. अग्निना। अग्निः। सम्। इध्यते। कविः। गृहपतिः। गृह। पतिः। युवा। हव्यवाट्। हव्य। वाट्। जुह्वास्यः। जुहू। आस्यः॥ यः। त्वाम्।

७०. मधुच्छन्दा वैश्वामित्रः । गायत्री । मित्रावरुणौ ।

१९७. मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीꣳ साधन्ता ॥१॥

१९८. ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥२॥

१९९. कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥३॥

धा. १०. उ. न. स्व. १. व. ॥६॥

७१. मधुच्छन्दा वैश्वामित्रः । गायत्री । इन्द्रमरुन्मरुदिन्द्राः ।

२००. इन्द्रेण सꣳहि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥१॥

२०१. आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥२॥

२०२. वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ॥३॥

धा. १४. उ. १. स्व. ३. ति. ॥७॥

अग्ने । हविष्पतिः । हविः । पतिः । दूतम् । देव । सपर्यति । तस्य । स्म । प्रविता । प्र । अविता । भव ॥ यः । अग्निम् । देववीतये । देव । वीतये । हविष्मान् । आविवासति । आ । विवासति । तस्मै । पावक । मृडय ॥

७०. मित्रम् । मि । त्रम् । हुवे । पूतदक्षम् । पूत । दक्षम् । वरुणम् । च । रिशादसम् । धियम् । घृताचीम् । साधन्ता । ऋतेन । मित्रा । मि । त्रा । वरुणौ । ऋतावृधौ । ऋत । वृधौ । ऋतस्पृशा । ऋत । स्पृशा । क्रतुम् । बृहन्तम् । आशाथेइति । कवीइति । नः । मित्रा । मि । त्रा । वरुणा । तुविजातौ । तुवि । जातौ । उरुक्षया । उरु । क्षया । दक्षम् । दधातेइति । अपसम् ॥

७१. इन्द्रेण । सम् । हि । दृक्षसे । संजग्मानः । सम् । जग्मानः । अबिभ्युषा । अ । बिभ्युषा । मन्दू इति । समानवर्चसा । समान । वर्चसा । आत् । अह । स्वधाम् । स्व । धाम् । अनु । पुनः । गर्भत्वम् । एरिरे । आ । इरिरे । दधानाः । नाम । यज्ञियम् । वीडु । चित् । आरुजत्नुभिः । आ । रुजत्नुभिः । गुहा । चित् । इन्द्र । वह्निभिः । अविन्दः । उस्रियाः । उ । स्रियाः । अनु ॥

७२. भरद्वाजो बार्हस्पत्यः । गायत्री । इन्द्राग्नी ।

२०३. ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ॥१॥

२०४. उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥२॥

२०५. हथो वृत्राण्यार्या हथो दासानि सत्पती । हथो विश्वा अप द्विषः ॥३॥

धा. १०. उ. १. स्व. ४. पी. ॥८॥

द्वितीयः खण्डः ॥

७३. सप्तर्षयः । बृहतीसतोबृहतीद्विपदविराजः । पवमानः सोमः ॥

२०६. अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥१॥

२०७. तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥

२०८. नृभिर्येमाणो हर्यतो विचक्षणो राजा देवस्समुद्रियः ॥३॥

धा. १५. उ. न. स्व. ५. वु. ॥९॥

---

७२. ता । हुवे । ययोः । इदम् । पप्ने । विश्वम् । पुरा । कृतम् । इन्द्राग्नी ।
इन्द्र । अग्नीइति । न । मर्धतः ॥ उग्रा । विघनिना । वि । घनिना । मृधः ।
इन्द्राग्नी । इन्द्र । अग्नीइति । हवामहे । ता । नः । मृडातः । ईदृशे ॥ हथः ।
वृत्राणि । आर्या । हथः । दासानि । सत्पती । सत् । पतीइति । हथः ।
विश्वाः । अप । द्विषः ॥

७३. अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् । समुद्रस्य ।

---

१४. पौरुमद्रम् ॥ गोतमः । बृहती । पवमानः सोमः ।

अभिसोमासआयवः । ओहोवा । एहिया । हाउ ॥ पवन्तेमाऽऽ-
दियम्मदम् । समूद्राऽ१स्याऽऽ । धाइविष्टपाऽ३इ । मानीषाऽऽ३४इणाः ॥
मत्सा । रासौवाओऽऽ३४वा ॥ हाऽ३हाइ । मदाऽ५च्युताः ॥ श्रीः ॥

३ १२ १२र ३१२ ३ १२ ३ १२ ३ १२ ३
सम्। उद्रस्य। अधि। विष्टपे। मनीषिणः। मत्सरासः। मदच्युतः। मद।
१२र १२र ३ २ ३ २ १२र ३१२ १२र ३२
च्युतः॥ तरत्। समुद्रम्। सम्। उद्रम्। पवमानः। ऊर्मिणा। राजा। देवः।
३२ ३२ १२र ३१२ ३ १२र १२र १२र
ऋतम्। बृहत्। अष। मित्रस्य। मि। त्रस्य। वरुणस्य। धर्मणा। प्र।
३ २ ३२ ३२ १२र ३ २ ३ २ ३ २ ३
हिन्वानः। ऋतम्। बृहत्॥ नृभिः। येमानः। हर्यतः। विचक्षणः। वि।
२ १२र ३२ ३ क२ ३ क२
चक्षणः। राजा। देवः। समुद्रयः। सम्। उद्रयः॥

---

२ १र र २ १२ र १ २ र १र — १२
मत्सरासोमदच्युतः। औहोवा। एहिया। हाउ॥ मत्सरासोऽ२मदच्युतः।
१ २ — १ २ १२ ३ ५ १र ३
तरात्साऽ१मूऽ२। द्राम्पवमाऽ३। नाऊर्मीऽ२३४इणा॥ राजा। दाइवौवा-
३ ५ २ २ ४ १र र२र१२१२१
ओऽ२३४वा॥ हाऽ३हाइ। ऋताऽ५म्बृहात्॥ श्रीः॥ राजादेवऋतंबृहत्।
२र१ २र र र१र — १२ १ २
औहोवा। एहिया। हाउ॥ राजादेवाऽ२ऋतंबृहत्। अर्षामाऽ१-
— १ २ १२३ ५ १ ३ ३
इत्राऽ२। स्यावरुणाऽ३। स्याधर्माऽ२३४णा॥ प्रहाइ। न्वानौवाओ-
५ २ २ ४ ४
ऽ२३४वा॥ हाऽ३हाइ। ऋताऽ५म्बृहात्। होऽ५इ॥डा॥

दी. २०, उत्. ८. मा. ३१. ब. ॥५४॥

१५. उभयतस्तोभं गौतमम्॥ गोतमः। बृहती। पवमानः सोमः।

२र र र र र १ २र १ अ
हावभिसोमासआयवोहाउ॥ पावन्तेम। दियाम्मदाऽ२३४म्।
३र२ १ र २१र र २ ३र२ १
हाहोइ। समुद्रस्याधिविष्टपे। मानीषिणाऽ३४ः। हाहोइ॥ मात्सरा-
२ ३र२ २१ ५ ४ ५ २र
साऽ३४ः। हाहोऽ३॥ मदोऽ२३४वा। च्यूऽ५तोऽ६"हाइ॥ श्रीः॥ हाउ-
र र र १ २र १ अ ३र२
मत्सरासोमदच्युतोहाउ॥ मात्सरासः। मदाच्युताऽ२३४ः। हाहोइ।
१ २ १ २र १ र २ ३र२ १ र २
तरत्समुद्रम्पवमा। नाऊर्मिणाऽ३४। हाहोइ॥ राजादाइवाऽ३४ः।
३र२ २ १ ५ ४ ५ २र र र र
हाहोऽ३इ॥ ऋतोऽ२३४वा। बृऽ५होऽ६"हाइ॥ श्रीः॥ हाउराजादेव-
१ र२र १ अ ३र२ १र२ १ २ १
ऋतंबृहद्धाउ॥ राजादेवः। ऋतांबृहाऽ२३४त्। हाहोइ। अर्षामित्रस्यव
२ १ ३र२ १ २ ३र२
रुण। स्याधर्मणाऽ३४। हाहोइ॥ प्राहिन्वानाऽ३४ः। हाहोऽ३इ॥
२ १ ५ ४ ५
ऋतोऽ२३४वा। बृऽ५होऽ६"हाह॥

दी. ३३. उत्. ७. मा. २९. ठो. ॥५५॥

७४. पराशरः शाक्त्यः। त्रिष्टुप्। पवमानः सोमः॥

२०९. तिस्रो वाच ईरयति प्र वह्निऋतस्य धीतिं ब्रह्मणो मनीषाम्।
गावो यन्ति गोपतिं पृच्छमानास्सोमं यन्ति मतयो वावशानाः ॥१॥

२१०. सोमं गावो धेनवो वावशानास्सोमं विप्रा मतिभिः पृच्छमानाः।
सोमस्सुत ऋच्यते पूयमानस्सोमे अर्कास्त्रिष्टुभस्सन्नवन्ते ॥२॥

२११. एवा नस्सोम परिषिच्यमान आ पवस्व पूयमानस्स्वस्ति।
इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिम् ॥३॥

धा. ३०. उ. १. स्व. ४. पी. ॥१०॥

तृतीयः खण्डः॥

---

७४. तिस्रः। वाचः। ईरयति। प्र। वह्निः। ऋतस्य। धीतिम्। ब्रह्मणः। मनीषाम्। गावः। यन्ति। गोपतिम्। गो। पतिम्। पृच्छमानाः। सोमम्। यन्ति। मतयः। वावशानाः॥ सोमम्। गावः। धेनवः। वावशानाः। सोमम्। विप्राः। वि। प्राः। मतिभिः। पृच्छमानाः। सोमः। सुतः। ऋच्यते। पूयमानः। सोमे। अर्काः। त्रिष्टुभः। त्रि। स्तुभः। सम्। नवन्ते॥ एव। नः। सोम। परिषिच्यमानः। परि। सिच्यमानः। आ। पवस्व। पूयमानः। स्वस्ति। सु। अस्ति। इन्द्रम्। आ। विश। बृहता। मदेन। वर्धय। वाचम्। जनय। पुरन्धिम्। पुरम्। धिम्॥

---

१६. आष्कारणिधनं काण्वम्॥ कण्वः। बृहती। पवमानः सोमः।

प्रहिन्वाऽ३नऋतंबृहात् ॥ प्राहिन्वानः। ऋताऽ२३म्बृहाउ।
वाऽ३२। नृभिर्यमा। णोहर्यतो। विचक्षाऽ२३४णाः॥ राऽ२३जा॥ देव-
स्सम्। उद्राऽ२३४५याऽ६५६ः॥ आऽ२३४५ष्।

दी. ४. उत्. ३. मा. ८. दै. ॥५६॥

१७. अङ्गिरसां संक्रोशः॥ अङ्गिरसः। त्रिष्टुप्। पवमानः सोमः।

होइ। हो। हाऽ३होइ। तिस्रोवाचाः। ईऽ३रय। तिप्रवह्नोः॥

७५. पुरुहन्मा आङ्गिरसः। बृहतीसतोबृहत्यौ (प्रगाथः) । इन्द्रः।

२१२. यद्याव इन्द्र ते शतꣳशतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रꣳसूर्या अनु न जातमष्ट रोदसी ॥१॥

२१३. आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥२॥

धा. १९. उ. न. स्व. ४. ली ॥११॥

७६. मेध्यातिथिः काण्वः। बृहती। इन्द्रः।

२१४. वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥१॥

---

७५. यत्। द्यावः। इन्द्र। ते। शतम्। शतम्। भूमीः। उत। स्युः।
न। त्वा। वज्रिन्। सहस्रम्। सूर्याः। अनु। न। जातम्। अष्ट। रोदसी-
इति। आ। पप्राथ। महिना। वृष्ण्या। वृषन्। विश्वा। शविष्ठ। शवसा।
अस्मान्। अव। मघवन्। गोमति। व्रजे। वज्रिन्। चित्राभिः। ऊतिभिः॥

७६. वयम्। घ। त्वा। सुतावन्तः। आपः। न। वृक्तबर्हिषः। वृक्त।

ऋतस्यधाइ। तीऽ३म्ब्रह्म। णोमनीषाम्॥ गावोयन्ताइ। गोऽ३पतिम्।
पृच्छमानाः॥ सोमंयन्ताइ। मतयः। वाऽ३४३। वाऽ३शाऽ५"ना-
६५६ः॥ श्रीः॥ सोमङ्गावो। धेऽ३नवः। वावशानाः॥ सोमंविप्राः।
मतिभिः। पृच्छमानाः॥ सोमस्सुताः। ऋच्यते। पूयमानाः॥ सोमो-
अर्काः। त्रिष्टुभः। साऽ३४३म्। नाऽ३वाऽ५"न्ताऽ६५६इ॥ श्रीः॥
एवानस्सो। माऽ३परि। षिच्यमानाः॥ आपवस्वा। पूऽ३यमा।
नस्सुवस्ती॥ इन्द्रमावाइ। शाऽ३वृह। तामदेना॥ होइ। हो। हाऽ३-
होइ। वधंयावा। चाऽ३ऋन। याऽ३४३। पूऽ३राऽ५"न्धाऽ६५६इम्॥

दी. १८. उत्. १६. मा. ३०. टौ. ॥५७॥

२१५. स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वꣳसगः ॥२॥

२१६. कण्वेभिर्धृष्णवा धृषद्वाजन्दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन्विचर्षणे मꣳहू गोमन्तमीमहे ॥३॥

धा. २७. उ. २. स्व. २. छा. ॥१२॥

७७. वसिष्ठो मैत्रावरुणिः । बृहतीसतोबृहत्यौ (प्रगाथः) । इन्द्रः ।

२१७. तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।

बर्हिषः । पवित्रस्य । प्रस्रवणेषु । प्र । स्रवणेषु । वृत्रहन् । वृत्र । हन् । परि ।
स्तोतारः । आसते । स्वरन्ति । त्वा । सुते । नरः । वसो । निरेके । उक्थिनः ।
कदा । सुतम् । तृषाणः । ओकः । आ । गमः । इन्द्र । स्वब्दी । इव । वꣳसगः ॥
कण्वेभिः । धृष्णो । आ । धृषत् । वाजम् । दर्षि । सहस्रिणम् । पिशङ्गरूपम् ।
पिशङ्ग । रूपम् । मघवन् । विचर्षणे । वि । चर्षणे । मꣳहू । गोमन्तम् । ईमहे ॥

---

१८. महावैष्टम्भम् ॥ विष्टम्भः । बृहती । इन्द्रः ।

वयंघत्वोहाइ । सुतावन्तोवा ॥ आपोनवृ । क्तबार्हाऽइषाऽऽ३ः ।
होवाऽ३हाइ । पवित्रस्यप्रस्रवणे । षुवार्त्राऽइहाऽऽ३न् । होवाऽ३हाइ ॥
पराइस्तोऽइताऽऽ३ । होवाऽ३हा ॥ रआ । साऽऽ३ताऽऽ३४औहोवा ॥
श्रीः ॥ स्वरन्तित्वोहाइ । सुतेनरोवा ॥ वासोनिरे । कऊक्थाऽइनाऽऽ३ः ।
होवाऽ३हाइ । कदासुतन्तृषाणओ । कआगाऽइमाऽऽ३ः । होवाऽ३हाइ ॥
इन्द्रास्वाऽइब्दीऽऽ३ । होवाऽ३हा ॥ वव । साऽऽ३गाऽऽ३४औहोवा ॥
श्रीः ॥ कण्वेभिर्घोहा । ष्णवाधृषोवा ॥ वाजंदर्षि । सहास्राऽइणा-
ऽऽ३म् । होवाऽ३हाइ । पिशङ्गरूपंमघवन् । विचार्षाऽइणाऽऽ३इ । होवा-
ऽ३हाइ ॥ मꣳहूगोऽइमाऽऽ३ । होवाऽ३हा ॥ तमी । माऽऽ३हाऽऽ३४औहोवा ।
दीऽऽ३४शाः ॥

दी. २०. उत्. १६. मा. २७. पे. ॥५८॥

२ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ १ २
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥१॥

१ २ ३ १ २ ३ १ २ ३ १ २र ३ १ २
२१८. न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तꣳरयिर्नशत् ।
३ २ ३ १ २ ३ २ ३ १ २ ३ १ २र ३ २
सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२॥

धा. १७. उ. न. स्व. ३. यि. ॥१३॥

चतुर्थः खण्डः ॥

७८. त्रित आप्त्यः । गायत्री । पवमानः सोमः ॥

३ २उ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
२१९. तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥१॥

---

३ १ २
७७. तरणिः । इत् । सिषासति । वाजम् । पुरन्ध्या । पुरम् । ध्या ।
३ २
युजा । आ । वः । इन्द्रम् । पुरुहूतम् । पुरु । हूतम् । नमे । गिरा । नेमिम् ।
१ २र ३ १ २र ३ १ २र २ ३ २ ३ १ २
तष्टा । इव । सुद्रुवम् । सु । द्रुवम् ॥ न । दुष्टुतिः । दुः । स्तुतिः । द्रविणोदेषु ।
३ १ २र ३ २ ३ ३ १ २ ३ १ २र
द्रविणः । देषु । शस्यते । न । स्रेधन्तम् । रयिः । नशत् । सुशक्तिः । सु । शक्तिः ।
३ १ २र १ २र ३ २ १ २र ३ २
इत् । मघवन् । तुभ्यम् । मावते । देष्णम् । यत् । पार्ये । दिवि ॥

३ २ १ २र ३ १ २र ३ १ २ १ २र
७८. तिस्रः । वाचः । उत् । ईरते । गावः । मिमन्ति । धेनवः । हरिः ।

---

१९. रौरवम् ॥ रुरुः । बृहती । इन्द्रः ।

२ १ ५ १ र र र
तरणिरित्साऽ३इषासाऽ२३४ती ॥ वाजंपुरन्ध्यायुजावइन्द्रंपुरुहूत-
३ २ १ २ २ १र र २ १र र
नमाऽ२इगिरा । ओहाऽ३उवा ॥ नेमिन्तष्टेवसूऽ२३हाइ । नेमिन्तष्टेवसाऽ२३-
२ १ २ २ १ ४ ५ २र र
उहाइ । ओहाऽ३उवा ॥ द्रुवाꣳ औऽ२३होवा ॥ श्रीः ॥ नेमिन्तष्टेवा-
१ ५ १ र २र र ३ २
ऽ३सुद्रूऽ२३४वाम् ॥ नाइमिन्तष्टेवसुद्रुवन्नदुष्टुतिर्द्रविणोदेषुशाऽ२स्यताइ ।
१ २ २ १ र २ १ २ २ १
ओहाऽ३उवा ॥ नस्रेधन्तꣳरयाऽ२३इहाइ । ओहाऽ३उवा ॥ नशात् । औ-
४ ५ १ ५ २ र १ र
ऽ२३होवा ॥ श्रीः ॥ नस्रेधन्तꣳराऽ३यिर्नाऽ२३४शात् ॥ नास्रेधन्तꣳरयिर्न-
३ २ १ २ २ १र र
शत्सुशक्तिरिन्मघवन्तुभ्यम्माऽ२वताइ । ओहाऽ३उवा ॥ देष्णंयत्पारियाऽ२३-
२ १ २ २ १ २ ४ ५ ४
इहाइ । ओहाऽ३उवा ॥ दिवा । ओऽ३होवा । होऽ५इ ॥ङा॥

दी. १७. उत्. ३. मा. २४. जी. ॥५९॥॥

२२०. अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः । मर्जयन्तीर्दिवश्शिशुम् ॥२॥

२२१. रायस्समुद्राꣳश्चतुरोऽस्मभ्यꣳसोम विश्वतः । आ पवस्व सहस्रिणः॥३॥

धा. १८. उ १. स्व. २ टा. ॥१४॥

एति । कनिक्रदत् ॥ अभि । ब्रह्मीः । अनूषत । यह्वीः । ऋतस्य । मातरः । मर्जयन्तीः । दिवः । शिशुम् ॥ रायः । समुद्रान् । सम् । उद्रान् । चतुरः । अस्मभ्यम् । सोम । विश्वतः । आ । पवस्व । सहस्रिणः ॥

---

२०. पाष्ठौहम् ॥ पष्ठवाट् । गायत्री । पवमानः सोमः ।

तिस्रोवाचाऽउदीरताइ ॥ गावोमिमन्तिधेनवः । हरिराऽइ-
इती ॥ कनौऽउ । हुवाइ । होऽइवाऽइ ॥ क्राऽउदाऽउइऔहोवा ॥श्रीः॥
अभिब्रह्माऽउइरनूषता ॥ यह्वीर्ऋतस्यमातरः । मर्जयाऽउइन्तीः ॥ दिवौ-
ऽउ । हुवाइ । होऽइवाऽइ ॥ शाऽउइशाऽउइऔहोवा ॥ श्रीः ॥
रायस्समूऽउद्राꣳश्चतुराः ॥ अस्मभ्यꣳसोमविश्वताः । आपवाऽउइस्वा ॥
सहौऽउ । हुवाइ । होऽइवाइ ॥ स्राऽउइणाऽउइऔहोवा ॥ हाओवा ।
ओवाऽउइ ॥ दी. २०. उत्. ७. मा. १८. फै. ॥६०॥

द्वितीयस्यार्धः प्रपाठकः ॥

तृतीयो विंशः ॥

१. वाचस्साम ॥ वाक् । ककुप् । पवमानः सोमः ।

*आसोतापा । हो । रिषिश्चताऽउए ॥ आश्वनस्तो । मामप्तू-
राऽउम् । राजस्तुरम् ॥ वानप्राक्षाऽउइम् ॥ ऊऽउइदाऽउइ । प्रूऽउइ४५-
तोऽउ"हाइ ॥ दी. ४. उत्. न. मा. ५. लु. ॥६१॥

---

* अस्यर्क् पूर्वार्चिकेऽशीत्युत्तरपञ्चशततमा गता । उपरिष्टात्सूक्तात्मनाप्यागच्छति । यद्यपि प्रयोगानुक्रमेणोत्तरार्चिके ऋचः पठिताः, अत्र चेयमृक् पठितव्या तथाप्यत्रैकस्यामेवर्चि साम्नो गेयत्वेन तस्या ऋचश्च पूर्वमेवाधीतत्वात्कृत्स्नं सूक्तं नात्र पठितम् । यत्र तु तृचे गीयते तत्रैवर्चः पठ्यन्ते ।

७९. ययातिर्नाहुषः। अनुष्टुप्। पवमानः सोमः।

२२२. सुतासो मधुमत्तमास्सोमा इन्द्राय मन्दिनः।
पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥१॥

२२३. इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्।
वाचस्पतिर्मखस्यते विश्वस्येशान ओजसः ॥२॥

२२४. सहस्रधारः पवते समुद्रो वाचमीङ्खयः।
सोमस्पती रयीणाꣳसखेन्द्रस्य दिवेदिवे ॥३॥

धा. २९. उ. न. स्व. २. ला. ॥१५॥

---

७९. सुतासः। मधुमत्तमाः। सोमाः। इन्द्राय। मन्दिनः। पवित्रवन्तः। अक्षरन्। देवान्। गच्छन्तु। वः। मदाः॥ इन्दुः। इन्द्राय। पवते। इति। देवासः। अब्रुवन्। वाचः। पतिः। मखस्यते। विश्वस्य। ईशानः। ओजसः॥ सहस्रधारः। सहस्र। धारः। पवते। समुद्रः। सम्। उद्रः। वाचमीङ्खयः। वाचम्। ईङ्खयः। सोमः। पतिः। रयीणाम्। सखा। स। खा। इन्द्रस्य। दिवेदिवे। दिवे। दिवे॥

---

२. शौक्तम्॥ शुक्तिः। उष्णिक्। पवमानः सोमः।

†सखा। यआओऽ२३४वा॥ निषाइ। दाताओऽ२३४वा। पुनानायप्रगाऽ२यताऽ२३४५॥ शाइशाओऽ२३४वा॥ नयज्ञैःपरिभृ-ऽ२३४५। षाताओऽ२३४वा॥ श्रियेऽ१॥

दी. ४. उत्. ३. मा. ७. दे. ॥६२॥

३. गौरीवितम्। गौरीवितिः। अनुष्टुप्। पवमानः सोमः।

सुता। सोमाऽ३। धुमत्तमाः॥ सोमाइन्द्रायमन्दिनाऽ२३ः। पावित्रवाऽ३१२३। तोआऽ५क्षरान्॥ दाइवान्गच्छाऽ३१२३॥ तुवोवा। माऽ५दोऽ६"हाइ॥ श्रीः॥ इन्दुः। इन्द्राऽ३। यपवताइ॥ इतिदेवासो-

---

† अस्यर्क् पूर्वार्चिकेऽष्टषष्टयुत्तरपञ्चशततमा गता।

८०. पवित्र आङ्गिरसः । जगती । पवमानः सोमः ॥

२२५. पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्सन्तदाशत ॥१॥

२२६. तपोष्पवित्रं विततं दिवस्पदेऽचन्तो अस्य तन्तवो व्यश्नुवन् ।
अवन्त्यस्य पवितारमाशवो दिवꣳ पृष्ठमधि रोहन्ति नेशत ॥२॥

---

८०. पवित्रम् । ते । विततम् । वि । ततम् । ब्रह्मणः । पते । प्रभुः । प्र । भुः । गात्राणि । परि । एषि । विश्वतः । अतप्ततनूः । अतप्त । तनूः । न । तत् । आमः । अश्नुते । शृतासः । इत् । वहन्तः । सम् । तत् । आशत ॥ तपोः । पवित्रम् । विततम् । वि । ततम् । दिवः । पदे । अचन्तः । अस्य । तन्तवः ।

अब्रुवाऽ२३न् । वाचस्पताऽ३१२३इः । मखाऽ५स्यताइ ॥ वाइश्वस्येशा-ऽ३१२३ ॥ नओवा । जाऽ५सोऽ६"हाइ ॥ श्रीः ॥ सह । स्रघाऽ३ । र꣡पवताइ ॥ समुद्रोवाचमीङ्खयाऽ२३ः । सोमस्पताऽ३१२३इः । रया-ऽ५इणाम् ॥ साखेन्द्रस्याऽ३१२३ ॥ दिवोवा । दाऽ५इवोऽ६"हाइ ॥

दी. १५. उत्. न. मा. २५. वु. ॥६३॥

४. त्र्यन्तं त्वाष्ट्रीसाम । त्वाष्ट्र्यः । अनुष्टुप् । पवमानः सोमः ।

सुतासोमा ॥ धुमाऽ३त्तमाः । सोमाइन्द्राऽ३यमाऽ३ । एऽ३ । दिनआ ॥ पवाइत्रवाऽ३"न्तोऽ३ । एऽ३ । क्षरन्ना ॥ दाइवान्गच्छा-ऽ३"न्तुवाऽ३ः ॥ एऽ३ । मदाआ ॥ श्रीः ॥ इन्दुरिन्द्रा ॥ यपाऽ३वताइ । इताइदेवाऽ३सोऽ३ । एऽ३ । ब्रुवन्ना ॥ वाचस्पताऽ३इ"मखाऽ३ । एऽ३ । स्यतआ ॥ विश्वास्येशाऽ३"नओऽ३ ॥ एऽ३ । जसआ ॥श्रीः॥ सहस्रघा ॥ र꣡पाऽ३वताइ । समूद्रोवाऽ३चमाऽ३इ । एऽ३ । खयआ ॥ सोमा-स्पताऽ३इ"रयाऽ३इ । एऽ३ । णाऽ३मा ॥ सखेन्द्रस्याऽ३"दिवाऽ३इ ॥ एऽ३ । दिवआ ॥

दी. ९. उत्. न. मा. २०. लौ. ॥६४॥

२२७. अरूरुचदुषस॒ःपृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षस॒ःपितरो गर्भमा दधुः ॥३॥
धा. ३८. उ. १. स्व. ५. टु. ॥१६॥

पञ्चमः खण्डः ॥

८१. सोभरिः काण्वः । ककुप्सतोबृहत्यौ । अग्निः ।

२२८. प्र म॑हिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥१॥

२२९. आ व॑सते मघवा वीरवद्यशस्समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत् ॥२॥
धा. १७. उ. न. स्व. २ या. ॥१७॥

वि । अस्थिरन् । अवन्ति । अस्य । पवितारम् । आशवः । दिवः । पृष्ठम् ।
अधि । रोहन्ति । तेजसा । अरूरुचत् । उषसः । पृश्निः । अग्रियः । उक्षा ।
मिमेति । भुवनेषु । वाजयुः । मायाविनः । ममिरे । अस्य । मायया । नृचक्षसः ।
नृ । चक्षसः । पितरः । गर्भम् । आ । दधुः ॥

८१. प्र । म॑हिष्ठाय । गायत । ऋताव्ने । बृहते । शुक्रशोचिषे । शुक्र ।
शोचिषे । उपस्तुतासः । उप । स्तुतासः । अग्नये ॥ आ । व॑सते । मघवा ।
वीरवत् । यशः । समिद्धः । सम् । इद्धः । द्युम्नी । आहुतः । आ । हुतः । कुवित् ।

---

५. प्रम॑हिष्ठीयम् ॥ इन्द्रः । ककुप् । अग्निः ।

प्रम॑हाऽइष्ठायगायता ॥ ऋताव्नेऽर । बृहतेशूक्राऽशोऽइ ।
चाऽरइषाइ ॥ उपाऔऽइहो ॥ स्तोतासोऽआऽइ । ग्नाऽइयोऽ६"-
हाइ ॥ श्रीः ॥ उपस्तूऽइतासोअग्नयाइ ॥ आव॑साताऽरइ । मघवाइरा-
ऽइवीत् । याऽरइशाः ॥ समाऔऽइहो ॥ धोद्युम्नोऽइयाऽइ ।
हूऽइतोऽ६"हाइ ॥ श्रीः ॥ समिद्धोऽइद्युम्नियाहुताः ॥ कुवाइन्नोऽर ।

८२. गोषूक्त्यश्वसूक्तिनौ काण्वायनौ । उष्णिक् । इन्द्रः ।

२३०. तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुमद्रिवो हरिश्रियम् ॥१॥

२३१. येन ज्योतीꣳष्यायवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥२॥

२३२. तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीरपो जया दिवेदिवे॥३ ॥
धा. २१. उ. न. स्व. १. ह. ॥१८॥

नः । अस्य । सुमतिः । सु । मतिः । भवोयसी । अच्छ । वाजेभिः । आगमत् । आ । गमत् ॥

८२. तम् । ते । मदम् । गृणीमसि । वृषणम् । पृक्षु । सासहिम् । उ । लोककृत्नुम् । लोक । कृत्नुम् । अद्रिवः । अ । द्रिवः । हरिश्रियम् । हरि । श्रियम् ॥ येन । ज्योतीꣳषि । आयवे । मनवे । च । विवेदिथ । मन्दानः । अस्य । बर्हिषः । वि । राजसि ॥ तत् । अद्य । अ । द्य । चित् । ते । उक्थिनः ।

अस्यसुमताइमाऽ३वीऽ३ । याऽ२३४साइ ॥ अच्छाओऽ३हो ॥ वाजाइभो-
ऽ३राऽ३ । गाऽ३४५मोऽ६"हाइ ॥ दी. ९. उत्. ७. मा. २१. थ. ॥६५॥

६. हारिवर्णम् । हरिवर्णः । उष्णिक् । इन्द्रः ।

तन्तेमदाऽ२म्गृणीमसाइ ॥ वार्षणंपृ । क्षुसासाऽ३हीऽ३म् । होवा-
ऽ३हाइ ॥ उलोकाऽ३कृऽ३ । होवाऽ३हा ॥ त्नुम । द्राऽ२इवाऽ२३४-
औहोवा ॥ हरिश्रियाऽ२३४५म् ॥ श्रीः ॥ येनज्योताऽ२इꣳषिआयवाइ ॥
मानवेच । विवाइदोऽ३थाऽ३ । होवाऽ३हाइ ॥ मन्दानोऽ३आऽ३ ।
होवाऽ३हा ॥ स्यव । हाऽ२इषाऽ२३४औहोवा ॥ विराजसाऽ२३४५इ ॥
श्रीः ॥ तदद्याचाऽ२इत्तउक्थिनाः । आनुष्टुव । तिपूर्वाऽ३थाऽ३ । होवाऽ३-

८३. तिरश्चीराङ्गिरसः। अनुष्टुप्। इन्द्रः।

२३३. श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥१॥

२३४. यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत्।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥२॥

२३५. तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः।
पुरूण्यस्य पौंस्या सिषावन्तो वनामहे ॥३॥

धा. १५. उ. २. स्व. २. फा. ॥१९॥

षष्ठः खण्डः।

इति चतुर्थोऽध्यायः।

(द्वितीयप्रपाठकस्य द्वितीयोऽर्धः।)

(द्वितीयः प्रपाठकः)

अनु। स्तुवन्ति। पूर्वथा। वृषपत्नीः। वृष। पत्नीः। अपः। जय। दिवेदिवे। दिवे। दिवे॥

८३. श्रुधि। हवम्। तिरश्च्याः। तिरः। च्याः। इन्द्र। यः। त्वा। सपर्यति। सुवीर्यस्य। सु। वीर्यस्य। गोमतः। रायः। पूर्धि। महान्। असि। यः। ते। इन्द्र। नवीयसीम्। गिरम्। मन्द्राम्। अजीजनत्। चिकित्विन्मनसम्।

ऽहाइ ॥ वृषापाऽ३त्नीऽ३ः। होवाऽ३हाइ। अपः। जाऽ२याऽ२३४औहोवा ॥
दिवेदिवाऽ२३४५इ ॥ दी. १५. उत्. ९. मा. २४. भी. ॥६६॥

७. तैरश्च्यम् ॥ तिरश्चि। अनुष्टुप्। इन्द्रः।

श्रुधीहाऽ३वन्तिरश्चियाः। इन्द्रायस्त्वा। सपर्यताऽ२३४इ। सुवी।
रिया। स्याऽ२३४गो। माताऽ२ः ॥ रायास्पूर्धीऽ३। हाऽ३हाइ ॥
महऽ५असी ॥ श्रीः ॥ यस्तआऽ३इन्द्रनवीयसाइम् ॥ गिरामन्द्राम्। अजी-

अथ पञ्चमोऽध्यायः ।

(तृतीयप्रपाठकस्य प्रथमोऽर्धः)

८४. अकृष्टा माषाः । जगती । पवमानः सोमः ।

२३६. प्र त आश्विनीरपवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥१॥

२३७. उभयतरपवमानस्य रश्मयो ध्रुवस्य सतरपरियन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिस्सत्ता नि योनौ कलशेषु सीदति ॥२॥

२३८. विश्वा धामानि विश्वचक्ष ऋभ्वसरप्रभोष्टे सतरपरियन्ति केतवः ।
व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥३॥

धा. ३५. उ. न. स्व. ४. वी. ॥१॥

चिकित्वित् । मनसम् । धियम् । प्रन्नाम् । ऋतस्य । पिप्युषीम् ॥ तम् । उ । स्तवाम । यम् । गिरः । इन्द्रम् । उक्थानि । वावृधुः । पुरूणि । अस्य । पौंस्या । सिषासन्तः । वनामहे ॥

८४. प्र । ते । आश्विनीः । पवमान । धेनवः । दिव्याः । असृग्रन् । पयसा । धरीमणि । प्र । अन्तरिक्षात् । स्थाविरीः । स्था । विरीः । ते । असृक्षत । ये । त्वा । मृजन्ति । ऋषिषाण । ऋषि । सान । वेधसः ॥ उभयतः । पवमानस्य । रश्मयः । ध्रुवस्य । सतः । परि । यन्ति । केतवः । यदि । पवित्रे । अधि । मृज्यते । हरिः । सत्ता । नि । योनौ । कलशेषु । सीदति ॥ विश्वा ।

जनाऽ२३४त् । चिकि । त्विन्मा । नाऽ२३४साम् । धायाऽ२म् ॥ प्रन्नामार्त्ताऽ३ । हाऽ३हा ॥ स्यपाऽ५इष्युषीम् ॥ श्रीः ॥ तमुष्टाऽ३वामयंगिराः ॥ इन्द्रा-मुक्था । निवावृधूऽ२३४ः । पुरू । णिया । स्याऽ२३४पौ । सायाऽ२ ॥ सिषासान्ताऽ३ः । हाऽ३हाइ ॥ वनाऽ५महाइ । होऽ५इ ॥डा॥

दी. ७. उत्. ३. मा. २१. ज. ॥६७॥

८५. अमहीयुराङ्गिरसः । गायत्री । पवमानः सोमः ॥

२३९. पवमानो अजीजनदिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥१॥
२४०. पवमान रसस्तव मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति ॥२॥
२४१. पवमानस्य ते रसो दक्षो वि राजति द्युमान् । ज्योतिर्विश्वꣳस्वर्दृशे ॥३॥

धा. २०. उ. १ स्व. २. पा. ॥२॥

८६. मेध्यातिथिः काण्वः । गायत्री । पवमानः सोमः ॥

२४२. प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
घ्नन्तः कृष्णामप त्वचम् ॥१॥
२४३. सुवितस्य वनामहेऽति सेतुं दुराय्यम् । साह्याम दस्युमव्रतम् ॥२॥
२४४. शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥३॥
२४५. आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्ववत्सोम वीरवत् ॥४॥
२४६. पवस्व विश्वचर्षण आ मही रोदसी पृण । उषास्सूर्यो न रश्मिभिः ॥५॥

धामानि । विश्वचक्षः । विश्व । चक्षः । ऋभ्वसः । प्रभोः । प्र । भोः । ते ।
सतः । परि । यन्ति । केतवः । व्यानशी । वि । आनशी । पवसे । सोम ।
धर्मणा । पतिः । विश्वस्य । भुवनस्य । राजसि ॥

८५. पवमानः । अजीजनत् । दिवः । चित्रम् । न । तन्यतुम् । ज्योतिः ।
वैश्वानरम् । वैश्व । नरम् । बृहत् ॥ पवमान । रसः । तव । मदः । राजन् ।
अदुच्छुनः । अ । दुच्छुनः । वि । वारम् । अव्यम् । अर्षति ॥ पवमानस्य ।
ते । रसः । दक्षः । वि । राजति । द्युमान् । ज्योतिः । विश्वम् । स्वः । दृशे ॥

८६. प्र । यत् । गावः । न । भूर्णयः । त्वेषाः । अयासः । अक्रमुः ।
घ्नन्तः । कृष्णाम् । अप । त्वचम् । सुवितस्य । वनामहे । अति । सेतुम् ।
दुराय्यम् । दुः । आय्यम् । साह्याम । दस्युम् । अव्रतम् । अ । व्रतम् । शृण्वे ।
वृष्टेः । इव । स्वनः । पवमानस्य । शुष्मिणः । चरन्ति । विद्युतः । वि । द्युतः ।
दिवि ॥ आ । पवस्व । महीम् । इषम् । गोमत् । इन्दो । हिरण्यवत् । अश्ववत् ।

२४७. परिणश्शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ॥६॥
धा. ३५. उ. ४. स्व. ४. भी. ॥३॥

प्रथमः खण्डः ॥

८७. बृहन्मतिराङ्गिरसः । गाजत्री । पवमानः सोमः ॥

२४८. आशुरर्ष बृहन्मते परि प्रियेण धाम्ना । यत्र देवा इति ब्रुवन् ॥१॥
२४९. परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥२॥
२५०. अयश्स यो दिवस्परि रघुयामा पवित्र आ । सिन्धोरूर्मा व्यक्षरत् ॥३॥
२५१. सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥४॥
२५२. आ विवासन्परावतो अथो अर्वावतस्सुतः । इन्द्राय सिच्यते मधु ॥५॥
२५३. समीचीना अनूषत हरिश्हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥६॥
धा. ३२. उ. ३. स्व. ४. जी. ॥३॥

८८. भृगुर्वारुणिः, जमदग्निर्भार्गवो वा । गायत्री । पवमानः सोमः ।

२५४. हिन्वन्तिसूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥१॥

सोम । वीरवत् ॥ पवस्व । विश्वचर्षणे । विश्व । चर्षणे । आ । महीइति । रोदसीइति । पृण । उषाः । सूर्यः । न । रश्मिभिः ॥ परि । नः । शर्मयन्त्या । धारया । सोम । विश्वतः । सर । रसा । इव । विष्टपम् ॥

८७. आशुः । अर्ष । बृहन्मते । बृहत् + मते । परि । प्रियेण । धाम्ना । यत्र । देवाः । इति । ब्रुवन् ॥ परिष्कृण्वन् । परि । कृण्वन् । अनिष्कृतम् । अ । निष्कृतम् । जनाय । यातयन् । इषः । वृष्टिम् । दिवः । परि । स्रव ॥ अयम् । सः । यः । दिवः । परि । रघुयामा । रघु । यामा । पवित्रे । आ । सिन्धोः । ऊर्मा । व्यक्षरत् । वि । अक्षरत् ॥ सुतः । एति । पवित्रे । आ । त्विषिम् । दधानः । ओजसा । विचक्षाणः । वि । चक्षाणः । विरोचयन् । वि । रोचयन् ॥ आविवासन् । आ । विवासन् । परावतः । अथ । उ । अर्वावतः । सुतः । इन्द्राय । सिच्यते । मधु ॥ समीचीनाः । सम् । ईचीनाः । अनूषत । हरिम् । हिन्वन्ति । अद्रिभिः । अ । द्रिभिः । इन्दुम् । इन्द्राय । पीतये ॥

२५५. पवमान रुचारुचा देव देवेभ्यस्सुतः । विश्वा वसून्या विश ॥२॥

२५६. आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः । इषे पवस्व संयतम् ॥३॥

धा. ११. उ. न. स्व. १. ह. ॥५॥

द्वितीयः खण्डः ॥

८९. सुतम्भर आत्रेयः । जगती । अग्निः ।

२५७. जनस्य गोपा अजनिष्ट जागृविरग्निस्सुदक्षस्सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यश्शुचिः ॥१॥

२५८. त्वामग्ने अङ्गिरसो गुहाहितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानस्सहो महत्त्वामाहुस्सहसस्पुत्रमङ्गिरः ॥२॥

२५९. यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैस्सरथꣳस बर्हिषि सीदन्निहोता यजथाय सुक्रतुः ॥३॥

धा. ३०. उ. न. स्व. ६७. वे. ॥६॥

---

८८. हिन्वन्ति । सूरम् । उस्रयः । स्वसारः । जामयः । पतिम् । महाम् । इन्दुम् । महीयुवः ॥ पवमान । रुचारुचा । रुचा । रुचा । देव । देवेभ्यः । सुतः । विश्वा । वसूनि । आ । विश ॥ आ । पवमान । सुष्टुतिम् । सु । स्तुतिम् । वृष्टिम् । देवेभ्यः । दुवः । इषे । पवस्व । संयतम् । सम् । यतम् ॥

८९. जनस्य । गोपाः । गो । पाः । अजनिष्ट । जागृविः । अग्निः । सुदक्षः । सु । दक्षः । सुविताय । नव्यसे । घृतप्रतीकः । घृत । प्रतीकः । बृहता । दिविस्पृशा । दिवि । स्पृशा । द्युमत् । वि । भाति । भरतेभ्यः । शुचिः ॥ त्वाम् । अग्ने । अङ्गिरसः । गुहा । हितम् । अनु । अविन्दन् । शिश्रियाणम् । वनेवने । वने । वने । सः । जायसे । मथ्यमानः । सहः । महत् । त्वाम् । आहुः । सहसः । पुत्रम् । पुत् । त्रम् । अङ्गिरः ॥ यज्ञस्य । केतुम् । प्रथमम् । पुरोहितम् । पुरः । हितम् । अग्निम् । नरः । त्रिषधस्थे । त्रि । सधस्थे । सम् । इन्धते । इन्द्रेण । देवैः । सरथम् । स । रथम् । सः । बर्हिषि । सीदत् । नि । होता । यजथाय । सुक्रतुः । सु । क्रतुः ॥

९०. गृत्समदः शौनकः। गायत्री। मित्रावरुणौ।

२६०. अयं वां मित्रावरुणा सुतस्सोम ऋतावृधा। ममेदिह श्रुतꣳहवम् ॥१॥
२६१. राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आशाते ॥२॥
२६२. ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ॥३॥

धा. १५. उ. १. स्व. ३. पि. ॥७॥

९१. गोतमो राहूगणः। गायत्री। इन्द्रः।

२६३. इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव ॥१॥
२६४. इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति ॥२॥
२६५. अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे ॥३॥

धा. १३. उ. २. स्व. ४. ठी. ॥८॥

९२. वसिष्ठो मैत्रावरुणिः। गायत्री। इन्द्राग्नी।

२६६. इयं वामस्य मन्मन इन्द्राग्नी पूज्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि ॥१॥

---

४०६. रयिन्नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥१०॥

धा. २२. उ. १. स्व. २. चा. ॥४॥

१३३. अवत्सारः काश्यपः । गायत्री । पवमानः सोमः ॥

४०७. तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥१॥

४०८. उस्रा वेद वसूनां मर्तस्य देव्यवसः । तरत्स मन्दी धावति ॥२॥

४०९. ध्वस्रयोरꣳपुरुषन्त्योरा सहस्राणि दब्दहे । तरत्स मन्दी धावति ॥३॥

४१०. आ ययोस्त्रिꣳशतन्तना सहस्राणि च दब्दहे । तरत्स मन्दी धावति ॥४॥

धा. ६. उ. न. स्व. २. हा. ॥५॥

सूर्ये । नः । आ । भज । तव । क्रत्वा । तव । ऊतिभिः । अथ । नः । वस्यसः । कृधि ॥ तव । क्रत्वा । तव । ऊतिभिः । ज्योक् । पश्येम । सूर्यम् । अथ । नः । वस्यसः । कृधि ॥ अभि । अर्ष । स्वायुध । सु । आयुध । सोम । द्विबर्हसम् । द्वि । बर्हसम् । रयिम् । अथ । नः । वस्यसः । कृधि ॥ अभि । अर्ष । अनपच्युतः । अन् । अपच्युतः । वाजिन् । समत्सु । स । मत्सु । सासहिः । अथ । नः । वस्यसः । कृधि ॥ त्वाम् । यज्ञैः । अवीवृधन् । पवमान । विधर्मणि । वि । धर्मणि । अथ । नः । वस्यसः । कृधि ॥ रयिम् । नः । चित्रम् । अश्विनम् । इन्दो । विश्वायुम् । विश्व । आयुम् । आ । भर । अथ । नः । वस्यसः । कृधि ॥

१३३. तरत् । सः । मन्दी । धावति । धारा । सुतस्य । अन्धसः । तरत् । सः । मन्दी । धावति ॥ उस्रा । उ । स्रा । वेद । वसूनाम् । मर्तस्य ।

१३४. जमदग्निर्भार्गवः । गायत्री । पवमानः सोमः ।

४११. एते सोमा असृक्षत गृणानाश्शवसे महे । मदिन्तमस्य धारया ॥१॥

४१२. अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
सनद्वाजꣳपरि स्रव ॥२॥

४१३. उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना ॥३॥
धा. १५. उ. न. स्व. ३. वि. ॥६॥

द्वितीयः खण्डः ।

१३५. कुत्स आङ्गिरसः । जगती । अग्निः ॥

४१४. इमꣳस्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नꣳप्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयन्तव ॥१॥

४१५. भरामेध्मं कृणवामाहवीꣳषि ते चितयन्तꣳपर्वणापर्वणा वयम् ।
जीवातवे प्रतराꣳसाधया धियोऽग्ने सख्ये मा रिषामा वयन्तव ॥२॥

देवी । अवसः । तरत् । सः । मन्दी । धावति ॥ ध्वस्रयोः । पुरुषन्त्योः । पुरु ।
सन्त्योः । आ । सहस्राणि । दद्महे । तरत् । सः । मन्दी । धावति ॥ आ ।
ययोः । त्रिꣳशतम् । तना । सहस्राणि । च । दद्महे । तरत् । सः । मन्दी ।
धावति ॥

१३४. एते । सोमाः । असृक्षत । गृणानाः । शवसे । महे । मदिन्तमस्य ।
धारया ॥ अभि । गव्यानि । वीतये । नृम्णा । पुनानः । अर्षसि । सनद्वाजः ।
सनत् । वाजः । परि । स्रव ॥ उत । नः । गोमतीः । इषः । विश्वाः । अर्ष ।
परिष्टुभः । परि । स्तुभः । गृणानः । जमदग्निना । जमत् । अग्निना ॥

१३५. इमम् । स्तोमम् । अर्हते । जातवेदसे । जात । वेदसे । रथम् ।
इव । सम् । महेम । मनीषया ॥ भद्रा । हि । नः । प्रमतिः । प्र । मतिः ।
अस्य । सꣳसदि । सम् । सदि । अग्ने । सख्ये । स । ख्ये । मा । रिषाम ।

४१६. शकेम त्वा समिधꣳसाधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान्ह्युऽ३श्मस्यग्ने सख्ये मा रिषामा वयन्तव ॥३॥
धा. ३७. उ. २. स्व. १०. छौ. ॥७॥

१३६. वसिष्ठो मैत्रावरुणिः । गायत्री । मित्रावरुणौ ॥

४१७. प्रति वाꣳसूर उदिते मित्रं गृणीषे वरुणम् । अर्यमणꣳरिशादसम् ॥१॥
४१८. राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥२॥
४१९. ते स्याम देव वरुण ते मित्र सूरिभिस्सह । इषꣳस्वश्च धीमहि ॥३॥
धा. ११. उ. न. स्व. २. हा. ॥८॥

१३७. त्रिशोकः काण्वः । गायत्री । इन्द्रः ।

४२०. भिन्धि विश्वा अप द्विषꣳपरि बाधो जही मृधः । वसु स्पार्हं तदा भर ॥१॥
४२१. यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति । वसु स्पार्हं तदा भर ॥२॥

वयम् । तव ॥ भराम । इध्मम् । कृणवाम । हवीꣳषि । ते । चितयन्तः । पर्वणा-
पर्वणा । पर्वणा । पर्वणा । वयम् । जीवातवे । प्रतराम् । साधय । धियः ।
अग्ने । सख्ये । स । ख्ये । मा । रिषाम । वयम् । तव ॥ शकेम । त्वा ।
समिधम् । सम् । इधम् । साधय । धियः । त्वे इति । देवाः । हविः । अदन्ति ।
आहुतम् । आ । हुतम् । त्वम् । आदित्यान् । आ । दित्यान् । आ । वह ।
तान् । हि । उश्मसि । अग्ने । सख्ये । स । ख्ये । मा । रिषाम । वयम् । तव ॥

१३६. प्रति । वाम् । सूरे । उदिते । उत् । इते । मित्रम् । मि । त्रम् ।
गृणीषे । वरुणम् । अर्यमणम् । रिशादसम् ॥ राया । हिरण्यया । मतिः ।
इयम् । अवृकाय । अ । वृकाय । शवसे । इयम् । विप्रा । वि । प्रा । मेधसा-
तये । मेध । सातये ॥ ते । स्याम । देव । वरुण । ते । मित्र । मि । त्र ।
सूरिभिः । सह । इषम् । स्वऽ३रिति । च । धीमहि ॥

१३७. भिन्धि । विश्वाः । अप । द्विषः । परि । बाधः । जहि । मृधः ।

४२२. यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । वसु स्पाह तदा भर ॥३॥
धा. १२. उ. १. स्व. ६. चू. ॥९॥

१३८. श्यावाश्व आत्रेयः । गायत्री । इन्द्राग्नी ॥

४२३. यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
इन्द्राग्नी तस्य बोधतम् ॥१॥

४२४. तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥२॥

४२५. इदं वां मदिरं मध्वधुक्षन्द्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥३॥
धा. ८. उ. १. स्व. २. टा. ॥१०॥

तृतीयः खण्डः ।

१३९. कश्यपो मारीचः । गायत्री । पवमानः सोमः ॥

४२६. इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदम् ॥१॥

वसु । स्पाहम् । तत् । आ । भर ॥ यस्य । ते । विश्वम् । अनुषक् । अनु ।
सक् । भूरेः । दत्तस्य । वेदति । वसु । स्पाहम् । तत् । आ । भर ॥ यत् ।
वीडौ । इन्द्र । यत् । स्थिरे । यत् । पर्शाने । पराभृतम् । परा । भृतम् । वसु ।
स्पाहम् । तत् । आ । भर ॥

१३८. यज्ञस्य । हि । स्थः । ऋत्विजा । सस्नीइति । वाजेषु । कर्मसु ।
इन्द्राग्नी । इन्द्र । अग्नी इति । तस्य । बोधतम् ॥ तोशासा । रथयावाना । रथ ।
यावाना । वृत्रहणा । वृत्र । हना । अपराजिता । अ । पराजिता । इन्द्राग्नी ।
इन्द्र । अग्नी इति । तस्य । बोधतम् ॥ इदम् । वाम् । मदिरम् । मधु । अधुक्षन् ।
अद्रिभिः । अ । द्रिभिः । नरः । इन्द्राग्नी । इन्द्र । अग्नीइति । तस्य ।
बोधतम् ॥

१३९. इन्द्राय । इन्दो । मरुत्वते । पवस्व । मधुमत्तमः । अर्कस्य ।
योनिम् । आसदम् ॥ आ । सदम् । तम् । त्वा । विप्राः । वि । प्राः । वचो

४२७. तन्त्वा विप्रा वचोविद॒ऽपरिष्कृण्वन्ति धर्णसिम् ।
सन्त्वा मृजन्त्यायवः ॥२॥

४२८. रसन्ते मित्रो अर्यमा पिबन्तु वरुण॒ऽकवे । पवमानस्य मरुतः ॥३॥

धा. १४. उ. न. स्व. १. ल. ॥११॥

विदः । वचः । विदः । परि । कृण्वन्ति । धर्णसिम् । सम् । त्वा । मृजन्ति । आयवः ॥ रसम् । ते । मित्रः । मि । त्रः । अर्यमा । पिबन्तु । वरुणः । कवे । पवमानस्य । मरुतः ॥

---

१९. इषोवृधीयम् ॥ प्रजापतिः । गायत्री । पवमानस्तोमः ।

इन्द्रायेन्दाउ ॥ मरुत्वताइ । पवस्वामाऽ२ । धुमत्तमाः ॥ अर्क-
स्यायोऽ२ ॥ निमा । साऽ२दाऽ२३४औहोवा ॥श्रीः॥ तन्त्वाविप्राः ॥ वचो-
विदाः । परिष्काण्वाऽ२ । तिधर्णसाइम् ॥ सन्त्वामार्जाऽ२ ॥ तिआ ।
याऽ२वाऽ२३४औहोवा ॥ श्रीः ॥ रसन्तेमाइ ॥ त्रोअर्यमा । पिबन्तूवाऽ२ ।
रुण॒ऽकवाइ ॥ पवमानाऽ२ ॥ स्यम । रूऽ२ताऽ२३४औहोवा ॥
इषोवृधेऽ१ ॥ दी. १६. उत्. १६. मा. १४. की. ॥९९॥

२०. क्रौञ्चम् ॥ क्रौञ्चः । गायत्री । पवमानस्तोमः ।

इन्द्रायेन्दाऽ१औहो ॥ माऽ३रुत्वाऽ२३४ताइ । पावस्वामा । धूऽ३म ।
ताऽ२३४माः । पवस्वमधुमाऽ३२ । ताऽ२३४माः ॥ अर्कस्ययोनाऽ२३-
इम् । अ । वाहाइ ॥ साऽ२३४दाम् । एहियाऽ६हा ॥श्रीः॥ तन्त्वाविप्रा-
ऽ१औहो ॥ वाऽ३चोवीऽ२३४दाः । पारिष्काण्वा । ताऽ३इध । णाऽ२३४-
साइम् । परिष्कृण्वन्तिधाऽ३२ । णाऽ२३४साइम् ॥ सन्त्वामृजन्ताऽ२३इ ।
अ । वाहाइ ॥ याऽ२३४वाः । एहियाऽ६हा ॥श्रीः॥ रसन्तेमाऽ१औहो ॥
त्रोऽ३अर्याऽ२३४मा । पाइबन्तूवा । रूऽ३णः । काऽ२३४वाइ । पिबन्तु-

१४०. सप्तर्षयः। बृहतीसतोबृहत्यौ। पवमानः सोमः॥

४२९. मृज्यमानस्सुहस्त्या समुद्रे वाचमिन्वसि।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि॥१॥

---

१४०. मृज्यमानः। सुहस्त्य। सु। हस्त्य। समुद्रे। सम्। उद्रे। वाचम्। इन्वसि। रयिम्। पिशङ्गम्। बहुलम्। पुरुस्पृहम्। पुरु। स्पृहम्। पवमान।

वरुणाऽ२ऽः। काऽ२३४वाइ॥ पवमानस्याऽ२३। म। वाहाइ॥
रूऽ२३४ताः। एहियाऽ६हा। होऽ५इ॥ डा॥
दी. १०. उत्. ३. मा. २८. बै॥१००॥

तृतीयस्यार्द्धऽप्रपाठकः॥

पञ्चमो विँशः।

१. वाजदावर्यः॥ वाजदावर्यः। गायत्री। पवमानस्सोमः।

इन्द्रायेन्दाउ॥ मरूऽ२त्वाऽ२३४ताइ। पवाऽ२स्वाऽ२३४मा।
धुमत्ताऽ२माः॥ आऽ२३र्का॥ स्याऽ२यो। निमोऽ२३४वा। साऽ५दो-
ऽ६"हाइ॥ श्रीः॥ तन्त्वाविप्राः॥ वचोऽ२वीऽ२३४दाः। पराऽ२इष्का-
ऽ२३४एर्वा। तिघर्णाऽ२साइम्॥ साऽ२३न्त्वा॥ माऽ२र्जा। तियो-
ऽ२३४वा। याऽ५वोऽ६"हाइ॥श्रीः॥ रसन्तेमाइ॥ त्रोआऽ२र्याऽ२३४मा।
पिवाऽ२न्तूऽ२३४वा। रुणऽकाऽ२वाइ॥ पाऽ२३वा॥ माऽ२ना।
स्यमोऽ२३४वा। रूऽ५तो६"हाइ॥ दी. ५. उत्. ६. मा. १४ पी.॥१०१॥

२. औद्णोरन्ध्रम्। उद्णोरन्ध्रऽकाव्यः। बृहती। पवमानस्सोमः।

मृज्यमानाः॥ सुहस्तियाऽ३। सामूऽ३द्राइवा। चमिन्वसाऽ३इ।
रायोऽ३म्पाइशा। गम्बहुलाऽ३म्। पूरूऽ२स्पृऽ२३४हाम्॥ पवमा।

४३०. पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने ।
देवानाꣳसोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥२॥

धा. २४. उ. १. स्व. ३. ति. ॥१२॥

अभि । अर्षसि । पुनानः । वारे । पवमानः । अव्यये । वृषा । उ । अचिक्रदत् । वने । देवानाम् । सोम । पवमान । निष्कृतम् । निः । कृतम् । गोभिः । अञ्जानः । अर्षसि ॥

ना । औऽ३हो ॥ भियोऽ२३४वा । षाऽ५सोऽ६"हाइ ॥श्रीः॥ पवमाना ॥
भियर्षसाऽ३इ । पावाऽ३माना । भियर्षसाऽ३इ । पूनाऽ३नोवा । रेपवमाऽ३ ।
नोआऽ२व्याऽ२३४याइ ॥ बृषोअ । चा । औऽ३हो ॥ क्रदोऽ२३४वा ।
वाऽ५नोऽ६"हाइ ॥ श्रीः ॥ वृषोअचाइ ॥ क्रदद्वनाऽ३इ । वार्षोऽ३आचाइ ।
क्रदद्वनाऽ३इ । दाइवाऽ३नाꣳसो । मपवमाऽ३ । ननाऽ२इष्काऽ२३४र्त्ताम् ॥
गोभिर । जा । औऽ३हो ॥ नओऽ२३४वा । षाऽ५सोऽ६"हाइ ॥

दी. ८. उत्. ३. मा. २४. डी. ॥१०२॥

३. ऐडमौद्गोरन्ध्रम् ॥ उद्गोरन्ध्रः काण्यः । बृहती । पवमानस्सोमः ।

मृज्यमानस्सुहस्त्या । समुद्रेवोवा ॥ चामिन्वसि । रायिंपिशाऽ३ ।
हाऽ३हा । गंबहुलंपुरुस्पृहम् ॥ पवमानाऽ३ । हाऽ३हा ॥ भियर्षाऽ२३सा-
ऽ३४३इ ॥श्रीः॥ पवमानाभियर्षꣳसि । पवमानोवा ॥ भायर्षसि । पूनानो-
वाऽ३ । हाऽ३हा । रेपवमानोअव्यये ॥ वार्षोअचाऽ३इ । हाऽ३हाइ ॥
क्रदद्वाऽ२३नाऽ३४३इ ॥ श्रीः ॥ वृषोअचिक्रदद्वने । वृषोअचोवा ॥ क्राद-
द्वने । दाइवानाꣳसोऽ३ । हाऽ३हा । मपवमाननिष्कृतम् ॥ गोभाइरञ्जाऽ३ ।
हाऽ३हा ॥ नोअर्षाऽ२३साऽ३४३इ । ओऽ२३४५इ ॥ऽा॥

दी. २२. उत्. ७. मा. १५. छु. ॥१०३॥

४. वाजजित्। प्रजापतिः। बृहती। पवमानस्सोमः।

मृज्यमानस्सुहा ॥ स्तियाऽ२। समूऽ२हो। द्रेवाऽ२हो। चामिन्व-
साइ। रयाऽ२इ॑होइ। पिशाऽ२हो। गंबहुलाम्। पूरुस्पृहाम् ॥
पवाऽ२हो। मानाऽ२हो ॥ भीयर्षसाऽ३१उवाऽ२३ ॥ श्रीः ॥ पवमा-
नाभिया ॥ षसाऽ२इ। पवाऽ२हो। मानाऽ२हो। भीयर्षसाइ। पुनाऽ२हो।
नोवाऽ२हो। रेपवमा। नोअव्ययाइ ॥ वृषोऽ२होइ। अचाऽ२इहोइ ॥
क्रादद्वनाऽ३१उवाऽ२३ ॥श्रीः॥ वृषोअचिक्रदात् ॥ वनाऽ२इ। वृषोऽ२होइ।
अचाऽ२इहोइ। क्रादद्वनाइ। देवाऽ२हो। ना॑सोऽ२हो। मपवमा।
नानिष्कृताम् ॥ गोभाऽ२इहोइ। अज्ञाऽ२हो ॥ नोअर्षसाऽ३१उवाऽ२३ ॥
वाजीजिगोऽ३व॑ऽ१ ॥ दी. २३. उत्. १४. मा. २६. द्रु. ॥१०४॥

५. वरुणसाम ॥ वरुणः। बृहती। पवमानस्सोमः।

मृज्यमानस्सुहस्त्योवा। ओवा ॥ सामुद्रेवा। चमाइन्वाऽ१सीऽ२।
राऽ२३योम्। पाऽ२३इशा। गंबहुलम्। पुरूऽ२३हाइ। स्पृहाऽ३मा ॥
पवमानाभियर्षसि। पाऽ२३वा ॥ मानाभियौऽ३। होऽ३१२३४। वा।
षाऽ५सोऽ६"हाइ ॥ श्रीः ॥ पवमानाभियर्षसोवा। ओवा ॥ पावमाना।
भियार्षाऽ१साऽ२इ। पूऽ२३ना। नोऽ२३वा। रेपवमा। नोआऽ२३हाइ।
व्ययाऽ३आ ॥ वृषोअचिक्रदद्वने। वाऽ२३र्षो ॥ आचिक्रदौऽ३। हो-
ऽ३१२३४। वा। वाऽ५नोऽ६"हाइ ॥श्रीः॥ वृषोअचिक्रदद्वनोवा। ओवा ॥
वार्षोअचि। क्रदाद्वाऽ१नाऽ२इ। दाऽ२३इवा। नाऽ२३॑सो। मपवमा।
ननाऽ२३हाइ। कृताऽ३मा ॥ गोभिरज्ञानोअर्षसि। गोऽ२३भाइः ॥
आज्ञानऔऽ३। होऽ३१२३४। वा। षाऽ५सोऽ६"हाइ ॥
दी. २२. उत्. ६. मा. २२. चा. ॥१०५॥

१४१. अमहीयुराङ्गिरसः । गायत्री । पवमानस्सोमः ॥

४३१. एतमु त्यन्दश क्षिपो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ॥१॥

४३२. समिन्द्रेणोत वायुना सुत एति पवित्र आ । सꣳसूर्यस्य रश्मिभिः ॥२॥

४३३. स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥३॥

धा. ८. उ. १. स्व. ३. टि. ॥१३॥

चतुर्थः खण्डः ॥

---

१४१. एतम् । उ । त्यम् । दश । क्षिपः । मृजन्ति । सिन्धुमातरम् । सिन्धु । मातरम् । सम् । आदित्येभिः । आ । दित्येभिः । अख्यत । सम् ।

---

६. अङ्गिरसां गोष्ठः ॥ अङ्गिरसः । बृहती । पवमानस्सोमः ॥

हाउहाउहाउवा । मृज्यमानस्सुहस्त्या । इहा । उपाऽ२३४५ ॥
समुद्रेवाचमिन्वसि । इहा । उपाऽ२३४५ ॥ रयिंपिशङ्गंबहुलंपुरुस्पृहम् ।
इहा । उपाऽ२३४५ ॥ पवमानाभियर्षसि । इहा । उपाऽ२३४५ ॥ श्रीः ।
पवमानाभियर्षसि । इहा । उपाऽ२३४५ ॥ (त्रीणि । द्विः) ॥
पुनानोवारेपवमानोअव्यये । इहा । उपाऽ२३४५ ॥ वृषोअचिक्रदद्वने ।
इहा । उपाऽ२३४५ ॥ श्रीः ॥ वृषोअचिक्रदद्वने । इहा । उपाऽ२३४५ ।
(त्रीणि । द्विः) देवानाꣳसोमपवमाननिष्कृतम् । इहा । उपाऽ२३४५ ॥
हाउहाउहाउवा । गोभिरञ्जानोअर्षसि । इहा । उपाऽ२३४५ ॥

दी. ३१. उत्. ५. मा. १३. ङि. ॥१०६॥

७. इहवद्वामदेव्यम् । वामदेवः । गायत्री । पवमानस्सोमः ॥

एतमुत्यंदशक्षिपः । इहा ॥ मृजन्तिसिन्धुमातराऽ२म् । इहा ॥
समादित्येभिराऽ२ । इहाऽ३ ॥ ख्याऽ२३४तोऽ६"हाइ ॥श्रीः॥ समिन्द्रेणो-

१६

१४२. शुनश्शेप आजीगर्तिः । गायत्री । इन्द्रः ।

४३४. रेवतीर्नस्सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥१॥

४३५. आ घ त्वावान्त्मना युक्तस्तोतृभ्यो धृष्णवीयानः ।
ऋणोरक्षं न चक्र्योः ॥२॥

४३६. आ यदुदुवश्शतक्रतवा कामं जरितृणाम् । ऋणोरक्षं न शचीभिः ॥३॥

धा. १८. उ. २. स्व. ४. ठी. ॥१४॥

इन्द्रेण । उत । वायुना । सुतः । एति । पवित्रे । आ । सम् । सूर्यस्य ।
रश्मिभिः ॥ सः । नः । भगाय । वायवे । पूष्णे । पवस्व । मधुमान् । चारुः ।
मित्रे । मि । त्रे । वरुणे । च ॥

१४२. रेवतीः । नः । सधमादे । सध । मादे । इन्द्रे । सन्तु । तुवि-
वाजाः । तुवि । वाजाः । क्षुमन्तः । याभिः । मदेम ॥ आ । घ । त्वावान् । त्मना ।

तवायुना । इहा ॥ सुतएतिपवित्रआऽ२ । इहा ॥ सꣳसूर्यस्यराऽ२ । इहाऽ३ ॥
रश्माऽ२३४इभोऽ६"हाइ ॥ श्रीः ॥ सनोभगायवायवे । इहा । पूष्णेपवस्व-
मधुमाऽ२न् । इहा ॥ चारुर्मित्रेवरूऽ२ । इहाऽ३ ॥ णाऽ२३४-
इचोऽ६"हाइ ॥

दी. १८. उत्. ४. मा. १०. ढौ. ॥१०७॥

८. वारवन्तीयम् ॥ इन्द्रः । गायत्री । इन्द्रः ॥

रेवतीर्नाऔहोहाइ ॥ साधामाऽ२३४दाइ । इन्द्राइसाऽ२३४हा ।
तुतुविवाऽ३४ । औहोवा । इहाऽ२३४हाइ । उहुवाऽ२३४जाः ॥ क्षुमन्तः ।
या"भिर्मदाऽ३४ । औहोवा । इहाऽ२३४हाइ । औहोऽ३१२३४ । मा ।
एहियाऽ६हा ॥ श्रीः ॥ आघत्वावाꣳऔहोहाइ ॥ त्मानायूऽ२३४क्ताः ।

१४३. मधुच्छन्दा वैश्वामित्रः। गायत्री। इन्द्रः।

४३७. सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥१॥

४३८. उपनस्सवना गहि सोमस्य सोमपाःपिब। गोदा इद्रेवतो मदः ॥२॥

४३९. अथा ते अन्तमानां विद्याम सुमतीनाम्।
मा नो अति ख्य आ गहि ॥३॥
धा. ११. उ. १. स्व. न. कौ ॥१५॥

१४४. मान्धाता यौवनाश्वः। गोधा ऋषिका। महापङ्क्तिः। इन्द्रः।

४४०. उभे यदिन्द्र रोदसी आपप्राथोषा इव।
महान्तन्त्वा महीनाꣳसम्राजं चर्षणीनाम् ॥
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥१॥

युक्तः। स्तोतृभ्यः। धृष्णो। ईयानः। ऋणोः। अक्षम्। न। चक्र्योः॥ आ। यत्। दुवः। शतक्रतो। शत। क्रतो। आ। कामम्। जरितृणाम्। ऋणोः। अक्षम्। न। शचीभिः॥

१४३. सुरूपकृत्नुम्। सुरूप। कृत्नुम्। ऊतये। सुदुघाम्। सु। दुघाम्। इव। गोदुहे। गो। दुहे। जुहूमसि। द्यविद्यवि। द्यवि। द्यवि॥ उप। नः। सवना। आ। गहि॥ सोमस्य। सोमपाः। सोम। पाः। पिब। गोदाः। गो। दाः। इत्। रेवतः। मदः॥ अथ। ते। अन्तमानाम्। विद्याम। सुमतीनाम्। सु। मतीनाम्। मा। नः। अति। ख्यः। आ। गहि॥

स्तोतृभ्योऽ२३४हाइ। धृष्णवीयाऽ३४। औहोवा। इहाऽ२३४हाइ। उहुवाऽ२३४नाः॥ ऋणोर। क्षा"ञ्चक्राऽ३४। औहोवा। इहाऽ२३४-हाइ। औहोऽ३१२३४। योः। एहिया६हा॥श्रीः॥ आयद्दुवाओहोहाइ॥ शातक्राऽ२३४ताउ। आकामाऽ२३४ꣳहाइ। जरितृऽ३४। औहोवा। इहाऽ२३४हाइ। उहुवाऽ२३४णाम्॥ ऋणोर। क्षा"ञ्चशचाऽ३४।

३ १ २ ३ १ २ ३ २ ३ १ २
४४१. दीर्घश्चिद्वृत्रं यथा शक्तिं बिभर्षि मन्तुमः ।
१ २ ३ २ ३ २ ३ १ २ र
पूर्वेण मघवन्पदा वयामजो यथा यमः ॥
३ १ २ र ३ १ २ र
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥२॥
१ २ ३ १ २ र ३ २
४४२. अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
३ १ २ र ३ २ ३ १ २ ३ १ २
अधस्पदन्तमीं कृधि यो अस्माँ अभिदासति ॥
३ १ २ र ३ १ २ र
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥३॥

धा. ४२. उ. न. स्व. १०. यौ. ॥१६॥

पञ्चमः खण्डः ॥

---

३ १ २ ३ १२ र ३ १ २ ३ १ २ ३
१४४. उभे इति । यत् । इन्द्र । रोदसी इति । आपप्राथ । आ ।
१ २ ३ २ ३ १ २ ३ १ २ ३
पप्राथ । उषाः । इव । महान्तम् । त्वा । महीनाम् । सम्राजम् । सम् ।
१ २ र ३ २ २ ३ २ १ २ र ३ २ १ २ र
राजम् । चर्षणीनाम् ॥ देवी । जनित्री । अजीजनत् । भद्रा । जनित्री ।
३ ३ २ २ ३ २ ३ १ २ र १ २ र
अजीजनत् ॥ दीर्घम् । हि । अङ्कुशम् । यथा । शक्तिम् । बिभर्षि ।
३ १ २ र ३ २ ३ २ १ २ र १ २ र ३
मन्तुमः । पूर्वेण । मघवन् । पदा । वयाम् । अजः । यथा । यमः ॥
३ २ १ २ र ३ २ १ २ र ३
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ अव । स्म ।
२ ३ २ १ २ र ३ २ ३ २
दुर्हणायतः । दुः । हृणायतः । मर्तस्य । तनुहि । स्थिरम् । अधस्पदम् ।

---

३ र ४ र ५ १ ३ ५ ३ र २ ५ र ५
औहोवा । इहाऽ२३४हाइ । औहोऽ३१२३४ । भीः । एहियाऽ६हा ।
४
होऽ५इ ॥डा॥

दी. ३४. उत्. ९. मा. २५. ध्रु. ॥१०८॥

९. तृतीयं वैदन्वतम् ॥ विदन्वान्भार्गवः । गायत्री । पवमानस्सोमः ॥

३ र ४ २ ४ ५ २ १ २ र १ २ र ३ २ १
पाऽ५रि । स्वानोऽ३गाऽ३इरिष्ठाः ॥ पवित्रेसो । मोअक्षरात् ।
२ १ २ र १ र ४ ५ ३ ४ २
पवित्रे । सोमोऽ२३ । क्षरात् ॥ श्रीः ॥ तूऽ५वम् । विप्राऽ३स्तूऽ३-
४ ५ २ १ २ १ २ ३ २ १ २ १ र ४ ५
वंकवाइः ॥ मधुप्रजा । तमन्धसाः । मधुप्रजा । तमाऽ२३ । धासाः ॥
३ र ४ २ ४र ५ २र १र २ १ २ ३र २ १
श्रीः ॥ तूऽ५वे । विश्वेऽ३साऽ३जोषसाः । देवासःपाइ । तिमाशता ।
२र १र र ४ ५ १ २ २ ५
देवासःपी । तिमाऽ२३ । शाता । ओइ । मदौ । वाऽ३४३ओऽ३४वा ॥

१४५. असितः काश्यपो देवलो वा। गायत्री। पवमानः सोमः॥

४४३. परि स्वानो गिरिष्ठाऽपवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि ॥१॥

४४४. त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ॥२॥

४४५. त्वे विश्वे सजोषसो देवासऽपीतिमाशत। मदेषु सर्वधा असि ॥३॥

धा. ११. उ. २. स्व. २. खा. ॥१७॥

अधः। पदम्। तम्। ईम्। कृधि। यः। अस्मान्। अभिदासति। अभि। दासति। देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥

१४५. परि। स्वानः। गिरिष्ठाः। गिरि। स्थाः। पवित्रे। सोमः। अक्षरत्। मदेषु। सर्वधाः। सर्व। धाः। असि। त्वम्। विप्रः। वि। प्रः। त्वम्। कविः। मधु। प्र। जातम्। अन्धसः। मदेषु। सर्वधाः। सर्व। धाः। असि॥ त्वे इति। विश्वे। सजोषसः। स। जोषसः। देवासः। पीतिम्। आशत। मदेषु। सर्वधाः। सर्व। धाः। असि॥

षुवा॥ सर्वधाः। असाइ। माऽऽदाऽऽ३४औहोवा॥ एऽ३। षुसर्व-धाअसीऽऽ३४५॥ दी. १७. उत्. ९. मा. १८. भै. ॥१०९॥

१०. आद्यं वैदन्वतम्॥ विदन्वान्भार्गवः। गायत्री। पवमानस्सोमः॥

पारी॥ स्वानोगिरिष्ठाः। पवाऽइत्रेऽ३४सो। मोअक्षाराऽत्॥

श्रीः॥ तूवाम्॥ विप्रस्त्वंकविः। मधूऽप्राऽ३४ज्ञा। तमन्धासाऽः॥

श्रीः॥ तूवे॥ विश्वेसजोषसः। देवाऽसाऽ३४ऽपी। तिमाशाताऽ॥

मदाइषूसाऽ३। ईऽ३याऽ३॥ वंधोऽ३४वा। आऽ५सोऽ६"हाइ॥

दी. ८. उत्. ५. मा. १०. णौ. ॥११०॥

११. चतुर्थं वैदन्वतम्॥ विदन्वान्भार्गवः। गायत्री। पवमानस्सोमः।

औऽ३होइ। इहहाहहाइ। औऽ२होऽ३४वा। पराइस्वा-ऽ३४नो। गिराऽ३४इष्ठाः॥ पावित्रेऽ३४सो। मोअक्षाऽ३४रात्॥

श्रीः॥ तुवंग्राऽ३४इप्रः। तुवंक्राऽ३४वीः॥ मधूप्राऽ३४जा।

१४६. ऋणंचयो राजर्षिः, शक्तिर्वासिष्ठः। यवमध्यगायत्रीसतोबृहत्यौ। पवमानः सोमः॥

४४६. स सुन्वे यो वसूनां यो रायामानेता य इडानाम्।
सोमो यस्सुक्षितीनाम् ॥१॥

४४७. यस्य त इन्द्र पिबाद्यस्य मरुतो यस्य वार्यमणा भगः।
आ येन मित्रा वरुणा करामह एन्द्रमवसे महे ॥२॥
धा. ९. उ. न. स्व. ४. ली. ॥१८॥

---

१४६. सः। सुन्वे। यः। वसूनाम्। यः। रायाम्। आनेता। आ। नेता। यः। इडानाम्। सोमः। यः। सुक्षितीनाम्। सु। क्षितीनाम्॥ यस्य। ते। इन्द्रः। पिबात्। यस्य। मरुतः। यस्य। वा। अर्यमणा। भगः। आ। येन। मित्रा। मि। त्रा। वरुणा। करामहे। आ। इन्द्रम्। अवसे। महे॥

तमघाऽऽसाः॥ श्रीः॥ तुवेवाऽऽइश्वे। सजोषाऽऽसाः॥ देवासाऽऽपो। तिमाशाऽऽता॥ मदाइषूऽऽसा। वेधाआ-ऽऽसी॥ औऽऽहोइ। इहहाहहाइ। औऽऽहोऽऽवाऽऽएऽऽ। उपाऽऽ॥ दी. ३. उत्. न. मा. ३७. रे. ॥१११॥

१२. दीर्घम्। भरद्वाजः। यवमध्या गायत्री। पवमानस्सोमः॥

साम्॥ न्वेयोवसूऽऽनाम्। योराऽऽयामाऽऽ। नेतायइडा-ऽऽनाम्॥ सोऽऽमाः॥ यस्सुक्षिताऽऽइनोऽऽहाइ॥ श्रीः॥ सोमाः। यस्सुक्षिताऽऽइनाम्। यास्याऽऽताईऽऽ। द्र पिबाद्यस्य-मरूऽऽताः। यास्याऽऽताईऽऽ। द्र पिबाद्यस्यमरूऽऽताः॥ याऽऽस्या॥ वार्यमणाभाऽऽगोऽऽहाइ॥ श्रीः॥ यास्या॥ वार्यमणाभा-

१४७. पर्वतनारदौ काण्वौ । उष्णिक् । पवमानः सोमः ॥

४४८. तं वस्सखायो मदाय पुनानमभि गायत ।
शिशुन्न हव्यैस्स्वदयन्त गूर्तिभिः ॥१॥

४४९. सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।
देवावीर्मदो मतिभिः परिष्कृतः ॥२॥

४५०. अयं दक्षाय साधनोऽयꣳशर्द्धाय वीतये ।
अयं देवेभ्यो मधुमत्तरस्सुतः ॥३॥

धा. १७. उ. न. स्व. ३. यि. ॥१९॥

---

१४७. तम् । वः । सखायः । स । खायः । मदाय । पुनानम् । अभि । गायत । शिशुम् । न । हव्यैः । स्वदयन्त । गूर्तिभिः ॥ सम् । वत्सः । इव । मातृभिः । इन्दुः । हिन्वानः । अज्यते । देवावीः । देव । अवीः । मदः । मतिभिः । परिष्कृतः । परि । कृतः ॥ अयम् । दक्षाय । साधनः । अयम् । शर्द्धाय । वीतये । अयम् । देवेभ्यः । मधुमत्तरः । सुतः ॥

ऽ२३गाः । आयेऽ२नामीऽ२ । त्रावरुणाकरामाऽ२३हाइ । आयेऽ२नामीऽ२ ।
त्रावरुणाकरामाऽ२३हाइ ॥ आऽ२३इन्द्राम् ॥ अवसेमाऽ२३४होऽ६"हाइ ॥

दी. १७. उत्. ३. मा. २०. जौ. ॥११२॥

१३. कार्णश्रवसम् ॥ कर्णश्रवा आङ्गिरसः । उष्णिक् । पवमानस्सोमः ॥

ताऽ२३४म्वः । साऽ२३४खा ॥ योमदाऽ२३या । पूनानम ।
भिगायाऽ२३ता ॥ शाइशुन्नह । व्यैस्वदयाऽ२३ ॥ तगूर्तिभाऽ३४३इः ॥
श्रीः ॥ साऽ२३४म्व । त्साऽ२३४ई ॥ वमातॄऽ२३भाइः । आइन्दुर्हिन्वा ।
नोअज्याऽ२३ताइ ॥ दाइवावीर्म । दोमतिभाऽ२३इः ॥ परिष्कृताऽ३४३ः ॥
श्रीः ॥ आऽ२३४यम् । दाऽ२३४क्षा ॥ यसाधाऽ२३नाः । आयꣳ-

१४८. मनुस्सांवरणः। अनुष्टुप्। पवमानः सोमः॥

४५१. सोमा॒ पव॑न्त इन्द॒वोऽस्मभ्यं॑ गातुवित्तमाः।
मित्रा स्वाना अरेपसस्वाध्यस्वविदः॥१॥

४५२. ते पूतासो विपश्चितस्सोमासो दध्याशिरः।
सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते॥२॥

४५३. सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि।
इषमस्मभ्यमभितस्समस्वरन्वसुविदः॥३॥

धा १०. उ. न. स्व. २, २०. वा. ॥२०॥

---

१४८. सोमाः। पवन्ते। इन्दवः। अस्मभ्यम्। गातुवित्तमाः। गातु।
वित्तमाः। मित्राः। मि। त्राः। स्वानाः। अरेपसः। अ। रेपसः। स्वाध्यः।
सु। आध्यः। स्वर्विदः। स्वः। विदः॥ ते। पूतासः। विपश्चितः। विपः।
चितः। सोमासः। दध्याशिरः। दधि। आशिरः। सूरासः। न। दर्शतासः।

शुद्धा। यपीताऽ२३याइ॥ आयन्देवे। भ्योमधुमाऽ२३। तरस्सुता-
ऽ३४३ः। ओ३ऽ२३४५इ॥डा॥ दी. १. ७. उत्. ६. मा. १९. चो. ॥११३॥

१४. गौरीवितम्॥ गौरीवितिः। अनुष्टुप्। पवमानस्सोमः।

सोमाः। पवाऽ३। तइन्दवाः। अस्मभ्यङ्गातुवित्तमाऽ२३ः।
माइत्रास्वानाऽ३१२३ः। अरेऽ५पसाः॥ सूवाधियाऽ३१२३ः॥ सुवोवा।
वाऽ५इदोऽ६हाइ॥ श्रीः॥ तेपू। तासोऽ३। विपश्चिताः॥ सोमासोद-
दध्याशिराऽ२३ः। सूरासोनाऽ३१२३। दर्शाऽ५तासाः॥ जाइगत्नवा-
ऽ३१२३ः॥ ध्रुवोवा। घाऽ५र्तोऽ६"हाइ॥ श्रीः॥ सुष्वा। णासोऽ३।
वियद्रिभाइः॥ चितानागोरधित्वचाऽ२३इ। आइषमस्माऽ३१२३। भ्यमा-
ऽ५भिताः॥ सामस्वराऽ३१२३न्॥ वसोवा। वाऽ५इदोऽ"६हाइ॥

दी. २१. उत्. न. मा. २४. ही. ॥११४॥

जिगत्नवः । ध्रुवाः । घृते ॥ सुष्वाणासः । वि । अद्रिभिः । अ । द्रिभिः । चितानाः । गोः । अधि । त्वचि । इषम् । अस्मभ्यम् । अभितः । सम् । अस्वरन् । वसुविदः । वसु । विदः ॥

---

१५. मधुश्चुन्निधनम् ॥ प्रजापतिः । अनुष्टुप् । पवमानस्सोमः ॥

सोमाऽपवन्तइन्दवाऽइए ॥ अस्मभ्यङ्गाऽइतूवित्तमाऽइः । हाऽइहा । औऽइहोऽइवा । आइहीऽइ । मित्रास्वानाऽइआरेपसाऽइः । हाऽइहा । औऽइहोऽइवा । आइहीऽइ ॥ सुवाधियाऽइः । हाऽइहाइ । औऽइहोऽइवा । आइहीऽइ ॥ सुवः । वाऽइदाऽइ४औहोवा ॥ श्रीः ॥ तेपूतासोविपश्चिताऽइए ॥ सोमासोदऽइधाआशिराऽइः । हाऽइहा । औऽइहोऽइवा । आइहीऽइ । सुरासोनऽइदाशतासाऽइः । हाऽइहा । औऽइहोऽइवा । आइहीऽइ ॥ जाइगत्नवाऽइः । हाऽइहाइ । औऽइहोऽइवा ॥ आइहीऽइ ॥ ध्रुवाः । घाऽइर्ताऽइ४औहोवा ॥श्रीः॥ सुष्वाणासोवियद्रिभाऽइरे ॥ चितानागोऽइराधित्वचाऽइ । हाऽइहा । औऽइहोऽइवा । आइहीऽइ । इषमस्मऽइभ्यामभिताऽइः । हाऽइहा । औऽइहोऽइवा । आइहीऽइ ॥ सामस्वराऽइन् । हाऽइहाइ । औऽइहोऽइवा । आइहीऽइ ॥ वसु । वाऽइदाऽइ४औहोवा । मधुश्चुताऽइ४५ः ॥

दी. ३३. उत्. ४. मा. ३५. द्रु. ॥११५॥

१६. वाङ्निधनं कौञ्चम् ॥ कुङ् । अनुष्टुप् । पवमानस्सोमः ॥

सोमाऽपावाऽइ१२३४ । तइ । दवाऽइः ॥ अस्मभ्यंगाऽइ१२३४ । तुवि । तमाऽइः ॥ मित्रास्वानाऽइ१२३४ः । अरे । पसाऽइः ॥ सुवाधीयाऽइ१२३ः ॥ सुवाऽ५र्विदाउ ॥ श्रीः ॥ तेपूतासोऽइ१२३४ ।

१७

१४९. कुत्स आङ्गिरसः । त्रिष्टुप् । पवमानः सोमः ॥

४५४. अया पवा पवस्वैना वसूनि माश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरन्धात् ॥१॥

४५५. उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिश्सहस्रा नैगुतो वसूनि वृक्षन्न पक्वन्धूनवद्रणाय ॥२॥

---

१४९. अया । पवा । पवस्व । एना । वसूनि । माश्चत्वे । इन्दो । सरसि । प्र । धन्व । ब्रध्नः । चित् । यस्य । वातः । न । जूतिम् । पुरुमेधाः ।

विपः । चिताऽ३ः ॥ सोमासोदाऽ३१२३४ । धिया । शिराऽ३ः ॥ सूरासोनाऽ३१२३४ । दशं । तासाऽ३ः ॥ जिगात्नावाऽ३१२३ः ॥ ध्रुवाऽ५घृताउ ॥ श्रीः ॥ सुष्वाणासोऽ३१२३४ । विय । द्रिभाऽ३इः ॥ चितानागोऽ३१२३४ः । अधि । त्वचाऽ३इ ॥ इषामास्माऽ३१२३४ । म्यम । मिताऽ३ः ॥ समास्वाराऽ३१२३न् ॥ वसूऽ५विदाउ ॥ वा ॥

दी. ११. उत्. १२. मा. २०. खौ. ॥११६॥

१७. ऐडं क्रौञ्चम् । क्रुङ् । अनुष्टुप् । पवमानस्सोमः ॥

सोमाश्पवन्तइन्दवाः ॥ अस्माभ्यंगा । तुवित्तमाः । माइत्राओऽ२३४वा । स्वानाअरेपसाऽ२३४५ः ॥ सुवाधियाः ॥ सुववाऽ२३इदाऽ३४३ः ॥ श्रीः ॥ तेपूतासोविपश्चिताः ॥ सोमासोदा । धियाशिराः । सूराओऽ२३४वा । सोनदर्शतासाऽ२३४५ः ॥ जिगत्नवाः ॥ ध्रुवाघाऽ२३र्ताऽ३४३इ ॥ श्रीः ॥ सुष्वाणासोवियद्रिभाइः ॥ चितानागोः । अधित्वचाइ । आइषाओऽ२३४वा । अस्मभ्यमभिताऽ२३४५ः ॥ समस्वरान् ॥ वसुवाऽ२३इदाऽ३४३ः । ओऽ२३४५इ ॥ डा ॥

दी. २०. उत्. ९. मा. २७. भे. ॥११७॥

४५६. महीमे अस्य वृष नाम शूषे मा॑श्वत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतस्तेहयच्चापामित्राँ अपाचितो अचेतः ॥३॥

धा. १६. उ. १. स्व. ३. कि. ॥२१॥

॥ षष्ठः खण्डः ॥

पुरु । मेधाः । चित् । तकवे । नरम् । धात् ॥ उत । नः । एना । पवया । पवस्व ।
अधि । श्रुते । श्रवाय्यस्य । तीर्थे । षष्टिम् । सहस्रा । नैगुतः । नै । गुतः ।
वसूनि । वृक्षम् । न । पक्वम् । धूनवत् । रणाय ॥ महे । इमे इति । अस्य ।
वृष । नाम । शूषे इति । मा॑श्वत्वे । वा । पृशने । वा । वधत्रे इति ।
अस्वापयत् । निगुतः । नि । गुतः । स्नेहयत् । च । अप । अमित्रान् । अ ।
मित्रान् । अप । अचितः । अ । चितः । अच । इतः ।

---

१८. औष्टम् ॥ श्नुष्टिः । त्रिष्टुप् । पवमानस्सोमः ॥

औहोहाइ । अयोहाइ ॥ पवापवस्वैनावसू३ऽ२नो । औऽ३होइ ।
इहा । ईऽ३या । मा॑श्वत्वइन्दोसरसिप्रधाऽ२३न्वा । औऽ३होइ । इहा ।
ईऽ३या ॥ ब्रध्नश्चिद्यस्यवातोनजू३ऽ२३तीम् । औऽ३होइ । इहा । ईऽ३या ॥
पुरुमेधाश्चित्तकवेनराऽ२३न्धात् । औऽ३होइ । इहा । ईऽ२ । याऽ२३४ ।
औहोवा ॥ श्रीः ॥ औहोहाइ । उतोहाइ ॥ नएनापवयापवाऽ२३स्वा ।
औऽ३होइ । इहा । ईऽ३या । अधिश्रुतेश्रवायियस्यताऽ२३इर्याइ । औऽ३-
होइ । इहा । ईऽ३या ॥ षष्टि॑सहस्रानैगुतोवसू३ऽ२३नो । औऽ३होइ ।
इहा । ईऽ३या ॥ वृक्षन्नपक्वन्धूनवद्रणाऽ२३या । औऽ३होइ । इहा । ईऽ२ ।
याऽ२३४ । औहोवा ॥ श्रीः ॥ औहोहाइ । महोहाइ ॥ मेअस्यवृषनाम-
शूऽ२३षाइ । औऽ३होइ । इहा । ईऽ३या । मा॑श्वत्वेवापृशनेवावधाऽ२३-
त्राइ । ओऽ३होइ । इहा । ईऽ३या ॥ अस्वापयन्निगुतस्नेहयाऽ२३च्चा ।

१५०. बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गोपायना लौपायना वा।
[1]द्विपदा विराट्। अग्निः॥

४५७. अग्ने त्वन्नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥१॥

४५८. वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिन्दाः ॥२॥

४५९. तन्त्वा शोचिष्ठ दीदिवस्सुम्नाय नूनमीमहे सखिभ्यः ॥३॥

धा. १५. उ. न. स्व. २. वा. ॥२२॥

---

१५०. अग्ने। त्वम्। नः। अन्तमः। उत। त्राता। शिवः। भुवः। वरूथ्यः॥ वसुः। अग्निः। वसुश्रवाः। वसु। श्रवाः। अच्छ। नक्षि। द्युमत्तमः। रयिम्। दाः॥ तम्। त्वा॥ शोचिष्ठ। दीदिवः। सुम्नाय। नूनम्। ईमहे। सखिभ्यः। स। खिभ्यः॥

ओऽ३होइ। इहा। ईऽ३या॥ अपामित्राꣳअपाचितोअचाऽ२३इताः। औऽ३होइ। इहा। ईऽ२। याऽ२३४। औहोवा॥ एऽ३। दीदिहीऽ१॥

दी. ४२. उत्. ११, मा. ३१. च. ॥११८॥

१९. गूर्दः॥ प्रजापतिः। द्विपदा विराट्। अग्निः॥

ओग्राइ॥ त्वन्नोऽ२३आ। हुम्माऽ२३। ताऽ२३४माः। उतत्राताशिवोभुवाऽ२३४५ः॥ शिवोभुवाऽ२३ः॥ वरोवा। थाऽ५योऽ६"हाइ॥ श्रीः॥ वासूः॥ अ। ग्राइर्वाऽ२३सू। हुम्माऽ२३। श्राऽ२३४वाः। अच्छानक्षिद्युमत्तमाऽ२३४५ः। द्युमत्तमाऽ२३ः॥ रयोवा। आऽ५इन्दोऽ६"हाइ॥ श्रीः॥ तान्त्वा॥ शो। चाइष्ठाऽ२३दी। हुम्माऽ२३इ। दीऽ२३४वाः। सुम्नायनूनमीमहाऽ२३४५इ॥ नमीमहाऽ२३इ॥ सखोवा। भाऽ५योऽ६"हाइ॥

दी. १०. उत्. ५. मा. १९. मो. ॥११९॥

---

[1] विष्टारपङ्क्तिरित्युपनिदानसूत्रम्।

१५१. भुवन आप्त्यः साधनो वा भौवनः। [1]द्विपदा त्रिष्टुप्। इन्द्रः॥

४६०. इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥१॥

४६१. यज्ञश्च नस्तन्वं च प्रजाश्चादित्यैरिन्द्रस्सह सीषधातु ॥२॥

४६२. आदित्यैरिन्द्रस्सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥३॥

धा. १२. उ. २. स्व. २. छा. ॥२३॥

१५२. त्रसदस्युः। [2]द्विपदा विराट्। इन्द्रः॥

४६३. प्रवोचोप। (प्रवइन्द्राय वृत्रहन्तमाय विप्राय गाथं गायता यज्जुजोषते॥१॥

४६४. अर्चन्त्यर्कं मरुतस्वर्का आ स्तोभति श्रुतोयुवा स इन्द्रः ॥२॥

४६५. उप प्रक्षे मधुमति क्षियन्त-पुष्येम रयिन्धीमहे त इन्द्र ॥३॥

धा. २. उ. न. स्व. १. य.[3]) ॥२४॥

॥ सप्तमः खण्डः ॥

इति सप्तमोऽध्यायः ॥

चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥

---

१५१. इमा। नु। कम्। भुवना। सीषधेम। इन्द्रः। च। विश्वे। च। देवाः॥ यज्ञम्। च। नः। तन्वम्। च। प्रजाम्। प्र। जाम्। च। आदित्यैः। आ। दित्यैः। इन्द्रः। सह। सीषधातु॥ आदित्यैः। आ। दित्यैः। इन्द्रः। सगणः। स। गणः। मरुद्भिः। अस्मभ्यम्। भेषजा। करत्॥

१५२. (प्र। वः। इन्द्राय। वृत्रहन्तमाय। वृत्र। हन्तमाय। विप्राय। वि। प्राय। गाथम्। गायत। यम्। जुजोषते॥ अर्चन्ति। अर्कम्। मरुतः। स्वर्काः। सु। अर्काः। आ। स्तोभति। श्रुतः। युवा। सः। इन्द्रः॥ उप। प्रक्षे। प्र। क्षे। मधुमति। क्षियन्तः। पुष्येम। रयिम्। धीमहे। ते। इन्द्र)॥

---

[1] ज्योतिष्मतीत्युपनिदानसूत्रम्।

[2] द्विपदा त्रिष्टुबित्युपनिदानसूत्रम् [3] धा. १४. उ. १. स्व. ३. ति.।

अथाष्टमोऽध्यायः ।

चतुर्थप्रपाठकस्य द्वितीयोऽर्धः ।

१५३. वृषगणो वासिष्ठः असितः काश्यपो देवलो वा । त्रिष्टुप्गायत्र्यौ पवमानः सोमः ॥

४६६. प्र काव्यमुशनेव ब्रुवाणो देवो देवानाञ्जनिमा विवक्ति ।
महिव्रतश्शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥१॥

४६७. प्र हꣳसासस्तृपला वग्नुमच्छामा दस्तं वृषगणा अयासुः ।
अङ्गोषिणं पवमानꣳसखायो दुर्मर्षं वाणं प्रवदन्ति साकम् ॥२॥

४६८. स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसङ्कृणुते तिग्मशृङ्गो दिवा हरिर्दद्दशे नक्तमृज्रः ॥३॥

---

१५३. प्र । काव्यम् । उशना । इव । ब्रुवाणः । देवः । देवानाम् । जनिम । विवक्ति । महिव्रतः । महि । व्रतः । शुचिबन्धुः । शुचि । बन्धुः । पावकः । पदा । वराहः । अभि । एति । रेभन् ॥ प्र । हꣳसासः । तृपला । वग्नुम् । अच्छ । अमात् । अस्तम् । वृषगणाः । वृष । गणाः । अयासुः ।

---

२०. उद्वꣳशपुत्रः ॥ प्रजापतिः । द्विपदा विराट् । इन्द्रः ॥

प्रवाः ॥ आइन्द्रायवृत्रहान्तमाऽऽ३या ॥ वाइग्रायगाथंगाऽऽ१या-ऽऽ३ता ॥ याज्ञुजौवाऽऽ३ । उप् । षाऽऽतोऽ३५"हाइ ॥श्रीः॥ अर्चा ॥ ताअर्कम्मरुतास्सुवाऽऽ३र्काः ॥ आस्तोभतिश्रुतोऽ१यूऽ३वा ॥ सआऽऽ३उवाऽऽ३ । उप् । आऽऽइन्द्रोऽ३५"हाइ ॥ श्रीः ॥ उषा ॥ प्राक्षेमधुमताइक्षियाऽऽ३न्ताः ॥ पूष्येमरयिन्धाऽ१इमाऽ३हाइ ॥ तआऽऽ३उवाऽऽ३ । उप् । आऽऽइन्द्रोऽ३५"हाइ ॥ दी. ६. उत्. ३. मा. १८. गै. ॥१२०॥

॥ इति तृतीयः प्रपाठकः ॥

॥ षष्ठो विंशः ॥

४६९. प्रस्वानासो रथा इवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥४॥

४७०. हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥५॥

४७१. राजानो न प्रशस्तिभिस्सोमासो गोभिरञ्जते ।
यज्ञो न सप्त धातृभिः ॥६॥

४७२. परि स्वानास इन्दवो मदाय बर्हणा गिरा । मधो अर्षन्ति धारया ॥७॥

४७३. आपानासो विवस्वतो जिन्वन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥८॥

४७४. अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥९॥

४७५. समीचीनास आशत होतारस्सप्त जानयः । पदमेकस्य पिप्रतः ॥१०॥

४७६. नाभा नाभिन्न आददे चक्षुषा सूर्यन्दृशे । कवेरपत्यमा दुहे ॥११॥

अङ्गोषिणम् । पवमानम् । सखायः । स । खायः । दुमर्षम् । दुः । मर्षम् ।
वाणम् । प्र । वदन्ति । साकम् ॥ सः । योजते । उरुगायस्य । उरु । गायस्य ।
जूतिम् । वृथा । क्रीडन्तम् । मिमते । न । गावः । परीणसम् । परि । नसम् ।
कृणुते । तिग्मशृङ्गः । तिग्म । शृङ्गः । दिवा । हरिः । दृदृशे । नक्तम् । ऋञ्जः ।
प्र । स्वानासः । रथाः । इव । अर्वन्तः । न । श्रवस्यवः । सोमासः । राये ।
अक्रमुः ॥ हिन्वानासः । रथाः । इव । दधन्विरे । गभस्त्योः । भरासः ।
कारिणाम् । इव । राजानः । न । प्रशस्तिभिः । प्र । शस्तिभिः । सोमासः । गोभिः ।
अञ्जते । यज्ञः । न । सप्त । धातृभिः ॥ परि । स्वानासः । इन्दवः । मदाय ।
वर्हणा । गिरा । मधो । अर्षन्ति । धारया ॥ आपानासः । विवस्वतः ।
वि । वस्वतः । जिन्वन्तः । उषसः । भगम् । सूराः । अण्वम् । वि । तन्वते ॥
अप । द्वारा । मतीनाम् । प्रत्नाः । ऋण्वन्ति । कारवः । वृष्णः । हरसे ।
आयवः ॥ समीचीनासः । सम् । ईचीनासः । आशत । होतारः । सप्तजानयः ।
सप्त । जानयः । पदम् । एकस्य । पिप्रतः ॥ नाभा । नाभिम् । नः । आ । ददे ।

३ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ १ २ ३ १ २
४७७. अभि प्रियन्दिवस्पदमध्वर्युभिर्गुहा हितम् । सूर॑पश्यति चक्षसा ॥१२॥
धा. ५७, उ. ४. स्व. ८. झै. ॥१॥

प्रथमः खण्डः ॥

२५४. असितः काश्यपो देवलो वा, भृगुर्वारुणिर्जमदग्निर्भार्गवो वा ।
गायत्री । पवमानः सोमः ॥

१ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २ ३ १ २
४७८. असृग्रमिन्दव॑पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजना ॥१॥

२उ ३ १ २ ३ २ ३ २ ३ १ २र ३ २ ३ २ ३ १ २
४७९. प्र धारा मधो अग्रियो महीरपो वि गाहते । हविर्हविष्षु वन्द्यः ॥२॥

२ ३ २ ३ १ २ ३ १ २र ३ १ २ २ ३ २ ३ १ २ ३ २
४८०. प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने । सद्मा॒भि सत्यो अध्वरः ॥३॥

२ ३ १ २र ३ २ ३ १ २ ३ १ २र १ २र ३ १ २
४८१. परि यत्काव्या कविर्नृम्णा पुनानो अर्षति । स्वर्वाजी सिषासति ॥४॥

१ २ ३ २उ ३ २ ३ १ २ १ २ ३ १ २ ३ १ २
४८२. पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥५॥

२ ३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ २
४८३. अव्या वारे परिप्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥६॥

२ ३ १ २र ३ १ २ ३ १ २र २ ३ १ २ ३ १ २
४८४. स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मणा ॥७॥

२ ३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
४८५. आमित्रे वरुणे भगे मधो॑पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥८॥

---

१ २र १ २र ३ २ ३ २ १ २र ३ २ ३ २
चक्षुषा । सूर्यम् । दृशे । कवेः । अपत्यम् । आ । दुहे । अभि । प्रियम् । दिवः ।
३ २ ३ १ २ १ २र ३ २ १ २र ३ १ २र
पदम् । अध्वर्युभिः । गुहा । हितम् । सूरः । पश्यति । चक्षसा ॥

१ २र १ २र ३ २ १ २र ३ १ २ ३ १ २ ३ १ २र
१५४. असृग्रम् । इन्दवः । पथा । धर्मन् । ऋतस्य । सुश्रियः । सु । श्रियः ।
३ २ ३ १ २र १ २र १ २र ३ २ ३ २ ३ २
विदानाः । अस्य । योजना ॥ प्र । धारा । मधोः । अग्रियः । महीः । अपः ।
३ २ ३ १ २ १ २र ३ २ ३ २ ३ २ १ २र
वि । गाहते । हविः । हविष्षु । वन्द्यः ॥ प्र । युजा । वाचः । अग्रियः । वृषा ।
३ १ २र १ २र ३ २ ३ २ ३ २ १ २र १ २र
उ । अचिक्रदत् । वने । सद्म । अभि । सत्यः । अध्वरः ॥ परि । यत् । काव्या ।
३ २ ३ २ ३ २ १ २र १२ ३ २ ३ १ २र
कविः । नृम्णा । पुनानः । अर्षति । स्वः । वाजी । सिषासति ॥ पवमानः ।
३ २ १ २र १ २र १ २र ३ २ ३ १ २
अभि । स्पृधः । विशः । राजा । इव । सीदति । यत् । ईम् । ऋण्वन्ति ॥
३ १ २ १ २र १ २र १ २र ३ २ १ २र १ २र ३ २
वेधसः ॥ अव्याः । वारे । परि । प्रियः । हरिः । वनेषु । सीदति । रेभः ।
३ २ ३ २ १ २र ३ १ २ ३ २ १ २र ३
वनुष्यते । मती ॥ सः । वायुम् । इन्द्रम् । अश्विना । साकम् । मदेन । गच्छति ।

४८६. अस्मभ्यꣳरोदसी रयिं मध्वो वाजस्य सातये ।
श्रवो वसूनि सञ्जितम् ॥९॥

४८७. आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् ॥१०॥

४८८. आ मन्द्रमावरेण्यमा विप्रमा मनीषिणम् । पान्तमा पुरुस्पृहम् ॥११॥

४८९. आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा । पान्तमा पुरुस्पृहम् ॥१२॥

धा. ३८. उ. ५. स्व. ११. ण. ॥२॥

द्वितीयः खण्डः ॥

१५५. भरद्वाजो बार्हस्पत्यः । त्रिष्टुप् । अग्निः ॥

४९०. मूर्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳसम्राजमतिथिञ्जनानामासन्नꣳपात्रञ्जनयन्त देवाः ॥१॥

४९१. त्वां विश्वे अमृत जायमानꣳशिशुन्न देवा अभि सञ्चरन्ते ।
तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥२॥

रण । यः । अस्य । धर्मणा ॥ आ । मित्रे । मि । त्रे । वरुणे । भगे । मधोः ।
पवन्ते । ऊर्मयः । विदानाः । अस्य । शक्मभिः ॥ अस्मभ्यम् । रोदसी इति ।
रयिम् । मध्वः । वाजस्य । सातये । श्रवः । वसूनि । सम् ॥ जितम् । आ ।
ते । दक्षम् । मयोभुवम् । मयः । भुवम् । वह्निम् । अद्य । अ । द्य । वृणीमहे ।
पान्तम् । आ । पुरुस्पृहम् । पुरु । स्पृहम् ॥ आ । मन्द्रम् । आ । वरेण्यम् । आ ।
विप्रम् । वि । प्रम् । आ । मनीषिणम् । पान्तम् । आ । पुरुस्पृहम् । पुरु ।
स्पृहम् ॥ आ । रयिम् । आ । सुचेतुनम् । सु । चेतुनम् । आ । सुक्रतो । सु ।
क्रतो । तनूषु । आ । पान्तम् । आ । पुरुस्पृहम् । पुरु । स्पृहम् ॥

१५५. मूर्धानम् । दिवः । अरतिम् । पृथिव्याः । वैश्वानरम् । वैश्व ।
नरम् । ऋते । आ । जातम् । अग्निम् । कविम् । सम्राजम् । सम् । राजम् ।
अतिथिम् । जनानाम् । आसन् । नः । पात्रम् । जनयन्त । देवाः ॥ त्वाम् ।

४९२. नाभिं यज्ञानाꣳसदनꣳरयीणां महामाहावमभि सन्नवन्त ।
वैश्वानरꣳरथ्यमध्वराणां यज्ञस्य केतुञ्जनयन्त देवाः ॥३॥
धा. ३६. उ. १. स्व. ५. कु. ॥३॥

१५६. यजत आत्रेयः । गायत्री । मित्रावरुणौ ।

४९३. प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥१॥
४९४. सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥२॥
४९५. ता नश्शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥३॥
धा. १३. उ. न. स्व. १. र. ॥४॥

१५७. मधुच्छन्दा वैश्वामित्रः । गायत्री । इन्द्रः ।

४९६. इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥१॥
४९७. इन्द्रायाहि धियेषितो विप्रजूतस्सुतावतः । उप ब्रह्माणि वाघतः ॥२॥
४९८. इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥३॥
धा. १६. उ. न. स्व. ४. ही. ॥५॥

विश्वे । अमृत । अ । मृत । जायमानम् । शिशुम् । न । देवाः । अभि । सम् ।
नवन्ते । तव । क्रतुभिः । अमृतत्वम् । अ । मृतत्वम् । आयन् । वैश्वानर ।
वैश्व । नर । यत् । पित्रोः । अदीदेः । नाभिम् । यज्ञानाम् । सदनम् । रयीणाम् ।
महाम् । आहावम् । आ । हावम् । अभि । सम् । नवन्त । वैश्वानरम् । वैश्व ।
नरम् । रथ्यम् । अध्वराणाम् । यज्ञस्य । केतुम् । जनयन्त । देवाः ॥

१५६. प्र । वः । मित्राय । मि । त्राय । गायत । वरुणाय । विपा ।
गिरा । महिक्षत्रौ । महि । क्षत्रौ । ऋतम् । बृहत् ॥ सम्राजा । सम् । राजा ।
या । घृतयोनी । घृत । योनी इति । मित्रः । मि । त्रः । च । उभा । वरुणः ।
च । देवा । देवेषु । प्रशस्ता । प्र । शस्ता । ता । नः । शक्तम् । पार्थिवस्य ।
महः । रायः । दिव्यस्य । महि । वाम् । क्षत्रम् । देवेषु ॥

१५७. इन्द्र । आ । याहि । चित्रभानो । चित्र । भानो । सुताः । इमे ।

१५८. भरद्वाजो बार्हस्पत्यः । गायत्री । इन्द्राग्नी ॥

४९९. तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
कृष्णा कृणोति जिह्वया ॥१॥

५००. य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥२॥

५०१. ता नो वाजवतीरिष आशून्पिपृतमर्वतः । एन्द्रमग्निञ्च वोढवे ॥३॥

धा. ७. उ. न. स्व. १. य. ॥६॥

तृतीयः खण्डः ॥

त्वायवः । अण्वोभिः । तना । पूतासः ॥ इन्द्र । आ । याहि । धिया । इषितः ।
विप्रजूतः । विप्र । जूतः । सुतावतः । उप । ब्रह्माणि । वाघतः ॥ इन्द्र । आ ।
याहि । तूतुजानः । उप । ब्रह्माणि । हरिवः । सुते । दधिष्व । नः । चनः ॥

१८. तम् । ईडिष्व । यः । अर्चिषा । वना । विश्वा । परिष्वजत् ।
परि । स्वजत् । कृष्णा । कृणोति । जिह्वया ॥ यः । इद्धे । आविवासति ।
आ । विवासति । सुम्नम् । इन्द्रस्य । मर्त्यः । द्युम्नाय । सुतराः । सु । तराः ।
अपः ॥ ता । नः । वाजवतीः । इषः । आशून् । पिपृतम् । अर्वतः । आ ।
इन्द्रम् । अग्निम् । च । वोढवे ॥

---

१. सन्तनि ॥ देवाः । गायत्री । पवमानस्सोमः ॥

[1]वृषाहाउ ॥ पावस्वधाऽ३१उवाऽ२३ । राऽ२३४या । मरुत्वते-
चमत्सराऽ१ः ॥ विश्वाहाउ ॥ दाघानओऽ३आउवाऽ२३ ॥ जाऽ२३४-
सा ॥ श्रीः ॥ तन्त्वाधर्तारमोण्योऽपवमानसुवर्दृशाऽ२३४५म् ॥ हिन्वेहाउ ॥
वाजेषुवाऽ३१उवाऽ२३ ॥ जाऽ२३४इनाम् ॥श्रीः॥ अयाचित्तोविपानयाहरि-
ऽपवस्वधारयाऽ२३४५ ॥ युजाऽहाउ ॥ वाजेषुचोऽ३आउवाऽ२३ ॥
दाऽ२३४या ॥ दी. १४. उत्. २. मा. १५. शु. ॥१२१॥

---

[1] पञ्चपञ्चाशत्तमे सूक्ते गीयते ।

२. ऐड[१]सौपर्णम् ॥ सुपर्णः ॥ गायत्री । पवमानस्सोमः ।

[२]वृषापवोवा ॥ स्वाधाराऽ२३४या । मरूत्वताइ । चमाऽ२त्सा-
२३४राः ॥ वाऽ२इश्वा । दाऽ२३धा ॥ नाओजसा । औऽ३होवा ॥श्रीः॥
तन्त्वाधत्तोवा ॥ रामोणाऽ२३४योः । पवामाना । सुवाऽ२दऽ२३४शाम् ॥
हाऽ२इन्वे । वाऽ२३जाइ ॥ षूवाजिनाम् । औऽ२३होवा ॥ श्रीः ॥ अया-
चित्तोवा ॥ वाइपानाऽ२३४या । हराइ॒पवा । स्वधाऽ२राऽ२३४या ॥
यूऽ२जाम् । वाऽ२३जाइ ॥ षूचोदया । औऽ३होवा । होऽ५इ ॥डा॥
दी. ७. उत्. ९. मा. १४. झी. ॥१२२॥

३. रोहितकूलीयम् ॥ इन्द्रः । गायत्री । पवमानस्सोमः ॥

[१]वृषापवस्वधा ॥ रयाऽ२ । मरुत्वतेचमत्साऽ२३राः ॥ वाइश्वाऽ२-
दाधाऽ२३ ॥ नओऽ२३४वा । जाऽ५सोऽ६"हाइ ॥श्रीः॥ तन्त्वाधत्तोरमो ॥
णियोऽ२ः । पवमानसुवदऽ२३शाम् ॥ हाइन्वेऽ२वाजाऽ२३इ ॥ षुवोऽ२३४-
वा । जाऽ५इनोऽ६"हाइ ॥श्रीः॥ अयाचित्तोविपा ॥ नयाऽ२ । हरि॒पवस्व-
धाराऽ२३या ॥ यूजाऽ२म्वाजाऽ२३इ ॥ षुचोऽ२३४वा । दाऽ५योऽ६"हाइ ॥
दी. ८. उत्. ८. मा. १२. डा. ॥१२३॥

४. कण्वरथन्तरम् ॥ कण्वः । बृहती । पवमानस्सोमः ॥

[२]पूनानस्सोमधारया ॥ अपोवसा । नोऽ३आर्षाऽ३सी । आरत्त-
धायोनिमृतस्यसीदसाऽ२३४ऐही ॥ उत्सोदाऽ२३४इवाः ॥ हिराऽ३१-
उवाऽ२३ ॥ एऽ३ । एययआ ॥श्रीः॥ ऊत्सोदेवोहिरण्ययाः ॥ उत्सोदेवो ।
हाऽ३इराण्याऽ३याः । दुहानऊधर्दिवियंमधुप्रियाऽ२३४मैही ॥ प्रत्त॑सा-
ऽ२३४धा ॥ स्थमाऽ३१उवाऽ२३ ॥ एऽ३ । सददा ॥श्रीः॥ प्रात्त॑सधस्थ-

[१] पञ्चपञ्चाशत्तमे सूक्ते गीयते ।
[२] नवमे सूक्ते गीयते ।

मासदात् ॥ प्रत्न॑स॒धा । स्थाऽ३मासाऽ३दात् । आपृच्छ्यंधरुणंवाजि-
र्षसाऽ२३४ऐही ॥ नृभिर्धौऽ२३४ताः ॥ विचाऽ३१उवाऽ२३ । एऽ३ ।
क्षणआ ॥ दी. २५. उत्. ९. मा. १७. भे. ॥१२४॥

५. गौङ्गवम् ॥ अग्निः । बृहती । पवमानस्सोमः ॥

[1]पुनानाऽ३स्सोमधारया ॥ आपोऽ२ । वसानोआऽ३ । षासाइ ।
आरत्नधायोनिमाऽ२३र्ताऽ२ । स्यसाऽ३इदासाइ । आरत्नधायोनिमृत । स्य-
साऽ३इदासाइ ॥ ऊत्सोदे । वा । औऽ३हो ॥ हिरोऽ२३४वा । ण्याऽ५यो-
ऽ६"हाइ ॥ श्रीः ॥ उत्सोदाऽ३इवोहिरण्ययाः ॥ ऊत्सोऽ२ । देवोहिराऽ३ ।
ण्यायाः । दुहानऊधर्दिवाऽ२३याऽ२म् । मधूऽ३प्रायाम् । दुहानऊधर्दि-
वियम् । मधूऽ३प्रायाम् ॥ प्रात्न॑स । धा । औऽ३हो ॥ स्थमोऽ२३४वा ।
साऽ५दोऽ६"हाइ ॥ श्रीः ॥ प्रत्न॑साऽ३धस्थमासदात् ॥ प्रात्नाऽ२म् । सध-
स्थमाऽ३ । सादात् । आपृच्छ्यंधरुणाऽ२३म्वाऽ२ । जियाऽ३र्षासाइ ।
आपृच्छ्यंधरुणंवा । जियाऽ३र्षासाइ ॥ नृमिर्धौ । ता । औऽ३हो ॥ विचो-
ऽ२३४वा । क्षाऽ५णोऽ६"हाइ ॥ दी. २६. उत्. ९. मा. २३. घि. ॥१२५॥

६. साप्तमिकमायास्यम् ॥ अयास्य आङ्गिरसः । बृहती । पवमानस्सोमः ॥

[1]पुनानस्सोमधारया । एऽ३ । औऽ३होऽ५वा ॥ आपोऽ३ । वसाऽ२ ।
नआऽ३४५ । षाऽ३सीऽ२३४५ । आरत्नधाः । योनिमृता । स्यासाऽ३आ ।
औऽ३होऽ३ । दाऽ२३४सी ॥ उत्साऔऽ३हो ॥ दाइवोऽ२ । हिराऽ३४५ ॥
ण्याऽ३याऽ२३४५ः ॥ श्रीः ॥ उत्सोदेवोहिरण्ययः । एऽ३ । औऽ३-
होऽ५वा ॥ ऊत्सोऽ३ । दाइवोऽ२ । हिराऽ३४५ । ण्याऽ३याऽ२३४५ः ।
दूहानऊ । धार्दिवियाम् । माधूऽ३आ । औऽ३होऽ३ । प्रीऽ२३४याम् ॥

[1] नवमे सूक्ते गीयते ।

१५९. सिकता निवावरी। जगती। पवमानः सोमः॥

५०२. प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतꣳसखा सख्युर्न प्र मिनाति सङ्गिरम्।
मर्य इव युवतिभिस्समर्षति सोमꣳकलशे शतयामना पथा ॥१॥

५०३. प्र वो धियो मन्द्रयुवो विपन्युवꣳपनस्युवस्संवरणेष्वक्रमुः।
हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवꣳपयसेदशिश्रयुः ॥२॥

५०४. आ नस्सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥३॥

धा. २८. उ. २. स्व. ३. ठि. ॥७॥

---

१५९. प्र। उ। अयासीत्। इन्दुः। इन्द्रस्य। निष्कृतम्। निः। कृतम्। सखा। स। खा। सख्युः। स। ख्युः। न। प्र। मिनाति। संगिरम्। सम्। गिरम्। मर्यः। इव। युवतिभिः। सम्। अर्षति। सोमः। कलशे। शतयामना। शत। यामना। पथा॥ प्र। वः। धियः। मन्द्रयुवः। विपन्युवः। पनस्युवः। संवरणेषु। सम्। वरणेषु। अक्रमुः। हरिम्। क्रीडन्तम्। अभि। अनूषत।

प्रत्नाऔऽ३हो ॥ साधाऽ२। स्थमाऽ३४५ ॥ साऽ३दाऽ२३४५त् ॥ श्रीः ॥
प्रत्नꣳसधस्थमासदत्। एऽ३। औऽ३होऽ५वा ॥ प्रात्नाऽ३म्। सधाऽ२।
स्थमाऽ३४५। साऽ३दाऽ२३४५त्। आपृच्छियाम्। धारुणंवा। जाया-
ऽ३आ। औऽ३होऽ३। षाऽ२३४सी ॥ नृभाऔऽ३हो ॥ धौतोऽ२।
विचाऽ३४५ ॥ क्षाऽ३णाऽ२३४५ः ॥ दी. ९. उत्. ३. मा. २२. दा. ॥१२६॥

७. प्रवद्भार्गवम्॥ भृगुः। जगती। पवमानस्सोमः॥

प्रोअयासाइत्। इन्दुरिन्द्रा। स्याऽ२निष्कृताम् ॥ सखासख्यूः।
नप्रमिना। ताऽ२इसङ्गिराम् ॥ मर्यइवा। युवतिभाइः। साऽ२मर्षताइ ॥

१२र ३२ ३१२ १२र ३ २ ३
स्तुभः। अभि। धेनवः। पयसा। इत्। अशिश्रयुः॥ आ। नः। सोम।
१२ ३ १२र ३१२ १२र १२र १२र १२र
संयतम्। सम्। यतम्। पिप्युषीम्। इषम्। इन्दो। पवस्व। पवमानः।
३१२ ३ १२र १२र ३ १२र
ऊर्मिणा। या। नः। दोहते। त्रिः। अहन्। अ। हन्। असश्चुषी। अ।
३ २ १२र १२र ३१२ ३ १२र
सश्चुषी। क्षुमत्। वाजवत्। मधुमत्। सुवीर्यम्। सु। वीर्यम्॥

२र १ २र१ — १र २ २ र१ २ १
सोमऽकला। शेशतया। माऽरनापथाऽ३१उ॥श्रीः॥ प्रबोधियो। मन्द्रयुवो।
— १ २ १ २१ — १ २ १र
वाऽरइषन्युवाः। पनस्युवाः। संवरणाइ। षूऽरवक्रमूः॥ हरिक्रीडा।
२१ — १ त २ १र २१ — १ २
तमभ्यनू। षाऽरतस्तुभाः॥ अभिधेना। वऽपयसाइत्। आऽरशिश्रयूऽ३-
१ २र १र २१ — १र २ र १
राउ॥ श्रीः॥ आनस्सोमा। संयतंपाइ। प्यूऽरषीमिषाम्॥ इन्दोपवा।
२१ — १र २र र १र २र१ — १
स्वपवमा। नाऽरऊर्मिणा॥ यानोदोहा। तेत्रिरहान्। आऽरसश्चुषाइ॥
२ १र २ १ — १र २ १ १ १ १
क्षुमद्वाजा। वन्मधुमात्। सूऽरवीरियाऽ३माउ। वाऽर३४५॥

दी. २०. उत्. २४. मा. २८. मै. ॥१२७॥

८. अभिनिधनं काण्वम्॥ कण्वः। बृहती। इन्द्रः॥

[1]२र१ २ १ २ १ २ ^ ३ ५ २ ^ ३
औहोहोहाइ। आइही। वायाम्॥ घाऽर३४त्वा। सूतावा-
५ २ ^ ३ ५ २र१ ३ ५
ऽर३४न्ताः। आपोनाऽर३४व्। क्तावर्हिषाः। ऐहोइ। आऽर३४इही।
२ ३ ५ २ ^ ३ २र१ २र१ ३ ५
पावित्राऽर३४स्या। प्रास्रावाऽर३४णे। षूवृत्रहान्। ऐहोइ। आऽर३४इही।
२ ३ ५ ३२ ४ २र१ २ १ २
पारिस्तोऽर३४ता॥ रआऽ३साऽ५ताऽ६५६इ॥श्रीः॥ औहोहोहाइ। आइही।
१ २ ^ ३ ५ २ ^ ३ ५ २ ^ ३ ५
स्वारा॥ ताऽर३४इत्वा। सूतेनाऽर३४राः। वासोनाऽर३४इरे।
२र१ २र१ ३ ५ २ ^ ३ ५ २ ^ ३
काउक्थिनाः। ऐहोइ। आऽर३४इही। कादासूऽर३४ताम्। तार्षणा-
५ २र१ १र २र१ ३ ५ २ ^ ३
ऽर३४ओ॥ काआगमाः। ऐहोइ। आऽर३४इही॥ आइन्द्रास्वा-
५ ३२ ४ २र१ २ १ २
ऽर३४ब्दी॥ ववाऽ३५साऽ५गाऽ६५६ः॥श्रीः॥ औहोहोहाइ। आइही।
१ २ ^ ३ ५ २ ३ ५ २ ३ ५
काण्वे॥ भाऽर३४इर्द्धी। ष्णावाघाऽर३४र्षात्। वाजन्दाऽर३४र्षी।

---

[1] षट्सप्ततितमे सूक्ते गीयते।

१६०. पुरुहन्मा आङ्गिरसः॥ बृहतीसतोबृहत्यौ। इन्द्रः॥

२ ३ १ २र ३ २ ३ १ २ ३ १ २
५०५. न किष्टं कर्मणा नशद्यश्चकार सदावृधम्।
२ ३ २ ३र ३ १ २ ३ १ २ ३ १ २ ३ १ २र
इन्द्रन्न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥

१ २ ३ १ २र ३ १ २र ३ १ २ ३ १ २
५०६. अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः।
२ ३ २ ३ १ २ ३ २ ३ १ २
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥२॥

धा. १६. उ. न. स्व. ४. ही. ॥८॥

चतुर्थः खण्डः॥

---

१६०. २ न। ३ किः। २ तम्। १ २र कर्मणा। ३ नशत्। २ यः। ३ १ २ चकार। ३ १ २ सदावृधम्।
३ २ सदा। ३ वृधम्। १ २र इन्द्रम्। न। ३ २ यज्ञैः। ३ १ २ विश्वगूर्तम्। ३ २ विश्व। ३ गूर्तम्। १ २र ऋभ्वसम्।
१ २र अधृष्टम्। अ। ३ धृष्टम्। २ धृष्णुम्। १ २र ओजसा॥ १ २र अषाढम्। ३ २ उग्रम्। १ २र पृतनासु।
३ २ सासहिम्। १ २र यस्मिन्। ३ २ महीः। ३ १ २ उरुज्रयः। ३ उरु। १ २र ज्रयः। ३ १ २ सम्। धेनवः। १ २र जायमाने।
३ अनोनवुः। १ २र द्यावः। १ २र क्षामीः। ३ अनोनवुः॥

२र १ साहस्रिणाम्। २र १ ऐहोइ। ३ आऽ२३४इही। २ ३ ५ पाइशंगाऽ२३४रू। २ ३ पंमाघा-
५ ऽ२३४वान्। २र १ वीचषणाइ। २र १ ऐहोइ। ३ आऽ२३४इही। २ ३ ५ माचूगोऽ२३४मा॥
३ २ ४ ३ ५ तमाऽ३इमाऽ५हाऽ६५६इ॥ आऽ२३४भी॥

दी. १६. उत्. १५. मा. ४३. ङि. ॥१२८॥

९. वैखानसम्॥ वैखानसाः। बृहती। इन्द्रः।

५ २ ४ ५ ४र ५ २ १ २र १ २ ३र २ १ २ ३र
नकिष्टाऽ३म्कमणानशात्॥ यश्चाकारा। सदावृधाऽ२३म्। सदा-
२ १ २ १ २र ३ २ १ अ — १ २ ३ २
वृधाम्। इन्द्रान्नया। ज्ञैर्विश्वगू। तमाऽ२र्भ्वसाऽ२३म्॥ तमृभ्वसाम्॥
१ २ १ २ ३र २ १ २ ३र २ ५ २ ४ ५
अघाष्टन्धा। ष्णुमोजसाऽ२३॥ ष्णुमोजसाऽ३४३॥श्रीः॥ अधृष्टाऽ३न्धृष्णु-
४र ५ २ १ २ १ २ ३र २ १ २ ३र २ १ २ १
मोजसा॥ अघाष्टधा। ष्णुमोजसाऽ२३॥ ष्णुमोजसा। अषाढम्।
२ ३ २ १ अ — १ २ ३र २ १ २ ३
ग्रंपृतना। सुसाऽ२सहाऽ२३इम्। सुसासहीम्॥ यस्माइन्महाइः। उरु-

२ १ २ ३ २ ५ ३ ४र५ ४ ५ २ १
ज्रयाऽ२३ः । उरुज्रयाऽ३४३ः ॥श्रीः॥ यस्मिन्माऽ३हीरुरुज्रयाः ॥ यस्मा-
२ १ २ ३ २ १ २ ३ २ १ २ १ २र ३ २र १
इन्महाइः । उरुज्रयाऽ२३ः । उरुज्रयाः । संघाइनवो । जायमाने ।
अ — १ २ ३र २ र १ २र १ २ ३र २ १
अनोऽ२नवूऽ२३ः । अनोनवूः ॥ द्यावाःस्थिक्षामाइः । अनोनवूऽ२३ः ॥
२ ३र २ १
अनोनवूऽ३४३ः । ओऽ२३४५इ ॥डा॥ दी. १९. उत्. ९. मा. २८. धै. ॥१२९॥

१०. दक्षणिधनमौक्षम् ॥ भरद्वाजः । गायत्री । पवमानस्सोमः ॥

१ १२र १२र १ र २ १र २र १ २ १ र र २
यस्तेमदोवरेण्यः । औहोवा ॥ इहश्रुधाइ । तेनापाऽ२३वा ।
१ र र २ १ २ २ १
स्वअन्धसा ॥ देवावाऽ२३इराऽ३ । होवाऽ३हाइ ॥ घशꣳसाऽ२३४५-
१ २ १ २ १ २ १र २र १ २ १
हाऽ६५६ ॥श्रीः॥ जज्ञिर्वृत्रममित्रियम् । औहोवा ॥ इहश्रुधाइ । सस्निर्वा-
२ १र र र २ १ २ २ १र
ऽ२३जाम् । दिवेदिवाइ ॥ गोषाताऽ२३इराऽ३ । होवाऽ३हा ॥ श्वसा-
आऽ२३४५साऽ६५६इ ॥श्रीः॥ संमिश्लोअरुषोभुवः । औहोवा ॥ इहश्रुधाइ ।
र २ १र २ १ २ १र २र १ २ १
सूपस्थाऽ२३भीः । नधेनुभाइः ॥ सीदन्छयाऽ२३इनाऽ३ः । होवाऽ३-
२ १र १ २ १ १ १
हाइ ॥ नयोनाऽ२३४५इमाऽ६५६ ॥ दक्षाऽ३याऽ२३४५ ॥
दी. २३. उत्. ९. मा. २२ ढा. ॥१३०॥

११. शार्करम् ॥ शर्करः । ककुप् । पवमानस्सोमः ॥

[2] ५र ४ २ ३र ४ र ५ १र र २ २ २ १ र र र
एषाऽ३स्यधारयासुताः ॥ एषस्यधारयाऽ१सूऽ३ताः । अव्यावारे-
२ ४ २ ३ ५ १ २ ४ २ ३ ५
भिꣳपा । वताऽ३इमाऽ३दिन्तमः ॥ भिꣳपा । वताऽ३इमाऽ३दिन्तमः ॥
२र १ — १ २ ४ ५र ४
क्रीडानूऽ२ । माऽ२३इः । अपाऽ३माऽ५इ"वाऽ६५६ ॥ श्रीः ॥ क्रीडाऽ३-
२र ३ ४ र ५ १र र २ २ १ र २र
नूर्मिरपामिवा ॥ क्रीडन्नूर्मिरपाऽ१मीऽ३वा । यउस्रियाअपाइ । याआऽ३-

---

[1] षष्टितमे सूक्ते गीयते ।

[2] पूर्वार्चिकस्य चतुरशीत्युत्तरपञ्चशततमपञ्चाशीत्युत्तरपञ्चशततमयो ऋचोर्गीयते । ते यथा

३ १ २र ३ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २
एषस्य धारया सुतोऽव्यावारेभिꣳपवते मदिन्तमः । क्रीडन्नूर्मिरपामिव ।

२ ३ २ ३ २ ३ २ ३ १ २र ३ १ २र ३ १ २
य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।

३ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
अभिव्रजन्तत्लिषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥

१६१. पर्वतनारदौ काण्वौ शिखण्डिन्यावप्सरसौ काश्यपौ वा।
उष्णिक्। पवमानः सोमः॥

५०७. सखाय आ निषीदत पुनानाय प्रगायत।
शिशुन्न यज्ञैः परिभूषत श्रिये ॥१॥

५०८. समीवत्सन्न मातृभिस्सृजता गयसाधनम्।
देवाव्यऽ३म्मदमभि द्विशवसम् ॥२॥

५०९. पुनाता दक्षसाधनं यथाशर्द्धाय वीतये।
यथा मित्राय वरुणाय शन्तमम् ॥३॥

धा. १५. उ. १. स्व. ३. पि. ॥९॥

---

१६१. सखायः। स। खायः। आ। नि। सीदत। पुनानाय। प्र। गायत। शिशुम्। न। यज्ञैः। परि। भूषत। श्रिये॥ सम्। ई। वत्सम्। न। मातृभिः। सृजत। गयसाधनम्। गय। साधनम्। देवाव्यम्। देव। अव्यम्। मदम्। अभि। द्विशवसम्। द्वि। शवसम्॥ पुनात। दक्षसाधनम्। दक्ष। साधनम्। यथा। शर्द्धाय। वीतये। यथा। मित्राय। मि। त्राय। वरुणाय। शन्तमम्॥

न्ताऽ३रश्मनि ॥ अपाइ। याआऽ३न्ताऽ३रश्मनि ॥ निर्गाआऽ२। काऽ२३। तदोऽ३जाऽ५"साऽ६५६ ॥ श्रीः ॥ निर्गाऽ३अकृन्तदोजसा ॥ निर्गाअकृन्तदोऽ१जाऽ३सा। अभिव्रजन्तलाइ। षेगाऽ३व्याऽ३मश्वियम् ॥ तलाइ। षेगाऽ३व्याऽ३मश्वियम् ॥ वर्मीवाऽ२। घाऽ२३। ष्णवाऽ३-रूऽ५"जाऽ६५६ ॥ दी. २१. उत्. ४. मा. २२. घा. ॥१३१॥

१२. स्रवः। वसिष्ठः। उष्णिक्। पवमानस्सोमः॥

हा। वोऽ३हा। वोऽ३हाऽ३। हा। ओऽ२३४वा। हाइ।

साखायाऽ२३४आ । नीषीदाऽ२३४ता ॥ पूनानाऽ२३४या । प्राऽ२३४गा । याऽ२३४ता ॥ शाइशुन्वाऽ२३४या । ज्रैपाराऽ२३४इभूः ॥ षाऽ२३४त । श्राऽ२३४याइ ॥ सामीवाऽ२३४त्साम् । नामातृऽ२३४भाइः ॥ साजीताऽ२३४गा । याऽ२३४सा । धाऽ२३४नाम् ॥ दाइवावाऽ२३४याम् । मादामाऽ२३४भी ॥ द्वाऽ२३४इशा । वाऽ२३४साम् ॥ श्रीः ॥ पूनाताऽ२३४दा । क्षासाधाऽ२३४नाम् ॥ याथाशाऽ२३४र्द्धा । याऽ२३४वी । ताऽ२३४याइ ॥ याथामाऽ२३४इत्रा । यावारूऽ२३४णा ॥ याऽ२३४श ॥ ताऽ२३४माम् । हा । वोऽ३हा । वोऽ३हाऽ३ । हा । ओऽ२३४वा । हाऽ३४ । औहोवा ॥ एऽ३ । अतिविश्वानिदुरितातरेमाऽ२३४५ ॥

दी. ६. उत्. न. मा. १७. हे. ॥१३२॥

१३. गौरीवितम् ॥ गौरीवितिः । अनुष्टुप् । पवमानस्सोमः ॥

[1]पुरः । जिताऽ३इ । वोऽन्धसाः ॥ सुतायमादयिन्नवाऽ२३इ । आपश्चानाऽ३१२३म् । श्नथाऽ५इष्टना ॥ साखायोदाऽ३१२३इ ॥ घजोवा । ह्वाऽ५योऽ६"हाइ ॥ ॥श्रीः॥ सखा । योदाऽ३इ । घजिह्वियाम् ॥ योघारयापावकयाऽ२३ । पारिप्रस्याऽ३१२३ । दताऽ५इसुताः ॥ आइन्दुरश्वाऽ३१२३ः । नकोवा । त्वाऽ५योऽ६"हाइ ॥ श्रीः ॥ इन्दुः । अश्वोऽ३ । नकृत्वियाः ॥ तन्दुरोषमभीनराऽ२३ः । सोमंविश्वाऽ३१२३ । चियाऽ५धिया ॥ याज्ञायसाऽ३१२३ ॥ तुवोवा । द्वाऽ५योऽ६"हाइ ॥

दी. १५. उत् न. मा. २०. वौ. ॥१३३॥

१४. कार्तयशम् । कृतयशाः । अनुष्टुप् । पवमानस्सोमः ॥

[1]पुरोहाहाउ ॥ जाऽ२३४इती । वोआओऽ३होऽ३ । घासाः ।

[1] अष्टादशे सूक्ते गीयते ।

१६२. अग्नयो धिष्ण्या ऐश्वराः। द्विपदा विराट्। पवमानः सोमः॥

५१०. प्रवाज्यक्षास्सहस्रधारस्तिर॰पवित्रं विवारमव्यम् ॥१॥

५११. स वाज्यक्षास्सहस्ररेता अद्भिर्मृजानो गोभिश्श्रीणानः ॥२॥

५१२. प्र सोम याहीन्द्रस्य कुक्षा नृभिर्यमानो अद्रिभिस्सुतः ॥३॥

धा. १५. उ. १. स्व. ५. पु. ॥१०॥

---

१६२. प्र। वाजी। अक्षारिति। सहस्रधारः। सहस्र। धारः। तिरः। पवित्रम्। वि। वारम्। अव्यम्॥ सः। वाजी। अक्षारिति। सहस्ररेताः। सहस्र। रेताः। अद्भिः। मृजानः। गोभिः। श्रीणानः॥ प्र। सोम। याहि। इन्द्रस्य। कुक्षा। नृभिः। यमानः। अद्रिभिः। अ। द्रिभिः। सुतः॥

सुताऔऽ३होऽ३। यामाऽ६। हाउवा। दयित्नवेऽ२॥ उपा॥ अप॰श्चानश्चथाऽ१इष्टाऽ३ना॥ सखाऔऽ३होऽ३। योदाऽ६। हाउवा॥ घजिहियम्। उपाऽ२३४५॥ श्रीः॥ सखाहाहाउ॥ योऽ२३४दी। घजाऔऽ३होऽ३। ह्वायाम्। योधाऔऽ३होऽ३। रायाऽ६। हाउवा। पावकयाऽ२। उपा॥ परिप्रस्यन्दताऽ१इस्रूऽ३ताः॥ इन्दूरौऽ३होऽ३इ। आश्वाऽ६ः। हाउवा॥ नकृत्वियः। उपाऽ२३४५॥श्रीः॥ इन्दुर्हाहाउ॥ आऽ२३४श्वाः। नकाऔऽ३होऽ३। त्वायाः। तन्दूऔऽ३होऽ३। रोषाऽ६म्। हाउवा। अभीनराऽ२ः। उपा। सोमंविश्वाचियाऽ१धाऽ३या॥ यज्ञाऔऽ३होऽ३। यासाऽ६। हाउवा॥ तुवद्रयः। उपाऽ२३४५॥

दी, १२. उत्. १५. मा. ३३. ञि. ॥१३४॥

१५. सौहविषम्॥ इन्द्रः। द्विपदा विराट्। पवमानस्सोमः॥

प्रवाजियक्षाः॥ सहस्रधारास्ताऽ१इराऽ२३४ः। हाइ। पवित्राम्॥

१६३. भृगुर्वारुणिर्जमदग्निर्वा । गायत्री । पवमानः सोमः ॥

५१३. ये सोमासः परावति ये अर्वावति सुन्विरे । ये वादश्शर्यणावति ॥१॥

५१४. य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् । ये वा जनेषु पञ्चसु ॥२॥

५१५. ते नो वृष्टिन्दिवस्परि पवन्तामा सुवीर्यम् । स्वाना देवास इन्दवः ॥३॥

धा. ७. उ. १. स्व. ३. चि. ॥११॥

पञ्चमः खण्डः ॥

---

१६३. ये । सोमासः । परावति । ये । अर्वावति । सुन्विरे । ये । वा । अदः । शर्यणावति ॥ ये । आर्जीकेषु । कृत्वसु । ये । मध्ये । पस्त्यानाम् । ये । वा । जनेषु । पञ्चसु ॥ ते । नः । वृष्टिम् । दिवः । परि । पवन्ताम् । आ । सुवीर्यम् । सु । वीर्यम् । स्वानाः । देवासः । इन्दवः ॥

विवाराऽ२३४५हाइ ॥ आऽ२३४व्योऽ६"हाइ ॥ श्रीः ॥ सवाजियज्ञाः ॥ सहस्ररेताअद्धाऽ२३४इः । हाइ । मृजानाः ॥ गोभाइश्राऽ२३४इहाइ ॥ णाऽ२३४नोऽ६"हाइ ॥ श्रीः ॥ प्रसोमयाही ॥ इन्द्रस्यकुक्षानृभाऽ२३४इः । हाइ । येमानाः ॥ अद्रिभाऽ२३४इहाइ ॥ सूऽ२३४तोऽ६"हाइ ॥

दी. ११. उत्. ८. मा. २४. गी. ॥३५॥

१६. जराबोधीयम् । अग्निः । गायत्री । पवमानस्सोमः ॥

येसोमासोवा ॥ पारावताइ । येआर्वाऽ२३वा । तिसुन्वाइराइ ॥ येवादाऽ१श्शाऽ२३"र्या । णा । वतोऽ३४५इ ॥ डा ॥ श्रीः ॥ यआर्जी-कोवा ॥ षूकृत्वसू । येमाध्याऽ२३इपा । स्तियानाम् ॥ येवाजाऽ१ना-ऽ२३इ"षू । प । चसोऽ३४५इ ॥डा॥ श्रीः ॥ तेनोवृष्टोवा ॥ दाइवस्पराइ । पवान्ताऽ२३मा । सुवीरायाम् ॥ स्वानादाऽ१इवाऽ२३"साः । इ । दवो-ऽ३४५इ ॥डा॥

दी. १५. उत्. ९. मा. १६. भू. ॥१३६॥

१६४. वत्सः काण्वः । गायत्री । अग्निः ॥

५१६. आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
अग्ने त्वां कामये गिरा ॥१॥

५१७. पुरुत्राहि सद्दङ्ङसि दिशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥२॥

५१८. समत्स्वग्निमवसे वाजयन्तो हवामहे । वाजेषु चित्रराधसम् ॥३॥

धा. १३. उ. २. स्व. २. ठा. ॥१२॥

१६५. नृमेध आङ्गिरसः । ककुप्पुरउष्णिहौ ॥ इन्द्रः ॥

५१९. त्वन्न इन्द्राभर ओजो नृम्णꣳशतक्रतो विचर्षणे ।
आवीरं पृतनासहम् ॥१॥

५२०. त्वꣳहि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अथा ते सुम्नमीमहे ॥२॥

---

१६४. आ । ते । वत्सः । मनः । यमत् । परमात् । चित् । सधस्थात् । सध । स्थात् । अग्ने । त्वाम् । कामये । गिरा ॥ पुरुत्रा । हि । सदङ् । स । दङ् । असि । दिशः । विश्वाः । अनु । प्रभुः । प्र । भुः ॥ समत्सु । स । मत्सु । त्वा । हवामहे ॥ समत्सु । स । मत्सु । अग्निम् । अवसे । वाजयन्तः । हवामहे । वाजेषु । चित्रराधसम् । चित्र । राधसम् ॥

---

१७. वात्सम् । वत्सः काण्वः । गायत्री । अग्निः ॥

आतेवत्साः ॥ मनोयमत् । परमात् । चित्सधाऽ२३स्थात् ॥
अग्राइत्वाऽ३ड्काऽ३ ॥ मयोवा ॥ गाऽ५इरोऽ६"हाइ ॥श्रीः॥ पुरुत्राही ॥
सद्दङ्ङसि । दिशोविश्वाः । अनुप्राऽ२३भूः ॥ समात्सूऽ३त्वाऽ३ ॥ हवोवा ।
माऽ५होऽ६"हाइ ॥ श्रीः ॥ समत्सुवा ॥ ग्निमवसे । वाजयन्तः । हवामा-
ऽ२३हाइ । वाजाइषूऽ३चाऽ३इ ॥ त्रोवा । घाऽ५सोऽ६"हाइ ॥

दी. ११. उत्. ३. मा. १५. गु. ॥१३७॥

५२१. त्वाꣳशुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत ।
स नो रास्व सुवीर्यम् ॥३॥
धा. १४. उ. न. स्व. १. ल. ॥१३॥

१६६. अत्रिर्भौमः । अनुष्टुप् । इन्द्रः ॥

५२२. यदिन्द्रि चित्र म इह नास्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥१॥
५२३. यन्मन्यसे वरेण्यमिन्द्र द्युक्षन्तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावनः ॥२॥

---

१६५. त्वम् । नः । इन्द्र । आ । भर । ओजः । नृम्णम् । शतक्रतो । शत । क्रतो । विचर्षणे । वि । चर्षणे । आ । वीरम् । पृतनासहम् । पृतना । सहम् ॥ त्वम् । हि । नः । पिता । वसो । त्वम् । माता । शतक्रतो । शत । क्रतो । बभूविथ । अथ । ते । सुम्नम् । ईमहे ॥ त्वाम् । शुष्मिन् । पुरुहूत । पुरु । हूत । वाजयन्तम् । उप । ब्रुवे । सहस्कृत । सहः । कृत । सः । नः । रास्व । सुवीर्यम् । सु । वीर्यम् ॥

---

१८. सौश्रवसम् ॥ उपगुस्सौश्रवसः । ककुप् । इन्द्रः ॥

तुवन्नाऽइन्द्रआभरा ॥ ओजोनृम्णꣳशतक्रतोविचर्षणाइ ॥
आवौऽ२ । हौऽ२ । हुवाऽ२३इ । राऽ३४म्पा ॥ तनासाहाम् ॥ श्रीः ॥
तुवꣳहाऽ३इनꣳपितावसाउ । त्वंमाताशतक्रतोबभूविथा ॥ अथौऽ२ ।
हौऽ२ । हुवाऽ२३इ । ताऽ३४इसू ॥ म्नमीमाहाइ ॥ श्रीः ॥ तुवाꣳशूऽ३-
ष्मिन्पुरुहूता ॥ वाजयन्तमुपब्रुवेसहस्कृता ॥ सनौऽ२ । हौऽ२ । हुवा-
ऽ२३इ । राऽ३४स्वा ॥ सुवीरायाम् । ऐ । हाऽ२एऽ२३ । हियाऽ३४-
औहोवा ॥ एऽ३ । उपाऽ३१२३४५ ॥
दी. २०. उत्. ४. मा. १४. भी. ॥१३८॥

५२४. यत्ते दिद्यु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
